# MudgalapurAna Khanda 8 Dhumravarnacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૮ ધૂમ્રવર્ણચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 8 Dhumravarnacharitam

File name : mudgalapurANam8.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

# મુદ્ગલપુરાણં ખણ્ડઃ ૮ ધૂમ્રવર્ણચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૮॥

॥ અથ શ્રીમુદ્ગલપુરાણે અષ્ટમઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૮ અ. ૧ પાન ૧)

## ૮.૧ અહમુત્પત્તિવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
વિઘ્નરાજચરિત્રં તુ શ્રુતં સર્વપ્રદં પરમ્ ।
મમનાશકરં પૂર્ણં ત્વત્તોઽસ્માભિર્મહામતે ॥ ૧॥

ધન્યોઽસિ જ્ઞાનયુક્તોઽસિ વ્યાસતુલ્યોઽસિ નિશ્ચિતમ્ ।
વ્યાસાધિકોઽથવા કિં નુ શિષ્યસ્તસ્ય મહાત્મનઃ ॥ ૨॥

શ્રુત્વા શ્રુત્વા ન મે તૃપ્તિર્જાયતે તત્ કથામૃતમ્ ।
માહાત્મ્યં ધૂમ્રવર્ણસ્યાધુના વદ સુખપ્રદમ્ ॥ ૩॥

સૂત ઉવાચ ।
શૃણુ શૌનક માહાત્મ્યં ધૂમ્રવર્ણસ્ય સર્વદમ્ ।
યથા વ્યાસાચ્છ્રુતં પૂર્ણં તથા તે કથયામ્યહમ્ ॥ ૪॥

શ્રુત્વા વિઘ્નેશમાહાત્મ્યં દક્ષો હૃષ્ટમના અભૂત્ ।
પ્રણમ્ય મુદ્ગલં સોઽપિ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૫॥

દક્ષ ઉવાચ ।
વિઘ્નેશસ્ય શ્રુતં પૂર્ણં માહાત્મ્યં સર્વસિદ્ધિદમ્ ।
ન તૃપ્તોઽહં મહાયોગિન્નમૃતાદધિકં યતઃ ॥ ૬॥

અધુના ધૂમ્રવર્ણસ્ય માહાત્મ્યં વદ વિસ્તરાત્ ।

કીદૃશાંઽશમયશ્ચાયં ગણેશો ધૂમ્રવર્ણકઃ ॥ ૭॥

કીદૃશં બ્રહ્મ તસ્યૈવ કેન યોગેન લભ્યતે ।
કતિ તસ્યાવતારાશ્ચ કિં કર્મા કીદૃશં મહઃ ॥ ૮॥

કેન સંસાધિતો દેવો દેહધારી બભૂવ હ ।
કં દૈત્યં વશમાનીય ધર્મમાસ્થાપયત્ પ્રભુઃ ॥ ૯॥

ઇત્યાદિ સર્વમાહાત્મ્યં વદ યોગીન્દ્ર સત્તમ ।
બ્રહ્માણ્ડે ત્વત્સમં નાસ્તિ બ્રહ્મદાયકપાત્રકમ્ ॥ ૧૦॥

સૂત ઉવાચ ।
એવં પૃષ્ટો મહાયોગી મુદ્ગલઃ શૌનકોઽબ્રવીત્ ।
દક્ષં હૃષ્ટમનાઃ સાક્ષાત્ જ્ઞાત્વા ભક્તિયુતં પરમ્ ॥ ૧૧॥

મુદ્ગલ ઉવાચ ।
દક્ષ ત્વં યોગિવન્દ્યોઽસિ નિશ્ચિતં સર્વભાવતઃ ।
નાન્યથા ગણનાથસ્ય કથાયાં જાયતે રસઃ ॥ ૧૨॥

ધૂમ્રવર્ણાવતારસ્ય ચરિતં સર્વસિદ્ધિદમ્ ।
કથયિષ્યામિ ભક્ત્યા તે સમાસેન પ્રજાપતે ॥ ૧૩॥

વિસ્તરેણ શિવાદ્યાશ્ચ વેદાદ્યા ન બભૂવિરે ।
સમર્થાસ્તત્ર કોઽહં તુ સ્વલ્પજ્ઞાનપ્રધારકઃ ॥ ૧૪॥

અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરા ભવમ્ ।
શેષસ્ય શઙ્કરસ્યૈવ સંવાદેન સમન્વિતમ્ ॥ ૧૫॥

પ્રણમ્ય શેષનાગશ્ચ એકદા શઙ્કરં પુરા ।
પપ્રચ્છ સિદ્ધિદં પૂર્ણં સર્વજ્ઞં કરુણાનિધિમ્ ॥ ૧૬॥

ત્વત્તઃ પરતરં નાસ્તિ વેદશ્રુતિપ્રમાણતઃ ।
ત્વં ધ્યાનસંયુતઃ સ્વામિન્ ભજસે કં શિવં પરમ્ ॥ ૧૭॥

અતઃ સંશયયુક્તોઽહં પૃચ્છામિ સર્વભાવતઃ ।
કિં મોહાર્થં મહેશાન કરોષિ ચેષ્ટિતં નવમ્ ॥ ૧૮॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટઃ શિવઃ સાક્ષાત્તમુવાચ સુહર્ષિતઃ ।
ભક્તં યોગપ્રિયં દૃષ્ટ્વા સાધુ ચેષ્ટાસમન્વિતમ્ ॥ ૧૯॥

શિવ ઉવાચ ।
એવં પૃષ્ટોऽહમેકાન્તે સનકાદ્યૈર્મહાપ્રિયૈઃ ।
તત્તેऽહં શ◌ૃણુ વક્ષ્યામિ જ્ઞાનં ગાણેશબોધકમ્ ॥ ૨૦॥

એકદા સનકાદ્યાશ્ચ દૃષ્ટ્વા માં નિયમે રતમ્ ।
પપ્રચ્છુસ્ત્વં યથા શેષ તથા સંશયસંયુતાઃ ॥ ૨૧॥

સનકાદ્યા ઊચુઃ ।
મહેશ્વરો ભવાન્ સાક્ષાત્તવેશો નૈવ વિદ્યતે ।
કં ધ્યાયસિ મહાદેવ મિથ્યા મોહપ્રદાયક ॥ ૨૨॥

તેષાં તદ્વચનં શ્રુત્વા હર્ષિતોऽહં ચ કાશ્યપ ।
ઊચે યોગં ગણેશાખ્યં પૂર્ણશાન્તિપ્રદાયકમ્ ॥ ૨૩॥

ઈશત્વમનીશત્વં ચ માયાયુક્તં ન સંશયઃ ।
બ્રહ્મણિ બ્રહ્મભૂતસ્ય કથં તદ્વર્તતે દ્વિજાઃ ॥ ૨૪॥

(Page ખં. ૮ અ. ૧ પાન ૨)
યેનેશત્વં ચ મે દત્તમનીશત્વં તથાऽપરમ્ ।
જનેભ્યસ્તં ગણાધીશં જપ્તોऽહં ભક્તિસંયુતઃ ॥ ૨૫॥

અહઙ્કારયુતાઃ સર્વે ન જાનન્તિ ગજાનનમ્ ।
તં જિત્વાऽહં મુનીન્દ્રાશ્ચ સેવે તસ્ય પદદ્વયમ્ ॥ ૨૬॥

શિવસ્ય વચનં શ્રુત્વા સનકાદ્યાસ્તમબ્રુવન્ ।
વિસ્મિતા ભાવસંયુક્તા ગણેશજ્ઞાનલાલસાઃ ॥ ૨૭॥

સનકાદ્યા ઊચુઃ ।
અભિમાનં મહાદેવ જેતું નૈવ પ્રશક્યતે ।
વેદાદિભિઃ ચ દેવેશૈરસ્માભિશ્ચાન્યયોગિભિઃ ॥ ૨૮॥

નરોऽહં દેવરૂપોऽહં આત્માહં સ્વસ્વરૂપકઃ ।
બ્રહ્માહં ચ મહેશાન અહં તેષુ પ્રતિષ્ઠિતઃ ॥ ૨૯॥

અહં કેનૈવ યોગેન સદાશિવ જિતસ્ત્વયા ।
વદ તસ્ય ચરિત્રં નો વિસ્તરેણ સુશાન્તિદમ્ ॥ ૩૦॥

શ્રીશિવ ઉવાચ ।
અહં બ્રહ્મણિ વિપ્રેશા ગતો બ્રહ્માસ્મિના સહ ।

મહાવાક્યમયે યોગે બ્રહ્માઽહં દૃશ્યતે ન ચ ॥ ૩૧॥

અહં નાસ્તિ તથા બ્રહ્મ નેતિ બ્રહ્માહમઞ્જસા ।
બોધાર્થં સાધનં ચેદં મહાવાક્યં સ્મૃતં પરમ્ ॥ ૩૨॥

તતઃ સંશયસંયુક્તા સનકાદ્યાસ્તમબ્રુવન્ ।
ન બુદ્ધં વચનં નાથ ત્વદીયં દુર્ગમં પરમ્ ॥ ૩૩॥

અતઃ સુલભયોગેન વદ યોગં મહેશ્વર ।
દયયા શિષ્યમુખ્યાંશ્ચ તારણાય સુશાન્તિદમ્ ॥ ૩૪॥

શ્રીશિવ ઉવાચ ।
અત્ર વઃ કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
અહમ્ભાવવિનાશાર્થમહઙ્કારસ્ય સૌખ્યદમ્ ॥ ૩૫॥

એકદા જ્યોતિષાં નાથઃ સૂર્ય આત્મા શરીરિણામ્ ।
બ્રહ્મણાં ચાભિષિક્તઃ સ કર્મણાં રાજ્યકર્મણિ ॥ ૩૬॥

સ પ્રાપ્ય રાજ્યમુગ્રં તત્ કર્મણાં જ્યોતિષાં પતિઃ ।
અભિમાનયુતોઽત્યન્તં બભૂવે દેવદેવપઃ ॥ ૩૭॥

કર્મણા સૃષ્ટિકર્તા વૈ બ્રહ્મા લોકપિતામહઃ ।
પાલકઃ કર્મણા વિષ્ણુર્હરઃ સંહારકોઽભવત્ ॥ ૩૮॥

કર્મણાઽન્નપ્રભાવેણ પોષિકા શક્તિરેવ ચ ।
કર્માધીનં જગત્ સર્વં સેશ્વરં નાત્ર સંશયઃ ॥ ૩૯॥

સોઽહં કર્મમયો દેવઃ કર્મણાં ચાલકઃ પરઃ ।
મદધીનમિદં ભાતિ ભાનુરેવં સુગર્વિતઃ ॥ ૪૦॥

અહઙ્કારેણ સંયુક્તશ્છિક્કાં ચક્રે કદા પ્રભુઃ ।
તસ્ય ચ્છિક્કાસમુત્પન્નઃ પુરુષઃ સુન્દરાકૃતિઃ ॥ ૪૧॥

સ પપાત મહીપૃષ્ઠે ન જ્ઞાતસ્તેન ભાનુના ।
મહાકાયો વિશાલાક્ષો બલયુક્તો વ્યરાજત ॥ ૪૨॥

તત્રાકસ્માત્ સમાયાતઃ શુક્રઃ સર્વાર્થકોવિદઃ ।
પપ્રચ્છ હર્ષસંયુક્તસ્તં દૃષ્ટ્વા ભાવસંયુતઃ ॥ ૪૩॥

શુક્ર ઉવાચ ।
કોઽસિ ત્વં કુત્ર તે વાસઃ કર્તુમિચ્છસિ કિં વદ ।

માતા પિતા ચ તે ત્રાતા કઃ કિં મત્ત ઇહેચ્છસિ ॥ ૪૪॥

પુરુષ ઉવાચ ।
સૂર્યપુત્રો દ્વિજશ્રેષ્ઠ તસ્ય ચ્છિક્કાસમુદ્ભવઃ ।
અનાથોઽહં મહાભાગ પતિતો ધરણીતલે ॥ ૪૫॥

ત્વં દયાયુક્તભાવેન માં પૃચ્છસિ ન સંશયઃ ।
ત્વદધીનો ભવિષ્યામિ શાધિ માં મુનિસત્તમ ॥ ૪૬॥

શ્રીશિવ ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા શુક્રો યોગવિદાંવરઃ ।
ધ્યાનેનાલોક્ય તત્કર્મ તમુવાચ શુભાવહમ્ ॥ ૪૭॥

શુક્ર ઉવાચ ।
અહમ્ભાવાત્ સમુત્પન્નસ્ત્વં સૂર્યાન્નાત્ર સંશયઃ ।
અહન્નામા ભવસ્વાદ્ય તપઃ કુરુ મહામતે ॥ ૪૮॥

એવમુક્ત્વા દદૌ તસ્મૈ ગાણેશં ષોડશાક્ષરમ્ ।
(Page ખં. ૮ અ. ૨ પાન ૩)
મન્ત્રં વિધિસમાયુક્તં તતઃ સોંઽતર્હિતોઽભવત્ ॥ ૪૯॥

અહં તત્ર તપસ્તેપે ધ્યાત્વા ગણપતિં હૃદિ ।
નિરાહારપરો ભૂત્વા જપમન્ત્રપરાયણઃ ॥ ૫૦॥

શીતોષ્ણવાતવર્ષાદિસહને દૃઢનિશ્ચયઃ ।
જિત્વા ખાનિ પ્રયત્નેન તોષયામાસ વિઘ્નપમ્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહમુત્પત્તિવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૮.૧

## ૮.૨ અહમાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
એવં વર્ષસહસ્રેણ તં દિવ્યેન ગજાનનઃ ।
યયૌ પ્રસન્નભાવેન ભક્ત્યા વરાર્થમાદરાત્ ॥ ૧॥

આખુવાહસ્ત્રિનેત્રશ્ચ ગજવક્ત્રો મહોદરઃ ।

ચતુર્ભુજશ્ચ પાશાદ્યૈઃ શોભિતઃ સિદ્ધિબુદ્ધિયુક્ ॥ ૨॥

એકદન્તઃ શૂર્પકર્ણો દેવૈર્મુનિસમન્વિતૈઃ ।
સંસ્તુતઃ સ્વગણૈશ્ચૈવ સેવિતઃ સર્વદાયકઃ ॥ ૩॥

તં દૃષ્ટ્વાઽહં સમુત્થાય પ્રણનામ કૃતાઞ્જલિઃ ।
પૂજયામાસ વિઘ્નેશં સિદ્ધિબુદ્ધિસમન્વિતમ્ ॥ ૪॥

તતઃ ક્રમેણ દેવાન્ સ મુનીન્ પૂજ્ય પુનઃ પ્રભુમ્ ।
પ્રણનામ પ્રતુષ્ટાવ ગણેશં પ્રકૃતાઞ્જલિઃ ॥ ૫॥

અહમુવાચ ।
નમસ્તે ગણનાથાય હેરમ્બાય પરાત્મને ।
સર્વેભ્યો વરદાત્રે તે વરદાય નમો નમઃ ॥ ૬॥

બ્રહ્મસુ બ્રહ્મનાથાય નિજેષુ સ્વસ્વરૂપિણે ।
સાઙ્ખ્યાય તે પરત ઉત્થાનસ્થેષુ નમો નમઃ ॥ ૭॥

જ્ઞાનેષુ બોધરૂપાય સોઽહન્દેહિષુ તે નમઃ ।
દેહેષુ બિન્દુરૂપાય વિઘ્નેશાય નમો નમઃ ॥ ૮॥

સ્રષ્ટૃષુ બ્રહ્મદેવાય વિષ્ણવે પાલકેષુ તે ।
સંહર્તૃષુ શિવાયૈવૈકદન્તાય નમો નમઃ ॥ ૯॥

પ્રકાશકેષુ સૂર્યાય મોહકેષુ ચ શક્તયે ।
દેવેષુ દેવરાજાય વિનાયકાય તે નમઃ ॥ ૧૦॥

અગ્નયે તે દાહકેષુ યમાય નીતિધારિણામ્ ।
રક્ષઃસુ નૈરૃતાયૈવ શૂર્પકર્ણાય તે નમઃ ॥ ૧૧॥

વાયવે બલયુક્તેષુ નિધિષુ ધનપાય તે ।
રુદ્રેષુ કાલરૂપાય નમો લમ્બોદરાય વૈ ॥ ૧૨॥

પ્રજાપતિષુ દક્ષાય નાગેશે શેષરૂપિણે ।
અનન્તવિભવાયૈવ કિં તે સ્તૌમિ નમો નમઃ ॥ ૧૩॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાદ્યા યોગિનોઽમલાઃ ।
તં કિં સ્તવીમિ વિઘ્નેશમલ્પબુદ્ધિપ્રધારકઃ ॥ ૧૪॥

ધન્યોઽહં કૃતકૃત્યોઽહં સફલો મે ભવઃ પિતા ।
માતા કુલં તથા જ્ઞાનં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૫॥

એવમુક્ત્વા ગણેશાનં પ્રણનામ મહાસુરઃ ।
હર્ષેણ મહતા યુક્તસ્તમુવાચ ગજાનનઃ ॥ ૧૬॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
પઠતે શૃણ્વતે ચૈવ મયિ ભાવપ્રદાયકમ્ ॥ ૧૭॥

(Page ખં. ૮ અ. ૨ પાન ૪)
પુત્રપૌત્રાદિકં સૌખ્યં ભુક્તિં મુક્તિં લભેન્નરઃ ।
અસ્ય પઠનમાત્રેણ મદ્ભક્તિં ભ્રમનાશિનીમ્ ॥ ૧૮॥

વરાન્ વૃણુ મહાભાગ મનેપ્સિતાન્ દદામ્યહમ્ ।
તપસા સ્તોત્રમુખ્યેન તુષ્ટોઽહં તે મહાદરાત્ ॥ ૧૯॥

અહમુવાચ ।
પ્રસન્નોઽસિ યદા નાથ ભક્તિં દેહિ ત્વદીયિકામ્ ।
યદ્યદિચ્છામિ તત્તન્મે સફલં સર્વદાઽસ્તુ ચ ॥ ૨૦॥

માયાવિકારયુક્તેભ્યો મરણં નૈવ મે ભવેત્ ।
રાજ્યં બ્રહ્માણ્ડગોલસ્ય દેહિ મે ભોગસંયુતમ્ ॥ ૨૧॥

આરોગ્યં વિજયં ઢુણ્ઢે સઙ્ગ્રામે હ્યતુલં તથા ।
અમોઘાસ્ત્રં સદા મેઽસ્તુ ત્વત્પ્રસાદાચ્ચ દેહિ ભોઃ ॥ ૨૨॥

તથેતિ તમહં દેવો જગાદ ગણનાયકઃ ।
અન્તર્ધાય સ્વમાત્માનં નિજલોકં જગામ હ ॥ ૨૩॥

તતોઽતિહર્ષસંયુક્તોઽહં જગામ કવિં પુનઃ ।
તં પ્રણમ્ય સ્વવૃત્તાન્તં કથયામાસ વિસ્તરાત્ ॥ ૨૪॥

શ્રુત્વા મુનિવરઃ સોઽપિ તં પ્રશંસ્ય મહાસુરમ્ ।
અસુરાનાહ્વયામાસ શ્રેષ્ઠાન્ કાવ્યો મહામતિઃ ॥ ૨૫॥

તસ્યાજ્ઞયા ત્વરાવન્તો મુનિં સર્વે સમાગતાઃ ।
અસુરાંસ્તાન્ મહાતેજા હિતં કાવ્યો જગાદ વૈ ॥ ૨૬॥

અહમાસુરવૃત્તાન્તં શ્રુત્વા તે શુક્રવક્ત્રતઃ ।
હર્ષિતાસ્તં પ્રણમ્યાદૌ જગુર્વચો હિતાવહમ્ ॥ ૨૭॥

અસુરા ઊચુઃ ।
આજ્ઞાપય મહાયોગિન્ કાર્યં ચેતોગતં પ્રભો ।
કરિષ્યામો વયં દાસાસ્ત્વત્પાદસ્ય જવાન્વિતાઃ ॥ ૨૮॥

તેષાં વચનમાકર્ણ્ય કાવ્યઃ સર્વાર્થકોવિદઃ ।
બ્રાહ્મણાન્ વેદનિષ્ઠાંશ્ચ સમાનાય્ય પુપૂજ હ ॥ ૨૯॥

તૈરહં સિઞ્ચયામાસાસુરાણાં રાજ્યકર્મણિ ।
યથાશાસ્ત્રવિધાનેન દૈત્યાધીશં ચકાર હ ॥ ૩૦॥

પ્રધાનાસ્તસ્ય પઞ્ચાઽસન્ સુદૃઢાસ્તેજસા યુતાઃ ।
શઙ્ખો વેદઘ્નકઃ કાલઃ પૈશુનોઽધર્મધારકઃ ॥ ૩૧॥

નગરં નિર્મમે સોઽપિ વિષયપ્રિયનામકમ્ ।
અહમાસુરકસ્તત્ર રાજ્યં ચકાર હર્ષતઃ ॥ ૩૨॥

સમાયાતા નિવાસાર્થં જના વર્ણાશ્રમાન્વિતાઃ ।
અસુરા વિવિધાશ્ચૈવ સુખં લેભુઃ સમાસ્થિતાઃ ॥ ૩૩॥

પ્રમાદાસુરપુત્રીં વૈ મમતાં રૂપશાલિનીમ્ ।
તસ્મૈ દદૌ પ્રપાદશ્ચ યૌવનસ્થાં મહાત્મને ॥ ૩૪॥

મમતાસંયુતો રેમે દૈત્યેન્દ્રોહં પ્રહર્ષિતઃ ।
મોહિતો માયયા તસ્યા મમતાયા વશે સ્થિતઃ ॥ ૩૫॥

તસ્યાં પુત્રૌ મહાવીર્યૌ જનયામાસ દૈત્યપઃ ।
ગર્વશ્રેષ્ઠૌ તયોર્નામ ચક્રુઃ સર્વે દ્વિજાતયઃ ॥ ૩૬॥

એવં બહૌ ગતે કાલે તમુવાચ પ્રમાદકઃ ।
કિં સ્થિતોઽસિ મહાવીર જય દેવાદિકાન્ પ્રભો ॥ ૩૭॥

વરદાનબલેન ત્વં નિર્ભયોઽસિ ન સંશયઃ ।
વરાણાં સફલં સર્વં કુરુ ભોગપરં મહઃ ॥ ૩૮॥

તથેતિ શ્વશુરં સોઽપિ જગાદાઽહં પ્રતાપવાન્ ।
સમાનાય્ય કવિં તત્ર પૂજયામાસ દૈત્યપૈઃ ॥ ૩૯॥

તસ્યાઽજ્ઞાં ગૃહ્ય દૈત્યેશઃ પરાન્ દૈત્યાન્ સમાહ્વયત્ ।
તૈઃ સંયુતઃ સ શુક્રેણ પ્રધાનૈઃ શુશુભેઽસુરઃ ॥ ૪૦॥

દિગ્જયાર્થમહં તત્ર સર્વાનાજ્ઞાપયત્ પ્રભુઃ ।

સન્નદ્ધાસ્તં સમાજગ્મુર્દૈત્યા પરમદારુણાઃ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહમાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૮.૨
(Page ખં. ૮ અ. ૩ પાન ૫)

## ૮.૩ અહમસુરબ્રહ્માણ્ડજયો નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
રથારૂઢઃ સ્વયં તત્રાહં નિર્જગામ દૈત્યપૈઃ ।
પુત્રૌ તથા પ્રધાનાશ્ચ સન્નદ્ધા અસુરા યયુઃ ॥ ૧॥

નાના વર્ણા મહાક્રૂરાઃ કાલસ્ય ભયદાયકાઃ ।
નાના વાહનગાઃ સર્વે તમનુ પ્રયયુઃ કિલ ॥ ૨॥

ચતુરઙ્ગચમૂમધ્યે શુશુભે દૈત્યનાયકઃ ।
અપારસેનયા યુક્તઃ પૃથ્વીં જેતું મનોદધે ॥ ૩॥

શઙ્ખાદયો મહાવીરા નૃપાન્ જગ્મુઃ સુદારુણાઃ ।
જિત્વા રાજકુલં સર્વં સમાજગ્મુર્મહાસુરમ્ ॥ ૪॥

નૃપાસ્તૈઃ કિં દ્વિજા યુદ્ધં કરિષ્યન્તિ મહાબલૈઃ ।
મૃતાઃ કેચિત્ ક્ષતાઃ કેચિત્ કેચિત્તાન્ શરણં યયુઃ ॥ ૫॥

કરદાંસ્તે નૃપાન્ કૃત્વા તેષાં રાજ્યે સ્વસેવકાન્ ।
સ્થાપયામાસુરવ્યગ્રાન્ દૈત્યેન્દ્રા હર્ષસંયુતાઃ ॥ ૬॥

સપ્તદ્વીપવતીં જિત્વા પૃથ્વીં પાતાલમાયયુઃ ।
દૈત્યેન્દ્રા નાગમુખ્યાંસ્તે જયાર્થં જયશાલિનઃ ॥ ૭॥

શેષો નાગયુતસ્તેષાં શરણં સમુપાગતઃ ।
જ્ઞાત્વા વરબલં યોગી સામ ચક્રે મહાસુરૈઃ ॥ ૮॥

વાર્ષિકં કરભારં સ સ્વીકૃત્ય સ્વસ્થલં યયૌ ।
નાગેન્દ્રૈઃ સંવૃતઃ શેષો દુઃખયુક્તેન ચેતસા ॥ ૯॥

તથાપિ દૈત્યમુખ્યાસ્તે દૈત્યં દૈત્યસમન્વિતમ્ ।
સમીપે તસ્ય સંસ્થાપ્ય યયુરહં મહાબલાઃ ॥ ૧૦॥

તતો દૈત્યેન્દ્રસંયુક્તઃ કાવ્યેનાઽહમ્પ્રતાપવાન્ ।
સ્વર્ગં યયૌ મહાતેજા વરગર્વસમન્વિતઃ ॥ ૧૧॥

દૂતં સમ્પ્રેષયામાસાહમિન્દ્રસ્યૈવ સન્નિધૌ ।
સ ગત્વા દેવરાજાય પ્રણમ્યૈતદ્વચો જગૌ ॥ ૧૨॥

તતઃ ક્રોધસમાયુક્ત ઇન્દ્રો દેવેન્દ્રમુખ્યકૈઃ ।
વિચાર્યાઙ્ગિરસં સર્વૈર્જગામ પ્રણનામ તમ્ ॥ ૧૩॥

તેનાપિ સત્કૃતઃ સોઽપિ જગાદ વચનં પરમ્ ।
સર્વેષાં દુઃખદં પૂર્ણં અસુરાણાં જયાવહમ્ ॥ ૧૪॥

ઇન્દ્ર ઉવાચ ।
અહં વરસમાયુક્તઃ સમાયાતો મહાબલઃ ।
દૂતેન નો વદત્યદ્ય શરણં યાહિ દેવપૈઃ ॥ ૧૫॥

અતઃ સુરૈઃ સમાયુક્તો ભવન્તં સર્વવેદિનમ્ ।
સમાયાતો વદ સ્વામિન્ ત્વદાજ્ઞાવશગા વયમ્ ॥ ૧૬॥

ગુરુરુવાચ ।
ગણેશવરદાનેન મત્તોઽસૌ નાત્ર સંશયઃ ।
જેષ્યતે સકલં તસ્માચ્છરણં નૈવ શોભનમ્ ॥ ૧૭॥

અતો વયં વિધાતારં વ્રજામહે ત્વરાન્વિતાઃ ।
સ શ્રેષ્ઠઃ સર્વભાવેન કરિષ્યતિ હિતં ચ નઃ ॥ ૧૮॥

તતઃ સર્વે વિધાતારં જગ્મુર્દેવાઃ સવાસવાઃ ।
પ્રણમ્ય તં જગુઃ સર્વે વૃત્તાન્તં દૈત્યસમ્ભવમ્ ॥ ૧૯॥

શ્રુત્વા ખેદયુતો બ્રહ્મા ગૃહ્ય તાન્ શઙ્કરં યયૌ ।
તં પ્રણમ્ય જગૌ સર્વં સ દેવો વૃત્તમુલ્બણમ્ ॥ ૨૦॥

જગામ સોઽપિ નિઃશ્વસ્ય તૈઃ સાર્ધં વિષ્ણુમાદરાત્ ।
પ્રણમ્ય કથયામાસ વૃત્તાન્તં દુઃખદાયકમ્ ॥ ૨૧॥

શ્રુત્વા ક્રોધયુતો વિષ્ણુઃ સમાશ્વાસ્ય મહેશ્વરમ્ ।
સદેવં તં જગાદાઽસૌ પરાક્રમયુતં વચઃ ॥ ૨૨॥

શ્રીવિષ્ણુરુવાચ ।
હનિષ્યામિ મહાદૈત્યમહં ચાસુરસંયુતમ્ ।

માયાયુક્તત્વમેવં યન્ મમ તન્ન પ્રબાધતે ॥ ૨૩॥

એવમુક્ત્વા મહાદેવં તત્રૈવાસંસ્થિતોઽભવત્ ।
દેવૈઃ સહ મહાભાગઃ પ્રતીક્ષન્ દૈત્યપૌરુષમ્ ॥ ૨૪॥

અહઙ્કારાસુરસ્તત્ર જ્ઞાત્વા વૃત્તાન્તમાદરાત્ ।
પ્રવિવેશામરાવત્યાં દૈત્યેન્દ્રૈર્હર્ષસંયુતઃ ॥ ૨૫॥

ઇન્દ્રાસનસમારૂઢઃ સેવ્યમાનોઽપ્સરોગણૈઃ ।
(Page ખં. ૮ અ. ૩ પાન ૬)
ગન્ધર્વૈર્ગીયમાનઃ સ શુશુભે પરમશ્રિયા ॥ ૨૬॥

તતો દેવપદેષુ સંસ્થાપયામાસ ચાસુરાન્ ।
સ્વર્ગભોગં ચકારૈવં દૈત્યેન્દ્રૈઃ શ્વશુરેણ ચ ॥ ૨૭॥

તતઃ સ દૈત્યસઙ્ઘૈસ્તૈઃ સન્નદ્ધઃ પ્રયયૌ દ્વિજાઃ ।
બ્રહ્મલોકં મહોગ્રસ્તં વિધિહીનં દદર્શ હ ॥ ૨૮॥

વિવેશ હર્ષયુક્તસ્તન્નગરં દૈત્યસંયુતઃ ।
બ્રહ્માસનસમાસીનો બુભુજે વિવિધાન્ પરાન્ ॥ ૨૯॥

તતઃ સ દૈત્યપૈઃ સર્વં જ્ઞાત્વા વૃત્તાન્તમઞ્જસા ।
કૈલાસં ભાનુલોકં તુ શક્તિલોકં યયૌ ક્રમાત્ ॥ ૩૦॥

તત્ર વિલાસસંયુક્તો બુભુજે વિવિધાન્ પરાન્ ।
વિકુણ્ઠ વિજયાર્થં સ પ્રયયૌ દૈત્યપૈર્વૃતઃ ॥ ૩૧॥

દૂતં સમ્પ્રેષયામાસ કાલં સર્વભયઙ્કરમ્ ।
સ ગત્વા કેશવં નત્વા જગૌ વૈ વાક્યમુલ્બણમ્ ॥ ૩૨॥

કાલ ઉવાચ ।
અહં ત્વસુરસંયુક્ત આયયૌ સ મહાબલઃ ।
તેનાઽહં સામભાવાર્થં પ્રેષિતસ્તે પ્રસન્નિધૌ ॥ ૩૩॥

ત્યક્ત્વા વિકુણ્ઠં દેવેશૈર્ગચ્છ ત્વં યત્ર તે રુચિઃ ।
નારાયણ ન હન્મિ ત્વાં નોચેદ્યુદ્ધોદ્યતો ભવ ॥ ૩૪॥

કાલસ્ય વચનં શ્રુત્વા કેશવઃ ક્રોધસંયુતઃ ।
જગાદ તં મહાદૈત્યં દહન્નિવ પ્રધર્ષયન્ ॥ ૩૫॥

શ્રીવિષ્ણુરુવાચ ।

કિં માં પાપસ્વરૂપસ્ત્વં વદસિ મન્દવિક્રમ ।
હનિષ્યામ્યહમદ્યૈવ દૈત્યયુક્તં મહાસુરમ્ ॥ ૩૬॥

ગચ્છ દૂત સ્વભાવસ્થં ન હન્મિ ત્વાં ખલાધમ ।
સ્વપદં ત્યજ્ય દૈત્યેશાધીનોઽહં કિં ભવામિ તુ ॥ ૩૭॥

તતોઽહઙ્કારકં ગત્વા કાલાસુરઃ પ્રતાપવાન્ ।
વૃત્તાન્તં કથયામાસ દૈત્યેન્દ્રૈઃ સંયુતં પરમ્ ॥ ૩૮॥

શ્રુત્વા દૈત્યગણાઃ સર્વે ક્રોધયુક્તા બભૂવિરે ।
અહઙ્કારાસુરેણૈવ યુક્તા યુદ્ધોદ્યતા બભુઃ ॥ ૩૯॥

તાન્નિવાર્ય મહાબાહુરહં ક્રોધસમન્વિતઃ ।
જગાદ દૈત્યમુખ્યાન્ સ વાક્યં સર્વહિતાવહમ્ ॥ ૪૦॥

અહમુવાચ ।
કિમર્થં શ્રમસંયુક્તા ભવિષ્યથ મહાબલાઃ ।
અમોઘાસ્ત્ર વરૈર્યુક્તઃ કરિષ્યામ્યધુના સુખમ્ ॥ ૪૧॥

એવમુક્ત્વા તતો દૈત્યઃ સજ્જં કૃત્વા મહદ્ધનુઃ ।
મુમોચાગ્નિમયં ચાસ્ત્રં સમ્મન્ત્ર્ય ક્રોધસંયુતઃ ॥ ૪૨॥

સહસાસ્ત્રં પ્રજજ્વાલ દિશો દશ મહોજ્જ્વલમ્ ।
વિકુણ્ઠં દાહયામાસ દેવાન્ સર્વાન્ સમન્તતઃ ॥ ૪૩॥

તતઃ ક્ષોભયુતા દેવાસ્તત્ત્યજુર્વરુણાસ્ત્રકમ્ ।
તેનૈવ તન્ન શાન્તં તુ બભૂવે તેજસાન્વિતમ્ ॥ ૪૪॥

તતઃ ખેદયુતાઃ સર્વે પપલુર્ભયસંયુતાઃ ।
પીડિતા અગ્નિનાઽત્યન્તં ત્યક્ત્વા વૈકુણ્ઠમેવ ચ ॥ ૪૫॥

વરુણશ્ચ સ્વયં દૃષ્ટ્વા જગામ રણમૂર્ધનિ ।
ચન્દ્રેણ સંયુતઃ સોઽપિ જલં સૃષ્ટ્વા વ્યવસ્થિતઃ ॥ ૪૬॥

જલેન ન ચ શાન્તોઽભૂદગ્નિઃ પરમદારુણઃ ।
દાહયુક્તઃ પપાલાઽસૌ વરુણશ્ચન્દ્રસંયુતઃ ॥ ૪૭॥

તતઃ શક્તિઃ સમાયાતા મહાસ્ત્રં વરુણાત્મકમ્ ।
મોચયામાસ તસ્માત્તુ જલધારા પ્રવર્તિતા ॥ ૪૮॥

ધૃતેન સંયુતસ્તત્ર યથાગ્નિર્જલસંયુતઃ ।

જજ્વાલ માયયા તસ્યાઽહઙ્કારસ્ય વિશેષતઃ ॥ ૪૯॥

તતો દાહસમાયુક્તા શક્તિઃ પપાલ તત્ક્ષણાત્ ।
ક્રુદ્ધો ભાનુઃ સ્વયં તત્રાઽજગામ ક્રોધસંયુતઃ ॥ ૫૦॥

સોઽપિ સ્વવીર્યસંયુક્તં વરુણાસ્ત્રં જહૌ મૃધે ।
પૂર્વવદ્દાહસંયુક્તઃ પપાલ ચ દિવાકરઃ ॥ ૫૧॥

(Page ખં. ૮ અ. ૩ પાન ૭)
તતઃ શિવઃ સ્વયં તદ્વદ્યયૌ ક્રોધસમન્વિતઃ ।
હતોદ્યમઃ પપાલાઽસૌ દાહયુક્તઃ સ્વભાવતઃ ॥ ૫૨॥

તતોઽતિખેદસંયુક્તો વિષ્ણુઃ સ્વયમુપાગતઃ ।
તત્યાજ વારુણં શસ્ત્રં સ્વસત્તાસંયુતં પરમ્ ॥ ૫૩॥

તથાપિ ન સ શાન્તોઽભૂદગ્નિઃ પરમદારુણઃ ।
જજ્વાલાતીવ સર્વત્ર દાહયામાસ દેવપાન્ ॥ ૫૪॥

તતોઽતિદાહસંયુક્તઃ પપાલ ચ જનાર્દનઃ ।
વિષ્ણુના સંયુતાઃ સર્વે દેવેશાઃ પપલુર્ભયાત્ ॥ ૫૫॥

ગત્વા ગિરિગુહાસંસ્થા બભૂવુર્ભયસઙ્કુલાઃ ।
કન્દાદિભક્ષયન્તસ્તે દિવસાનતિચક્રમુઃ ॥ ૫૬॥

જ્ઞાત્વા વૃત્તાન્તમેવાહં સમાહૃત્ય સ્વશસ્ત્રકમ્ ।
આગ્નેયમગમદ્દૈત્યૈર્વિકુણ્ઠં હર્ષસંયુતઃ ॥ ૫૭॥

તત્ર સ્થિત્વાભિમાની સ પરાં મેને કૃતાર્થતામ્ ।
ન મત્તઃ શ્રેષ્ઠ ઇત્યેવ ગર્વયુક્તો બભૂવ હ ॥ ૫૮॥

તતો ગર્વં શિવસ્યૈવ તથા સ્થાપ્ય પદેઽસુરઃ ।
શ્રેષ્ઠં વિકુણ્ઠનાથં ચ સ ચક્રે પુત્રમુત્તમમ્ ॥ ૫૯॥

પિશુનં શક્તિલોકસ્ય વેદઘ્નં સર્વલોપકમ્ ।
પ્રમાદં બ્રહ્મણો નાથં ચકાર મદસંયુતઃ ॥ ૬૦॥

શઙ્ખમિન્દ્રપદસ્યૈવ નાથં ચક્રે મહાસુરઃ ।
કાલં યમસ્ય લોકસ્ય કમલં વરુણસ્ય ચ ॥ ૬૧॥

કુબેરસ્ય પદે સ્થાપ્યાઽધર્મધારકમાદરાત્ ।
તતઃ સ્વનગરં સર્વૈઃ સમાયયૌ મહાબલઃ ॥ ૬૨॥

તત્રસ્થઃ પ્રશશાસાઽસૌ બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ।
અહં મેને ન કિઞ્ચિદ્વૈ સમં ભાગ્યેન તેજસા ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહમસુરબ્રહ્માણ્ડજયો નામ તૃતીયોઽધ્યાયઃ ॥ ૮.૩

## ૮.૪ દેવમુનિવરપ્રદાનં નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
દૈત્યોઽહઙ્કારકોઽત્યન્તં પરસ્ત્રીલાલસસ્તતઃ ।
બભૂવ દૈત્યપૈઃ સર્વૈર્નાગકન્યાઃ સમાનયત્ ॥ ૧॥

દેવકન્યા નરાણાં ચ સ્ત્રિયઃ કન્યા વિશેષતઃ ।
સમાહૃત્ય બલાત્ સોઽપિ બુભુજે સર્વદૂષકઃ ॥ ૨॥

મદ્યમાંસપરોઽત્યન્તં બભૂવ દ્વિજસત્તમાઃ ।
ગણેશં ત્યજ્ય દુષ્ટાત્મા પાપકર્મપરોઽભવત્ ॥ ૩॥

એકદાઽહં સભાસંસ્થં જગાદાઽધર્મધારકઃ ।
દૈત્યેન્દ્રૈઃ પ્રેરિતઃ સર્વૈઃ કૃત્વા કરપુટં વચઃ ॥ ૪॥

અધર્મધારક ઉવાચ ।
જિતં ત્વયા મહાભાગ બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ।
જગદીશસ્ત્વમેવૈકો નાન્યઃ કશ્ચન વિદ્યતે ॥ ૫॥

દેવા વિષ્ણુમુખાઃ સર્વે ભવન્તિ વનસંસ્થિતાઃ ।
પ્રકીર્તિતાઃ શત્રવો નો વેદેષુ ચ સુરાસુરાઃ ॥ ૬॥

શસ્ત્રાદિભિશ્ચ દેવેન્દ્રા મરિષ્યન્તિ કદાપિ ન ।
અમરા વેદવાદેષુ કથિતા પશ્ય માનદ ॥ ૭॥

કર્માન્ના અમરાઃ સર્વે નષ્ટે કર્મણિ દૈત્યપ ।
મરિષ્યન્તિ ન સન્દેહઃ કર્મણઃ ખણ્ડનં કુરુ ॥ ૮॥

(Page ખં. ૮ અ. ૪ પાન ૮)
જિત્વા ત્રિલોકરાજ્યં ચ કર્તારો બહવોઽભવન્ ।

અસુરાઃ કાલયોગેન દેવેન્દ્રૈર્નિહતાઃ પુરા ॥ ૯॥

અતશ્છિદ્રં સમાલોક્ય ત્વાં હનિષ્યન્તિ દેવપાઃ ।
અહં તેષાં વિનાશાર્થં યતસ્વાસુરનાયકૈઃ ॥ ૧૦॥

અધર્મધારકસ્યૈવ વચઃ શ્રુત્વા મહાસુરાઃ ।
સાધુ સાધુ બ્રુવન્તિ સ્મ શઙ્ખાદ્યાસ્તત્ર સંસદિ ॥ ૧૧॥

તતોઽહઙ્કારકો હૃષ્ટો જગાદ વચનં હિતમ્ ।
સાધુ પ્રોક્તં ત્વયા દૈત્ય કુરુ સર્વૈઃ સમન્વિતઃ ॥ ૧૨॥

હૃષ્ટો દૈત્યસમૂહૈઃ સ યુક્તો જગામ હર્ષિતઃ ।
અધર્મધારકો ભૂમ્યાં ચકાર કર્મખણ્ડનમ્ ॥ ૧૩॥

કર્મખણ્ડનભાવેન હાહાકારરવાકુલાઃ ।
જના વર્ણાશ્રમૈર્હીનાઃ કૃતાસ્તેન દુરાત્મના ॥ ૧૪॥

દેવતાયતનાદીનિ ખણ્ડયામાસ સર્વતઃ ।
ક્ષેત્રાણિ ચ ગણેશસ્ય મૂર્તીઃ સર્વાસ્તથા દ્વિજાઃ ॥ ૧૫॥

સર્વત્રાઽહમ્પ્રતિમાશ્ચ સ્થાપિતા ભૂમિમણ્ડલે ।
પૂજકા રાક્ષસાસ્તત્ર કૃતાસ્તેન સુપાપિના ॥ ૧૬॥

ગૃહે ગૃહેઽભિમાનસ્ય પ્રતિમા માનવૈઃ કિલ ।
પૂજ્યાઃ કૃતા દ્વિજાસ્તેનાઽઽસુરં કર્મ પ્રવર્તિતમ્ ॥ ૧૭॥

કૃત્વાઽધર્મધરઃ કાર્યં પ્રયયૌ તં સુહર્ષિતઃ ।
તેનાતિપૂજિતઃ સોઽપિ પરાં મેને કૃતાર્થતામ્ ॥ ૧૮॥

એવં કર્મણિ નષ્ટે તુ વર્ણસઙ્કરરૂપિણઃ ।
જના જાતાસ્તતો દેવા દુઃખયુક્તા બભૂવિરે ॥ ૧૯॥

મુનિભિઃ સહિતાઃ સર્વે દેવાશ્ચોપોષણાન્વિતાઃ ।
વિચારં ચક્રુરે તસ્ય નાશાર્થં દૈત્યપસ્ય તે ॥ ૨૦॥

તતો બ્રહ્મા મહેશાદ્યાનુવાચ ખેદસંયુતઃ ।
માયાયુક્તા વયં સર્વે જિતાસ્તેન દુરાત્મના ॥ ૨૧॥

માયા નાનાવિધા વિપ્ર વેદેષ્વત્ર ન સંશયઃ ।
તયા હીનો ગણેશાનો નાન્યઃ કશ્ચન વિદ્યતે ॥ ૨૨॥

પઞ્ચચિત્તમયી બુદ્ધિઃ પઞ્ચભ્રાન્તિકરી તથા ।
સિદ્ધિસ્તયોઃ પતિઃ સોઽપિ માયિકો ગણનાયકઃ ॥ ૨૩॥

સિદ્ધિર્બુદ્ધિઃ પરા માયા ન તયોર્વિદ્યતે પરા ।
અતો વિઘ્નેશ્વરો દૈત્યં હનિષ્યતિ ન સંશયઃ ॥ ૨૪॥

ગણેશવરદાનેન મત્તોઽસૌ દૈત્યનાયકઃ ।
વિસ્મૃતો ગણનાથં તં મન્ત્રં ત્યક્ત્વા સ્થિતોઽભવત્ ॥ ૨૫॥

ગણેશક્ષેત્રકાણ્યેવ ખણ્ડયામાસ દુર્મતિઃ ।
ગણેશપૂજનં સર્વં કર્મસ્વાદૌ વિશેષતઃ ॥ ૨૬॥

અતો વિઘ્નસમાયુક્તં જાતં તં દેવસત્તમાઃ ।
અસ્માભિઃ પૂજિતો ઢુણ્ઢિર્હનિષ્યતિ મહાસુરમ્ ॥ ૨૭॥

અધુનૈકાક્ષરં મન્ત્રં જપ્ત્વા ધ્યાત્વા ગજાનનમ્ ।
પૂજયિત્વા તપોયુક્તાસ્તોષયામો વિશેષતઃ ॥ ૨૮॥

શ્રીશિવ ઉવાચ ।
બ્રહ્મણો વચનં શ્રુત્વા દેવા મુનિસમન્વિતાઃ ।
સાધુ સાધુ બ્રુવન્તિ સ્મ તથા ચક્રુઃ સહેશ્વરાઃ ॥ ૨૯॥

નિરાહારસમાયુક્તા એકાક્ષરવિધાનતઃ ।
તોષયામાસુરત્યન્તં ભક્તિયુક્તા ગણેશ્વરમ્ ॥ ૩૦॥

એવં વર્ષશતે પૂર્ણે પ્રસન્નો ગણનાયકઃ ।
યયૌ તાન્ દેવમુખ્યાંશ્ચ વરદો મુનિસત્તમાન્ ॥ ૩૧॥

મૂષકોપરિ સંસ્થં તે દદૃશુર્દ્વિરદાનનમ્ ।
પ્રણેમુર્હર્ષસંયુક્તાઃ પૂજયામાસુરાદરાત્ ॥ ૩૨॥

પુનઃ પ્રણમ્ય વિઘ્નેશં દેવા મુનિસમન્વિતાઃ ।
તુષ્ટુવુર્ગણનાથં તે ધૂમ્રવર્ણં પ્રહર્ષિતાઃ ॥ ૩૩॥

દેવર્ષય ઊચુઃ ।
ધૂમ્રવર્ણાય સર્વેભ્યઃ સર્વદાય કૃપાલવે ।
ગણેશાય પરેશાય પરાત્પરાય તે નમઃ ॥ ૩૪॥

(Page ખં. ૮ અ. ૪ પાન ૯)
લમ્બોદરાય વિઘ્નાનાં પતયે તે નમો નમઃ ॥ ૩૪॥

વિઘ્નકર્ત્રે ચ તદ્ધર્ત્રે હેરમ્બાય નમો નમઃ ॥ ૩૫॥

અનાદયે વિશેષેણ જ્યેષ્ઠાય સર્વપૂજિત ।
મનોવાણીવિહીનાય મનોવાણીમયાય તે ॥ ૩૬॥

નમસ્તે બ્રહ્મરૂપાય બ્રહ્મણે બ્રહ્મદાયિને ।
બ્રહ્મણાં પતયે તુભ્યં મન્ત્રનાથાય તે નમઃ ॥ ૩૭॥

મહોરૂપાય દેવાય દેવદેવેશરૂપિણે ।
દેવેભ્યો વરદાત્રે તે મહોદર નમો નમઃ ॥ ૩૮॥

આદિપૂજ્યાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
સર્વરૂપાય સર્વાત્મન્ કર્મરૂપાય તે નમઃ ॥ ૩૯॥

શૂર્પકર્ણાય શૂરાય વીરાય પરમાત્મને ।
ચતુર્ભુજાય ધૂમ્રાય ગુણેશાય નમો નમઃ ॥ ૪૦॥

કર્ત્રે હર્ત્રે ચ ભર્ત્રે તે પરજ્ઞાનસ્વરૂપિણે ।
સ્વાધીનાય મહામોહદાત્રે હર્ત્રે નમો નમઃ ॥ ૪૧॥

યત્ર વેદાદયઃ સ્વામિન્ શાન્તિં પ્રાપ્તાશ્ચ યોગિનઃ ।
ગણેશ તત્ર કે નાથ વયં તે સ્તવને પ્રભો ॥ ૪૨॥

વર્ણા ધૂમ્રાયિતા યત્રાવ્યક્તરૂપે પૂરા ત્વયિ ।
ધૂમ્રવર્ણઃ સમાખ્યાતો વેદેષુ વેદવાદિભિઃ ॥ ૪૩॥

ધન્યા વયં મહાભાગ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
અવ્યક્તો વ્યક્તતાં પ્રાપ્તો ભક્તવાત્સલ્યકારણાત્ ॥ ૪૪॥

એવમુક્ત્વા પ્રણેમુસ્તં ધૂમ્રવર્ણં સુરર્ષયઃ ।
ઉત્થાપ્ય ધૂમ્રવર્ણસ્તાન્ જગાદ મેઘનિઃસ્વનઃ ॥ ૪૫॥

ધૂમ્રવર્ણ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ મહાભાગાઃ પઠેત શ‍ૃણ્વતે પરમ્ ॥ ૪૬॥

પુત્રપૌત્રાદિકં ધાન્યં ધનં લભેન્નરસ્તથા ।
યદ્યદિચ્છતિ તત્તત્તુ સફલં સમ્ભવિષ્યતિ ॥ ૪૭॥

વરાન્ વૃણુત દેવેશા મુનયો મનસીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણ ભવતાં પરાન્ ॥ ૪૮॥

ગણેશવચનં શ્રુત્વા દેવર્ષયઃ પ્રણમ્ય તમ્ ।
જગુઃ પ્રરુષ્ટભાવેન દેવદેવેશમાદરાત્ ॥ ૪૯॥

યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદાહઙ્કારકં દૈત્યં જહિ સર્વજ્ઞ તે નમઃ ॥ ૫૦॥

સર્વેભ્યો દુઃખદાતા સ કર્મખણ્ડનકારકઃ ।
સ મૃતશ્ચેદ્ગણાધીશ ભવિષ્યતિ તદા સુખમ્ ॥ ૫૧॥

માયાયુક્તવિહીનસ્ત્વં તવ હસ્તાન્ મહાસુરઃ ।
મરિષ્યતિ ન સન્દેહસ્તસ્માત્તં જહિ માનદ ॥ ૫૨॥

અસ્મૈ ત્વયાઽભયં દત્તં તેન સર્વે પરાજિતાઃ ।
વયં તે શરણં પ્રાપ્તા રક્ષ રક્ષ મહાપ્રભો ॥ ૫૩॥

તવ પાદે દૃઢાં ભક્તિં દેહિ નોઽવ્યભિચારિણીમ્ ।
તયા વિઘ્નવિહીનાસ્તે પદં પ્રાપ્સ્યામહે વયમ્ ॥ ૫૪॥

એવમુક્ત્વા ગણેશાનં પ્રણેમુસ્તે સુરર્ષયઃ ।
તથેતિ તાનથોક્ત્વાઽસાવન્તર્ધાનં ચકાર હ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે દેવમુનિવરપ્રદાનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૮.૪
(Page ખં. ૮ અ. ૫ પાન ૧૦)

## ૮.૫ અહઙ્કારપરાજયો નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
તતો દેવેન્દ્રમુખ્યાશ્ચ દેવા મુનિસમન્વિતાઃ ।
હર્ષયુક્તા વિશેષેણ મેનિરે ચાસુરં હતમ્ ॥ ૧॥

કાલભાવં પ્રતીક્ષન્તઃ સ્થિતાસ્તત્રૈવ વિઘ્નપમ્ ।
અભજંસ્તે મુદા યુક્તા ગાણપત્યપ્રિયાત્મકાઃ ॥ ૨॥

ધૂમ્રવર્ણઃ સ્વયં સાક્ષાદ્રાત્રૌ સ્વપ્ને દ્વિજોત્તમાઃ ।
જગામ દૈત્યનાથસ્ય ભયદઃ સર્વભાવતઃ ॥ ૩॥

સ શોકસંયુતઃ પ્રાતઃ સમુત્થાય મહાસુરાન્ ।
સમાનાય્ય સ્વયં સ્વપ્નં કથયામાસ વિસ્તરાત્ ॥ ૪॥

અહમુવાચ ।
શઙ્ખમુખ્યાઃ શ‍ૃણુત યત્ સ્વપ્ને દૃષ્ટં ભયઙ્કરમ્ ।
ધૂમ્રવર્ણો ગણેશાનઃ ક્રોધયુક્તો બભૂવ હ ॥ ૫॥

તસ્ય ક્રોધસમુત્પન્નોઽગ્નિઃ સર્વં નગરં ચ મે ।
દાહયામાસ શસ્ત્રાણ્યસ્ત્રાણિ કુણ્ઠાનિ ચાઽભવન્ ॥ ૬॥

પરાક્રમવિહીનોઽહં કૃતસ્તેન મહાત્મના ।
દેવાઃ સ્વસ્થાનગાઃ સર્વે કૃતા મુનિગણૈઃ સહ ॥ ૭॥

અતઃ સ્વલ્પેન કાલેન ભવિષ્યત્યશુભં ધ્રુવમ્ ।
તદર્થં યત્નસંયુક્તા ભવધ્વં દૈત્યનાયકાઃ ॥ ૮॥

અભિમાનવચઃ શ્રુત્વા તં પુનર્દૈત્યનાયકાઃ ।
જગુઃ ખેદસમાયુક્તા વચનં હિતકારકમ્ ॥ ૯॥

દૈત્યેન્દ્રા ઊચુઃ ।
મા કુરુષ્વ વૃથા ચિન્તામશુભં તે કથં ભવેત્ ।
વરદાનપ્રભાવેણ નિર્ભયોઽસ્યસુરેશ્વર ॥ ૧૦॥

સ્વપ્નઃ સદા જનાનાં તુ ભવત્યત્ર ન સંશયઃ ।
જાગૃતૌ નશ્વરઃ સોઽપિ તત્ર કિં દુઃખદં ભવેત્ ॥ ૧૧॥

સ્વપ્ને ધનાદિકં લબ્ધ્વા મરણાદિકમેવ વા ।
જાગર્તિ ચેત્ સ્વયં જન્તુર્ન કિઞ્ચિત્ પશ્યતીત્યહો ॥ ૧૨॥

એવં હાસ્યાદિકં કૃત્વા સમાશ્વાસ્યાસુરોત્તમમ્ ।
અસુરાઃ સ્વગૃહં ગત્વા શૌચાદિકં પ્રચક્રિરે ॥ ૧૩॥

અથ શ‍ૃણુત વિપ્રેન્દ્રાશ્ચરિતં વિઘ્નપસ્ય ચ ।
અકસ્માત્ ધૂમ્રવર્ણઃ સ યયૌ તત્ર મહાબલઃ ॥ ૧૪॥

પઞ્ચયોજનદૂરે સ નગરાદ્દૈત્યપસ્ય ચ ।
સંસ્થિતસ્તત્ર વિપ્રેન્દ્રો નારદઃ સહસાઽઽગતઃ ॥ ૧૫॥

દૃષ્ટ્વા ગણેશ્વરં દેવં તમાગત્ય પ્રણમ્ય સઃ ।
ગાનં ચકાર હર્ષેણ ભક્ત્યા સાશ્રુપ્રલોચનઃ ॥ ૧૬॥

તમુવાચ ગણાધીશો ગચ્છ ત્વં દૈત્યમન્દિરમ્ ।
અહઙ્કારં વદસ્વર્ષે વાક્યં સામકરં મહત્ ॥ ૧૭॥

દેવાઃ સ્વસ્થાનગાઃ સન્તુ જનાઃ સ્વાચારસંયુતાઃ ।
નાગાઃ સ્વરાજ્યકર્તારો ભવન્તુ મત્પ્રસાદતઃ ॥ ૧૮॥

રાજ્યં કુરુ મહાદૈત્યૈર્નગરસ્થો મહાસુર ।
નોચેદ્યુદ્ધેન જેષ્યામિ કરિષ્યામિ જગદ્ધિતમ્ ॥ ૧૯॥

તથેતિ ગણનાથં સ જગાદ નારદો મુનિઃ ।
અહઙ્કારાસુરં ગત્વા કથયામાસ તદ્વચઃ ॥ ૨૦॥

સ શ્રુત્વા ક્રોધસંયુક્તો બભૂવે તં જગાદ હ ।
ગચ્છ વિઘ્નેશ્વરં વિપ્ર વદ મે વચનં મહત્ ॥ ૨૧॥

સદેવં ધૂમ્રવર્ણં ચ હનિષ્યામિ ન સંશયઃ ।
તદાજ્ઞાવશગો નાહં ભવિષ્યામિ કદાચન ॥ ૨૨॥

એવમૂચે તતો વિપ્રં નારદં દૈત્યનાયકઃ ।
નારદો ગણનાથં ચ યયૌ જગાદ તદ્વચઃ ॥ ૨૩॥

નારદસ્ય વચઃ શ્રુત્વા ક્રોધયુક્તો ગજાનનઃ ।
અહં હન્તું મનશ્ચક્રે શસ્ત્રં દધાર વિઘ્નપઃ ॥ ૨૪॥

(Page  ખં. ૮ અ. ૫ પાન ૧૧)
અથ નારદવિપ્રર્ષિસ્તં પ્રણમ્ય યયૌ સુરાન્ ।
જગાદ સકલં તેભ્યો વૃત્તાન્તં હર્ષસંયુતઃ ॥ ૨૫॥

દેવાસ્તં નમ્ય સર્વે તે ધૂમ્રવર્ણં સમાયયુઃ ।
મુનિભિઃ શસ્ત્રસંયુક્તાઃ સ્તુત્વા તં તે જગુર્વચઃ ॥ ૨૬॥

આજ્ઞાં કુરુ મહાભાગ ધૂમ્રવર્ણ નમોઽસ્તુ તે ।
દૈત્યૈર્યોદ્ધું ચ દેવેશાંસ્ત્વદ્દાસાંસ્તે વશે સ્થિતાન્ ॥ ૨૭॥

તેષાં વચનમાકર્ણ્ય ધૂમ્રવર્ણઃ પ્રતાપવાન્ ।
ઉવાચ તાન્ સ્વભક્તાંશ્ચ ભક્તેશો ભક્તવત્સલઃ ॥ ૨૮॥

ધૂમ્રવર્ણ ઉવાચ ।
તિષ્ઠધ્વં દેવદેવેશાઃ પશ્યધ્વં કૌતુકં મહત્ ।
હનિષ્યામિ મહાદૈત્યં મચ્છાનસપરાઙ્મુખમ્ ॥ ૨૯॥

એવમુક્ત્વા ગણાધીશો મુમોચ પાશમુલ્બણમ્ ।
સ્વશસ્ત્રં તત્ સમાગત્યાનન્તરૂપં બભૂવ હ ॥ ૩૦॥

યત્ર તત્રાસુરાન્ ધૃત્વા ક્ષણાત્ કણ્ઠે પપાત તત્ ।
મૃતા દૈત્યાઃ પુરપ્રાન્તસંસ્થાઃ પાશબલાર્દિતાઃ ॥ ૩૧॥

હાહાકારશ્ચ સર્વત્ર બભૂવ નગરે તદા ।
દૈત્યા ગત્વા મહાદૈત્યં કથયામાસુરુલ્બણમ્ ॥ ૩૨॥

કિં સ્થિતોઽસિ મહારાજ મૃતા દૈત્યાઃ સમન્તતઃ ।
પાશૈઃ સર્વત્ર સંસ્થૈશ્ચ ધૂમ્રવર્ણસ્ય માનદ ॥ ૩૩॥

તેષાં વચનમાકર્ણ્ય દુઃખયુક્તો મહાસુરઃ ।
જગાદ સચિવાદીંશ્ચ વચનં ભયસઙ્કુલઃ ॥ ૩૪॥

અહમુવાચ ।
અહો કાલમુખા દૈત્યાઃ સ્વપ્નં સત્યં બભૂવ હ ।
કિં ભવિષ્યતિ દૈત્યેશા વિપરીતં તુ દૃશ્યતે ॥ ૩૫॥

ઇતિ તસ્ય વચઃ શ્રુત્વા પુત્રૌ તાતં મહાત્મનઃ ।
ઊચતુસ્તં ભયોદ્વિગ્નં ગર્વશ્રેષ્ઠૌ મહાસુરૌ ॥ ૩૬॥

ગર્વશ્રેષ્ઠાવૂચતુઃ ।
કિં શોચસિ મહાભાગ ભયં તે ન ભવિષ્યતિ ।
માયાયુક્તો ધૂમ્રવર્ણઃ કિં કરિષ્યતિ તેઽપ્રિયમ્ ॥ ૩૭॥

દેહધારી સમાયાતો દેવપક્ષપરાયણઃ ।
હનિષ્યાવો ન સન્દેહઃ સદેવં પશ્ય પૌરુષમ્ ॥ ૩૮॥

એવમુક્ત્વા મહાદૈત્યં ગર્વો ગર્વસમન્વિતઃ ।
શ્રેષ્ઠઃ પ્રણમ્ય દૈત્યેન્દ્રં તતો યુદ્ધાય જગ્મતુઃ ॥ ૩૯॥

પ્રધાનાદ્યૈઃ સમાયુક્તૌ શસ્ત્રવૃષ્ટિં પ્રચક્રતુઃ ।
પાશસ્ય તેજસા તત્ર દગ્ધાસ્તે તુ સમન્તતઃ ॥ ૪૦॥

તતો ભયયુતાઃ સર્વે પ્રધાનાશ્ચ બભૂવિરે ।
પાશતેજઃપ્રદગ્ધાસ્તે પ્રપેલુઃ સર્વતોદિશમ્ ॥ ૪૧॥

તતોઽતિક્રોધસંયુક્તૌ સ્વડ્ગં ગૃહ્ય મહાસુરૌ ।
પાશાન્ વિચ્છેત્તુમાયાતૌ મહાબલપરાક્રમૌ ॥ ૪૨॥

તેજસા દગ્ધદેહૌ તૌ તથાઽપિ ખડ્ગધારયા ।
પાશં ગૃહ્ય ચકર્તું તૌ સમુદ્યુક્તૌ બભૂવતુઃ ॥ ૪૩॥

તતઃ પાશેન સમ્બદ્ધૌ રુદ્ધશ્વાસૌ મહાસુરૌ ।
ગતપ્રાણૌ ચ સઙ્ગ્રામે બભૂવતુર્મહર્ષયઃ ॥ ૪૪॥

તતો હાહારવં કૃત્વા દૈત્યાઃ સર્વે ભયાતુરાઃ ।
પ્રપેલુર્દશદિગ્દેશે ગતમાનાઃ સુવિહ્વલાઃ ॥ ૪૫॥

તતઃ કેચિત્ સમાગમ્યાહઙ્કારં તે વચઃ પરમ્ ।
જગુઃ ક્રૂરં મૃતૌ પુત્રૌ તવ દૈત્યપતે મૃધે ॥ ૪૬॥

તેષાં વચનમાકર્ણ્ય મૂર્ચ્છિતઃ સહસાઽસુરઃ ।
સાવધાનઃ કૃતઃ સર્વૈઃ શુશોચ ભયસઙ્કુલઃ ॥ ૪૭॥

ધૃત્વા ધૈર્યં તતઃ સોઽપિ યુદ્ધાર્થં સઙ્ગતોઽભવત્ ।
(Page ખં. ૮ અ. ૬ પાન ૧૨)
મુમોચાસ્ત્રાણિ સર્વાણિ છેત્તું પાશં મહોજ્જ્વલમ્ ॥ ૪૮॥

પાશસ્ય તેજસા તાનિ દગ્ધાનિ ચ સમન્તતઃ ।
તતોઽતિભયસંયુક્તો વિચારમકરોદ્ હૃદિ ॥ ૪૯॥

અમોઘાસ્ત્રમયં મે તુ વરં નિષ્ફલતાયુતમ્ ।
ચકાર પાશશ્ચાત્યન્તં ચિત્રં કિં વા ભવિષ્યતિ ॥ ૫૦॥

પલાયનપરઃ સર્વૈઃ સ્વગૃહં દૈત્યનાયકઃ ।
આગત્ય સ્વગુરું તત્ર સમાનાય્યાબ્રવીદ્વચઃ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહઙ્કારપરાજયો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૮.૫

## ૮.૬ અહઙ્કારાસુરજ્ઞાનોપદેશો નામ ષષ્ઠોઽધ્યાય

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
શુક્રં પ્રણમ્ય નીતિજ્ઞં ભયસઙ્કુલિતોઽસુરઃ ।
અહઙ્કારો જગાદેદં વચનં સ્વહિતાર્થકમ્ ॥ ૧॥

અહઙ્કાર ઉચાચ ।

સ્વામિન્ મે વરદાનં યન્નિષ્ફલં પ્રબભૂવ તત્ ।
અમોઘાસ્ત્રમયં કિં ત્વં વદ સંશયકં નુદ ॥ ૨॥

ધૂમ્રવર્ણઃ સમાયાતો દેવપક્ષપ્રવર્ધનઃ ।
માયામયઃ કથં સોઽપિ નિષ્ફલં માં ચકાર હ ॥ ૩॥

શુક્ર ઉવાચ ।
અહં ત્વં મૂર્ખભાવેન મન્યસે ધૂમ્રવર્ણકમ્ ।
માયામયં વિશેષેણ ન જાનાસિ ગજાનનમ્ ॥ ૪॥

માયાયુક્તવિહીનત્વં તત્ર નૈવ પ્રવર્તતે ।
યોગાકારં ગણેશાનં વદન્તે વેદવાદિનઃ ॥ ૫॥

હનિષ્યતિ સમાક્રુદ્ધસ્ત્વામયં ધૂમ્રવર્ણકઃ ।
અતસ્તં ત્વં ગણેશાનં શરણં યાહિ દૈત્યપ ॥ ૬॥

ધૂમ્રેણાવૃતમેવં યદ્ દૃશ્યતે ન જનૈર્યથા ।
તથા વસ્તુ ગણેશાનં ન જાનન્તિ શિવાદયઃ ॥ ૭॥

વર્ણા વેદસ્વરૂપાશ્ચ ધૂમ્રા જાતા ઇવાઽઽબભુઃ ।
અજ્ઞાનત્વાત્તતશ્ચાયમવ્યક્તો ધૂમ્રવર્ણકઃ ॥ ૮॥

સહજં બ્રહ્મ યત્ પ્રોક્તં સ્વાધીનં બ્રહ્મસુ પરમ્ ।
તસ્ય કિં વરદાનસ્યોલ્લઙ્ઘનં દુર્ઘટં ભવેત્ ॥ ૯॥

સ્વેચ્છયા વરદાનં વૈ સફલં નિષ્ફલં ભવેત્ ।
તદેવ ધૂમ્રવર્ણોઽયં સહજો નેતિ વાચકઃ ॥ ૧૦॥

અવિનાશિપદં યચ્ચ ગજાખ્યં બ્રહ્મ કથ્યતે ।
તદેવ મસ્તકં તસ્ય ગણેશસ્ય મહાત્મનઃ ॥ ૧૧॥

નાશરૂપં જગત્ સર્વં દેહસ્તસ્ય ન સંશયઃ ।
ધૂમ્રવર્ણસ્તયોર્યોગે દેહધારી બભૂવ હ ॥ ૧૨॥

પઞ્ચચિત્તમયી બુદ્ધિર્દક્ષિણાઙ્ગે વ્યવસ્થિતા ।
ચિત્તભ્રાન્તિકરી સિદ્ધિર્વામાઙ્ગે રાજતે સદા ॥ ૧૩॥

તયોઃ સ્વામી ગણેશાનો માયાભ્યાં ક્રીડતિ પ્રભુઃ ।
તં ગચ્છ શરણં તાત તદા સૌખ્યમવાપ્સ્યસિ ॥ ૧૪॥

સ્વસંવેદ્યેન યોગેન દર્શનં તસ્ય જાયતે ।

યોગિનાં ગણનાથસ્ય તેન સ્વાનન્દપાલકઃ ॥ ૧૫॥

ન તે યશો મહારાજ ભવિષ્યતિ કદાચન ।
સુરાસુરમયો ઢુણ્ઢિઃ શરણં તસ્ય ગચ્છતુ ॥ ૧૬॥

સુરાઃ સ્વર્ગેષુ તેનૈવ સ્થાપિતા માનવા ભુવિ ।
(Page ખં. ૮ અ. ૬ પાન ૧૩)
અસુરા વિવરેષ્વેવ ત્રિવિધં ધર્મસંયુતમ્ ॥ ૧૭॥

સ્વસ્વધર્મં પરિત્યજ્ય લોભયુક્તાઃ સુરાઽસુરાઃ ।
ભવન્તિ ચેત્તદાઽયં તુ તેષાં શાસ્તા ભવત્યહો ॥ ૧૮॥

દેવૈર્દૈત્યા જિતાઃ સર્વે પાતાલં ગત્ય માનદ ।
તદા ત્વાં સ વિનિર્માય દેવવિઘ્નપરોઽભવત્ ॥ ૧૯॥

ત્વમપિ ધર્મલોપેન વર્ણાશ્રમપરાઙ્મુખઃ ।
દેવનાશાર્થમત્યન્તમુદ્યુક્તોઽસિ ખલોત્તમ ॥ ૨૦॥

અતસ્ત્વાં હન્તુમેવં સ સમાયાતો ગજાનનઃ ।
સ્વધર્મસ્થસ્ય તે નાશં ન કરિષ્યતિ વિઘ્નપઃ ॥ ૨૧॥

ત્રિવિધં ત્રિવિધે ભાવે સંસ્થિતં ધર્મસંયુતમ્ ।
તદાઽયં બુદ્ધિનાથશ્ચ બુદ્ધૌ નિત્યં સ્થિતો ભવેત્ ॥ ૨૨॥

અતસ્તસ્ય ગણેશસ્ય શરણં ગચ્છ દૈત્યપ ।
બ્રહ્માકારં ચ સર્વત્ર સુરાસુરપ્રવર્તકમ્ ॥ ૨૩॥

શ્રીશિવ ઉવાચ ।
કાવ્યસ્ય વચનં શ્રુત્વા હર્ષયુક્તોઽહમાદરાત્ ।
પ્રણમ્ય તં પુનઃ પ્રાહ સંશયસ્યાપનુત્તયે ॥ ૨૪॥

અહમુવાચ ।
શરણં ધૂમ્રવર્ણસ્ય ગમિષ્યામિ ત્વદાજ્ઞયા ।
સુરાસુરમયસ્યૈવ તથાઽપિ નુદ સંશયમ્ ॥ ૨૫॥

સિદ્ધિબુદ્ધિ સમા માયા વિદ્યતે નૈવ નિશ્ચિતમ્ ।
પ્રકૃત્યા સંયુતો નિત્યં ગણેશાનઃ પ્રખેલતિ ॥ ૨૬॥

સર્વપૂજ્યશ્ચ સર્વાદૌ સમ્મતો બ્રહ્મનાયકઃ ।
શ્રીશબ્દેન સમાયુક્તઃ કથં શ્રીર્મુખ્યતાં ગતા ॥ ૨૭॥

સિદ્ધિં બુદ્ધિં પરિત્યજ્ય શ્રિયં ચૌઙ્કારકં તથા ।
વિકલ્પેન સમાગૃહ્ય તિષ્ઠતે ગણનાયકઃ ॥ ૨૮॥

અન્યે સર્વે તથા વિપ્ર પ્રકૃત્યા શ્રીસ્વરૂપયા ।
યુક્તા ભવન્તિ શાસ્ત્રેષુ કિમિદં કૌતુકં વદ ॥ ૨૯॥

અતઃ શ્રીર્યત્ સમા દેવી વિદ્યતે નૈવ નિશ્ચિતમ્ ।
ભાતિ સર્વત્ર વેદેષુ તથૌઙ્કારાત્મિકા પરા ॥ ૩૦॥

શુક્ર ઉવાચ ।
ગકારઃ સિદ્ધિરૂપશ્ચ ણકારો બુદ્ધિવાચકઃ ।
તયોઃ સ્વામી ગણેશાનો યોગાકારઃ પ્રદૃશ્યતે ॥ ૩૧॥

યથા માયાયુતં બ્રહ્મ માયાયા ભિન્નકં ન ચ ।
માયા સૈવ સદા બ્રહ્મ બ્રહ્મ માયા ન સંશયઃ ॥ ૩૨॥

તથા સિદ્ધિશ્ચ બુદ્ધિશ્ચ ગણેશો દૈત્યનાયક ।
એકરૂપો ન સન્દેહો યોગસ્તેનાયમુચ્યતે ॥ ૩૩॥

સિદ્ધિર્બુદ્ધિર્ગણેશાનો જ્ઞાનિનાં ત્રિવિધં પરમ્ ।
ભાતિ યોગમયં ચાપિ વિચારય વિચક્ષણ ॥ ૩૪॥

અતઃ સિદ્ધેશ્ચ બુદ્ધેશ્ચોપાસનં નાત્ર વિદ્યતે ।
ભિન્નં ગણપતેસ્તસ્માત્ ત્રિવિધં નાસ્તિ નિશ્ચિતમ્ ॥ ૩૫॥

ગણેશપૂજનેનૈવ ત્રિવિધં પૂજિતં ભવેત્ ।
પ્રકૃતિઃ પુરુષાકારસ્તત્ર નૈવ પ્રદૃશ્યતે ॥ ૩૬॥

વામાઙ્ગં પ્રકૃત્યાકારં દક્ષિણાઙ્ગં ચ પુમ્મયમ્ ।
સિદ્ધિં બુદ્ધિં વિજાનીહિ તયોર્યોગે ગણેશ્વરઃ ॥ ૩૭॥

સર્વેષાં વામભાગે ચ પ્રકૃતિઃ સંસ્થિતાઽભવત્ ।
ગણેશસ્યોભયાઙ્ગે તુ પ્રકૃતિઃ પરિકીર્તિતા ॥ ૩૮॥

એકરૂપધરા માયા સિદ્ધિબુદ્ધિમયી પરા ।
ભિન્નભોગાર્થમાનન્દાત્ સૃષ્ટિં કર્તું મનોદધે ॥ ૩૯॥

સિદ્ધેરઙ્ગાત્ સમુત્પન્ના શ્રીઃ સર્વશોભયા યુતા ।
બુદ્ધેરઙ્ગાત્તથૌઙ્કારપ્રકૃતિઃ પ્રબભૂવ હ ॥ ૪૦॥

તાભ્યાં તપઃ કૃતં ઘોરં સ્વસ્વજ્ઞાનપ્રસિદ્ધયે ।

યસ્મૈ કસ્મૈ નમો નિત્યં મન્ત્રં જપ્ત્વા સ્વમૂલકમ્ ॥ ૪૧॥

(Page  ખં. ૮ અ. ૬ પાન ૧૪)
તતસ્તયોર્હૃદિસ્થં યદ્બ્રહ્મ માયાપ્રચાલકમ્ ।
પ્રસન્નં જાતમત્યન્તં સ્વરૂપં સ્વમદર્શયત્ ॥ ૪૨॥

તત એકાક્ષરં મન્ત્રં ગણેશસ્ય મહાત્મનઃ ।
દૃષ્ટ્વા તાભ્યાં હૃદિસ્થં સ્વં તેજોરૂપં સુખપ્રદમ્ ॥ ૪૩॥

તતસ્તનૈવ મન્ત્રેણ તોષયામાસતુઃ પરમ્ ।
ગણેશં તે મહાભાગે હ્યાદિમાયે તપોન્વિતે ॥ ૪૪॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નો ગણનાયકઃ ।
વરાન્ દાતું સમાયાતઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૪૫॥

નરકુઞ્જરરૂપં તત્ દૃષ્ટ્વા વિસ્મિતમાનસે ।
માયે બભૂવતુસ્તત્ર વિચારં ચક્રતુર્હૃદિ ॥ ૪૬॥

ગણેશકૃપયા સદ્યો જ્ઞાતં જાતં મહાદ્ભુતમ્ ।
તપસોગ્રપ્રભાવેણ જ્ઞાતં તાભ્યાં રહસ્યકમ્ ॥ ૪૭॥

સિદ્ધિબુદ્ધિયુતં તં તે વીક્ષ્ય ચોત્થાય સત્વરમ્ ।
પ્રણેમતુર્ગણેશાનં પૂજ્ય સ્તોત્રં પ્રચક્રતુઃ ॥ ૪૮॥

શ્ર્યોઙ્કારાવૂચતુઃ ।
નમસ્તે ગણનાથાય સર્વસિદ્ધિપ્રદાયક ।
સિદ્ધિબુદ્ધિયુતાયૈવ ગણાનાં પતયે નમઃ ॥ ૪૯॥

સ્વાનન્દપતયે તુભ્યં કર્તૄણાં કર્તૃરૂપિણે ।
અનાથાય સનાથાનાં નમો નાથાય તે નમઃ ॥ ૫૦॥

પરેશાય પરેષાં ચ પાલકાય પરાત્મને ।
આત્મનામમૃતાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૫૧॥

લમ્બોદરાય દેવાય દેવદેવેશરૂપિણે ।
દેવેભ્યો દેવતાં દાત્રે ગજાનનાય તે નમઃ ॥ ૫૨॥

જ્યેષ્ઠરાજાય સર્વેષામાદિપૂજ્યાય ઢુણ્ઢયે ।
અનામનાય નિત્યાય સર્વેશાય નમો નમઃ ॥ ૫૩॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે તે બ્રહ્મણે બ્રહ્મરૂપિણે ।

બ્રહ્મણસ્પતયે તુભ્યં પૂર્ણયોગાય તે નમઃ ॥ ૫૪॥

યોગશાન્તિમયાયૈવ ચિન્તામણિસ્વરૂપિણે ।
અનન્તાયાદિરૂપાય ચાન્તઃસ્થાય નમો નમઃ ॥ ૫૫॥

કિં સ્તુવસ્ત્વાં ગણાધીશ યોગશાન્તિધરં પરમ્ ।
યત્ર વેદાદયઃ શાન્તિં પ્રાપ્તા યોગપરાયણાઃ ॥ ૫૬॥

મનોવાણીમયો નૈવ મનોવાણીવિવર્જિતઃ ।
નૈવ ત્વં તે નમો નાથ પ્રસન્નો ભવ સર્વદા ॥ ૫૭॥

એવમુક્ત્વા ગણાધીશં પ્રણેમતુર્મહાસુર ।
શ્ચૌઙ્કારૌ તૌ સમુત્થાપ્ય જગાદ ગણનાયકઃ ॥ ૫૮॥

શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂતં મહાભાગે મહામાયે હૃદીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણાહં વિશેષતઃ ॥ ૫૯॥

સ્તોત્રં ભવત્કૃતં મે વૈ સર્વસિદ્ધિપ્રદાયકમ્ ।
પઠતે શ ૃણ્વતે નિત્યં પ્રભવેદ્ભુક્તિમુક્તિદમ્ ॥ ૬૦॥

બ્રહ્મભૂયકરં પૂર્ણં શ્ચોઙ્કારયશસાન્વિતમ્ ।
મમ પ્રિયકરં પૂર્ણં ભક્તિવર્ધનકં ભવેત્ ॥ ૬૧॥

ગણેશવચનં શ્રુત્વોચતુઃશ્ચોઙ્કારકૌ પરમ્ ।
ગણેશભક્તિસંયુક્તો ભક્તેશં ભક્તવત્સલમ્ ॥ ૬૨॥

શ્ચૌઙ્કારાવૂચતુઃ ।
ત્વયિ ભક્તિં સ્થિરં દેહિ યોગશાન્તિપ્રદાયિકામ્ ।
સઙ્કલ્પસિદ્ધિસામર્થ્યં દાસ્યં તે પાદપદ્મયોઃ ॥ ૬૩॥

યથા સિદ્ધિશ્ચ બુદ્ધિશ્ચ ત્વયા સમ્માનિતે પ્રભો ।
તથાઽઽવાં તે પ્રિયે નાથ કુરુષ્વ ગણનાયક ॥ ૬૪॥

અસ્મદીયં વશે સર્વં જગદ્બ્રહ્મ કુરુ પ્રભો ।
આવાભ્યાં મોહિતં સર્વં ભવતુ ત્વત્પ્રસાદતઃ ॥ ૬૫॥

ત્વદીયભજનેનૈવ મોહો હ્યસ્મત્કૃતઃ પરઃ ।
નાશં યાતુ સદા દેવ નાન્યથા યોગકારિભિઃ ॥ ૬૬॥

શિવવિષ્ણુમુખા દેવા મોહયુક્તા ભવન્તુ ચ ।

અસ્મદર્થં સદા ભ્રાન્તા યત્નયુક્તા ભવન્તુ વૈ ॥ ૬૭॥

(Page ખં. ૮ અ. ૬ પાન ૧૫)
શ્રીગણેશ ઉવાચ ।
ભવતીભ્યાં વૃતાઃ સર્વે વરાઃ સુદુર્લભાઃ પરાઃ ।
દત્તા મયા વિશેષેણ મોહયેતમિદં જગત્ ॥ ૬૮॥

માયાભ્યાં સિદ્ધિબુદ્ધિભ્યાં રચિતં વિવિધં જગત્ ।
બ્રહ્મ નાનાવિધં દેવ્યૌ તત્રાઽહં બિમ્બિતોઽભવમ્ ॥ ૬૯॥

બિમ્બં મે મોહયુક્તં તન્નાનાભાવપરાયણમ્ ।
મમ ભક્તિસ્વભાવેન મોહહીનં ભવેત્ સદા ॥ ૭૦॥

મમ બિમ્બસ્ય ભાર્યે તુ સંશયો ન ભવિષ્યથઃ ।
તેન યુક્તે મહામાયે બન્ધમોક્ષૌ કરિષ્યથઃ ॥ ૭૧॥

સિદ્ધિબુદ્ધિયુતોઽહં તુ બ્રહ્મભૂતઃ સનાતનઃ ।
ન તત્ર યોગ્યતા દેવ્યૌ ભવત્યોર્મોહનાત્મનોઃ ॥ ૭૨॥

એવમુક્ત્વા ગણાધીશોંઽતર્ધાનં વૈ ચકાર હ ।
માયે તં મનસા ધ્યાત્વા સંસ્થિતે તત્ર દૈત્યપ ॥ ૭૩॥

તતો ગણેશબિમ્બં યત્ પતિતં તત્તયોર્હૃદિ ।
તેન યુક્તે ચતુર્ધેદં ચક્રતુર્ભેદનાત્મકે ॥ ૭૪॥

બાહ્યસૌખ્યકરી માયા ચતુર્ણાં જગતાં કિલ ।
બ્રહ્મણાં દેહરૂપા ચ શ્રીઃ સર્વત્ર પ્રકીર્તિતા ॥ ૭૫॥

ચતુર્ણાં જગતાં તદ્વદ્બ્રહ્મણાં જ્ઞાનરૂપિણી ।
ઓઙ્કારાત્મકરૂપા સા માયા સર્વત્ર સંસ્થિતા ॥ ૭૬॥

તાભ્યાં યુક્તો ગણેશાનઃ ક્રીડતે વિવિધે રતઃ ।
મોહયુક્તવિહીનત્વાન્નાનાભેદપરાયણઃ ॥ ૭૭॥

અતઃ સર્વેષુ જીવેષુ મોહિતેષુ મહાસુર ।
મોહહીનાત્મભાવેષુ શ્ર્યોઙ્કારૌ ત્વાદિસમ્મતૌ ॥ ૭૮॥

આદૌ પ્રકૃતિમુચ્ચાર્ય પશ્ચાત્ પુરુષ ઉચ્યતે ।
કૃતં વિઘ્નેશ્વરેણૈતત્ જાનીહિ દૈત્યનાયક ॥ ૭૯॥

કુત્ર શ્રીશબ્દયુક્તશ્ચ ગણેશઃ પઠ્યતે બુધૈઃ ।

તત્રોઙ્કારસમાયુક્તો માયાભ્યાં ખેલનાત્ પરઃ ॥ ૮૦॥

વામાઙ્ગે શ્રીર્ધૃતા તેન દક્ષિણાઙ્ગે મહાસુર ।
ઓઙ્કારો ગણનાથસ્ય બિમ્બેન બ્રહ્મરૂપિણા ॥ ૮૧॥

બિમ્બં સર્વત્ર ભાવેષુ તદાકારં બભૂવ હ ।
અતઃ શિવાદયઃ સર્વે જાતાઃ શ્ર્યોઙ્કારસંયુતાઃ ॥ ૮૨॥

જીવા શ્ર્યોઙ્કારસંયુક્તાઃ પઠ્યન્તે વેદવાદિભિઃ ।
આદિમાયે સમાખ્યાતે બિમ્બાધારે વિચારય ॥ ૮૩॥

અતઃ શ્ર્યોઙ્કારમોહં ત્વં ત્યક્ત્વા વિઘ્નેશ્વરં ભજ ।
સિદ્ધિબુદ્ધિયુતં તાત તેન સૌખ્યમવાપ્સ્યસિ ॥ ૮૪॥

ઇતિ તે કથિતં સર્વં ધૂમ્રવર્ણસ્ય ચેષ્ટિતમ્ ।
ગચ્છતં શરણં દૈત્ય શાન્તિદં ભુક્તિમુક્તિદમ્ ॥ ૮૫॥

ભિન્નભાવકરે માયે શ્ર્યોઙ્કારૌ પરિકીર્તિતૌ ।
બ્રહ્મભૂયમયી પ્રોક્તા સિદ્ધિર્બુદ્ધિર્વિચક્ષણ ॥ ૮૬॥

એતત્તે કથિતં સર્વં રહસ્યં સર્વસમ્મતમ્ ।
વેદગુહ્યમહઙ્કાર ગચ્છ તં સર્વસિદ્ધયે ॥ ૮૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહઙ્કારાસુરજ્ઞાનોપદેશો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૮.૬
(Page ખં. ૮ અ. ૭ પાન ૧૬)

## ૮.૭ અહઙ્કારશાન્તિરૂપવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
શુક્રસ્ય વચનં શ્રુત્વાઽહઙ્કારસ્તં પ્રણમ્ય ચ ।
જગાદ જ્ઞાનસંયુક્તઃ કૃતાઞ્જલિઃ પ્રતાપવાન્ ॥ ૧॥

અહમુવાચ ।
ત્વયાઽહં બોધિતો નાથાઽતો ગચ્છામિ ગજાનનમ્ ।
સુરાસુરમયં બ્રહ્મ સર્વશાન્તિપ્રદાયકમ્ ॥ ૨॥

એવમુક્ત્વા સ શુક્રેણ સંયુતઃ પરમાર્થવિત્ ।

શ્ચોઙ્કારાભ્યાં મનઃ કૃષ્ય યોગેશં શરણં યયૌ ॥ ૩॥

પુરપ્રાન્તે મહાપાશં દૃષ્ટ્વા નમ્ય કૃતાઞ્જલિઃ ।
તુષ્ટાવ શસ્ત્રરાજં સ ગણેશાહઙ્કૃતેર્ધરઃ ॥ ૪॥

અહમુવાચ ।
પાશાય શસ્ત્રરાજાય નમસ્તે બન્ધરૂપિણે ।
મોક્ષરૂપાય વૈ તુભ્યં ગણેશકરભૂષણ ॥ ૫॥

મોહો માયામયઃ પ્રોક્તો બન્ધદઃ સર્વજન્તવે ।
ગણેશજ્ઞાનયુક્તશ્ચેદ્ બન્ધહીનો નરો ભવેત્ ॥ ૬॥

તદેવ બન્ધરૂપાખ્યં શસ્ત્રં તસ્ય મહાત્મનઃ ।
ત્વમેવ પાશરૂપં વૈ બન્ધમોક્ષકરં મહત્ ॥ ૭॥

યે ત્વાં શરણમાપન્નાસ્તેષાં તે બન્ધજં ભયમ્ ।
નાસ્તિ શસ્ત્ર ચ માં પાહિ શરણાગતમાદરાત્ ॥ ૮॥

નમસ્તે તેજસાં નાથ દુષ્ટનાશકરાય તે ।
પાશાય પરમાસ્ત્રાય શસ્ત્રાણાં બ્રહ્મણે નમઃ ॥ ૯॥

એવં સ્તુત્વા મહાપાશં પ્રણનામ કૃતાઞ્જલિઃ ।
અહઙ્કારશ્ચ તં ત્યક્ત્વા પાશો વિઘ્નેશ્વરં યયૌ ॥ ૧૦॥

ઇદં સ્તોત્રં પઠેદ્યસ્તુ તસ્ય બન્ધો વિનશ્યતિ ।
માયાપાશમયઃ સાક્ષાદ્ગણેશે સ લભેદ્ગતિમ્ ॥ ૧૧॥

ગતં પાશં વિલોક્યૈવાહઙ્કારો ગુરુણા યુતઃ ।
ધૂમ્રવર્ણં જગામાઽસૌ તં દૃષ્ટ્વા પ્રણનામ હ ॥ ૧૨॥

પુનરુત્થાય વિઘ્નેશં પૂજયામાસ ભક્તિતઃ ।
પુનઃ પ્રણમ્ય સર્વેશં તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૧૩॥

અહમુવાચ ।
ધૂમ્રવર્ણાય વૈ તુભ્યં ગણેશાય પરાત્મને ।
અવ્યક્તાયાદિબીજાય પરેશાય નમો નમઃ ॥ ૧૪॥

લમ્બોદરાય દેવાય દૈત્યનાથાય તે નમઃ ।
હેરમ્બાય મહેશાનાં પાલકાય નમો નમઃ ॥ ૧૫॥

કર્મણે કર્મરૂપાય નાનાકર્મપ્રચારિણે ।

જ્ઞાનાય જ્ઞાનદાત્રે તે જ્ઞાનજ્ઞાનાય વૈ નમઃ ॥ ૧૬॥

ચરાય ચરરૂપાય જઙ્ગમસ્થાય તે નમઃ ।
સ્થાવરાય સદા તદ્રૂપાય તદ્રૂપધારિણે ॥ ૧૭॥

સ્થાવરજઙ્ગમાભ્યાં ચ હીનાય તે નમો નમઃ ।
યોગાય યોગનાથાય યોગિને યોગદાયિને ॥ ૧૮॥

યોગેભ્યો યોગદાત્રે તે નમશ્ચિન્તામણે નમઃ ।
શાન્તાય શાન્તચિત્તૈસ્તુ પ્રાપ્યાય શાન્તમૂર્તયે ॥ ૧૯॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મણે સિદ્ધિબુદ્ધિદ ।
સિદ્ધિનાથાય બુદ્ધીશ તયોર્યોગાય તે નમઃ ॥ ૨૦॥

મૂષકોપરિ સંસ્થાય મૂષકધ્વજધારિણે ।
ચતુર્ભુજાય સ્વાનન્દપતયે તે નમો નમઃ ॥ ૨૧॥

કિં સ્તૌમિ ત્વાં ગણાધીશ ધૂમ્રવર્ણસ્વરૂપિણમ્ ।
અવ્યક્તં વેદવાદેષુ કથિતં સતતં પ્રભો ॥ ૨૨॥

સ્વરૂપં તે કથયિતું વેદા ધૂમ્રાયિતા બભુઃ ।
યોગશાન્તિધરાસ્તે કથયિતું ધ્રુવમક્ષમાઃ ॥ ૨૩॥

અતસ્ત્વાં ધૂમ્રવર્ણાખ્યં વદન્તે વેદવાદિનઃ ।
પશ્યામિ તં ધૂમ્રવર્ણમેવાઽહં યોગિદુર્લભમ્ ॥ ૨૪॥

ધન્યોઽહં સકુલો નાથ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
એવમુક્ત્વા નનર્તાઽસૌ ભક્તિયુક્તો મહાસુરઃ ॥ ૨૫॥

નિમગ્નં તં ભક્તિરસે દૃષ્ટ્વા દેવો ગજાનનઃ ।
(Page ખં. ૮ અ. ૭ પાન ૧૭)
જગાદ તં મહાભાગં પ્રેમયુક્તં પ્રસસ્વજે ॥ ૨૬॥

ધૂમ્રવર્ણ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ દાસ્યામિ સ્તોત્રતોષિતઃ ।
અહઙ્કાર ન સન્દેહો ન ભયં તે ભવિષ્યતિ ॥ ૨૭॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
મમ ભક્તિપ્રદં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૨૮॥

શ‍ૃણુયાદ્યઃ પઠેદેતત્તસ્યાહઙ્કારજં ભયમ્ ।

ન ભવિષ્યતિ દૈત્યેશ ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૨૯॥

યદ્યદિચ્છતિ તત્તચ્ચ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મમ પ્રિયો ભવેત્ સોઽપિ સદા મોહવિવર્જિતઃ ॥ ૩૦॥

એવં ગણેશવાક્યં સ શ્રુત્વા તં હ્યબ્રવીદહમ્ ।
પ્રણિપત્ય મહાત્માનં ધૂમ્રવર્ણં મહાસુરઃ ॥ ૩૧॥

અહમુવાચ ।
યદિ મે વરદોઽસિ ત્વં ધૂમ્રવર્ણ ગજાનન ।
તદા તે પાદપદ્મે વૈ ભક્તિં દેહિ પરાં વિભો ॥ ૩૨॥

ગાણપત્યં કુરુષ્વ ત્વં માં ગણેશપરાયણમ્ ।
ગાણપત્યપ્રિયં તાત સદા સદ્ભાવભાવિકમ્ ॥ ૩૩॥

સ્થાનં દેહિ તથા વૃત્તિં યોગક્ષેમકરીં પરામ્ ।
તત્રસ્થસ્ત્વાં ભવિષ્યામિ દાસોઽહં તે ગજાનન ॥ ૩૪॥

નાન્યં યાચે કદા નાથ શ્યોઙ્કારામોહમોહિતમ્ ।
સિદ્ધિબુદ્ધિયુતં ત્વાહં ભજિષ્યામિ વિશેષતઃ ॥ ૩૫॥

બોધિતો ગુરુણાઽત્યન્તં તસ્ય વાક્યપરાયણઃ ।
યોગશાન્તિમયં રૂપં ભજિષ્યામિ મહોદર ॥ ૩૬॥

ધૂમ્રવર્ણ ઉવાચ ।
મયિ ભક્તિર્દૃઢા તેઽસ્તુ મયિ દાસ્યપરાયણઃ ।
ગાણપત્યપ્રિયો ભૂત્વા ચરિષ્યસિ ન સંશયઃ ॥ ૩૭॥

યત્રાદૌ મે મહાદૈત્ય પૂજનં નૈવ વિદ્યતે ।
તત્ર કર્મસુ તે સ્થાનં ભુઙ્ક્ષ્વ કર્મફલં મહત્ ॥ ૩૮॥

કાર્યાદૌ સ્મરણં મે ન તત્ર ત્વં સુસ્થિરો ભવ ।
આસુરેણ સ્વભાવેન ભ્રંશયસ્વ નિરન્તરમ્ ॥ ૩૯॥

સ્વપુરે ગચ્છ દૈત્યેન્દ્ર મદ્ભક્તાન્ રક્ષ સર્વદા ।
મદહઙ્કૃતિસંયુક્તાન્ કુરુ ત્વં નિત્યમાદરાત્ ॥ ૪૦॥

યત્ર મે સ્મરણં ચાદૌ પૂજનં સર્વકર્મસુ ।
તત્ર સાધુસ્વભાવેન વર્તસ્વ તદહઙ્કૃતિઃ ॥ ૪૧॥

ગણેશભક્તિસંયુક્તો મદીયાહઙ્કૃતેર્ધરઃ ।

ભવિષ્યસિ ન સન્દેહો ગચ્છ ગચ્છ મદાજ્ઞયા ॥ ૪૨॥

શ્રીશિવ ઉવાચ ।
એવમુક્ત્વા ગણાધીશસ્તમહં વિરરામ હૈ ।
પ્રણમ્ય તમહઙ્કારઃ યયૌ સ્વનગરં મુદા ॥ ૪૩॥

તાદૃશં તં પરિજ્ઞાય દૈત્યેશા દુઃખસંયુતાઃ ।
ત્યક્ત્વા પાતાલગાઃ સર્વે બભૂવુર્ભયવિહ્વલાઃ ॥ ૪૪॥

સ એવ સુખસંયુક્તોઽભજત્તં ગણનાયકમ્ ।
અનન્યમનસા ધ્યાત્વા ધૂમ્રવર્ણધરં પરમ્ ॥ ૪૫॥

યથા જગાદ વિઘ્નેશસ્તથા ચકાર ભાવતઃ ।
અહઙ્કારાસુરશ્ચૈવ શાન્તરૂપો બભૂવ હ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે અહઙ્કારશાન્તિરૂપવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૮.૭
(Page ખં. ૮ અ. ૮ પાન ૧૮)

## ૮.૮ ધૂમ્રવર્ણાવતારસમાપ્તિર્નામ અષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
શાન્તિરૂપધરં પૂર્ણં ગાણેશાહઙ્કૃતિસ્થિતમ્ ।
અહં દૃષ્ટ્વા સુરા વિપ્રા વિસ્મિતા અભવન્ દ્વિજાઃ ॥ ૧॥

તતસ્તે ધૂમ્રવર્ણં વૈ પુપૂજુર્ભક્તિસંયુતાઃ ।
પુનઃ પ્રણમ્ય તં સર્વે તુષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૨॥

દેવર્ષય ઊચુઃ ।
અજાયાથ સર્વાદિપૂજ્યાય નિત્યં નિરાલમ્બનેતિ સ્વરૂપાય ઢુણ્ઢે ।
સદાઽવ્યક્તરૂપાય સર્વાન્તગાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૩॥

સદા મોહહીનાય મોહપ્રદાય જનેભ્યઃ પ્રભો મોહહન્ત્રે નિજાનામ્ ।
મહાનન્દત્રૈવિધ્યભાવૈઃ પરેશ નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૪॥

નમઃ સિદ્ધિબુદ્ધિપ્રદાત્રે ગણેશ પુરે વાસકારિન્ સ્વસંવેદ્યનામ્નિ ।
અનાથાય નાથાય સર્વેશ્વરાણાં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૫॥

સદા સ્વેચ્છયા ખેલકારાય તુભ્યં સગૌણાય નૈર્ગુણ્યભાવાય બ્રહ્મન્ ।
મહાऽऽખુધ્વજાયાऽથ હેરમ્બકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૬॥

ગજાકારતુણ્ડાય લમ્બોદરાય ત્રિનેત્રાય શૂર્પશ્રુતિક્ષોભકારિન્ ।
મદાસક્તયોગીન્દ્ર ભૃઙ્ગાત્મકાનાં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૭॥

ચતુર્બાહવે ચૈકદન્તાય તુભ્યં વિચિત્રૈરનર્ઘૈસ્તુ સમ્ભૂષિતાય ।
અલઙ્કારકૈર્દેવદેવેશ પાત્રે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૮॥

ત્વયા સૃષ્ટમાદ્યં સમં સર્વભાવયુતં મોહદં માયિનાં નન્દનાદ્રૈ ।
તદાકારરૂપેણ તત્સ્થાય ભૂમ્ને નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૯॥

ત્વયા પ્રેરિતેનાથ તેનાऽપિ સૃષ્ટં સદાત્મસ્વરૂપં પરં જીવનં યત્ ।
અભેદાત્મકં તત્ર સંસ્થાય તુભ્યં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૦॥

તતસ્તેન સૃષ્ટં સદા ભેદકાનાં નિજં દૈવતં બ્રહ્મભાવેન તત્સ્થમ્ ।
તદાકારરૂપેણ તત્સ્થાય બ્રહ્મન્ નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૧॥

અસદ્ભાવયુક્તેન સૃષ્ટં વિદેહં પરં બ્રહ્મ સાઙ્ખ્યાત્મકં મૂલબીજમ્ ।
ત્વયા પ્રેરિતેનાત્ર વાસપ્રદાયિન્નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૨॥

સ્વતોત્થાનરૂપં વિદેહેન સૃષ્ટં ત્વદીયપ્રબોધેન વિઘ્નેશ્વરાય ।
તદાકારરૂપાય તત્રસ્થકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૩॥

તતસ્તેન તે સત્તયા સૃષ્ટમાદ્યં સદૈકસ્વરૂપં પરં સોહમેવમ્ ।
તથા ત્વં ચ તત્રૈવ સંસ્થઃ પરાત્મન્ નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૪॥

ત્વયા પ્રેરિતેનાથ તેનૈવ સૃષ્ટં ચતુર્ણાં પ્રમૂલં મહદ્બિન્દુરૂપમ્ ।
સદા સાહજેનૈવ યોગેન તત્સ્થો નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૫॥

તતો નાદરૂપં સમં યત્સુષુપ્તં પરં સૂક્ષ્મરૂપં તતઃ સ્થૂલભાવમ્ ।
ચતુર્ધા શરીરં વિનિર્માય ખેલિન્નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૬॥

નમો વિશ્વરૂપાય સર્વાકરાય હ્યનન્તાનનાદ્યૈઃ સુચિહ્નાય તુભ્યમ્ ।
ચરૈઃ સ્થાવરૈર્ભોગભોગિન્નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૭॥

ચરાયાऽથ તે સ્થાવરાયૈવ તુભ્યં નમો સૃષ્ટિકર્ત્રે સુપાત્રે હરાય ।
પ્રકાશાય સૂર્યાય દેવીમયાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૮॥

(Page ખં. ૮ અ. ૮ પાન ૧૯)
નમો દેવયક્ષાય સાધ્યાય તુભ્યં નરાયાऽથ દેવેન્દ્ર દેવાત્મકાય ।

દિગીશાય વૃક્ષાદિબીજાત્મકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૯॥

નમઃ સર્પરૂપાય દૈત્યાત્મકાય સમુદ્રાદિનાનાપ્રભેદસ્થમૂર્તે ।
અનન્તૈઃ સ્વરૂપૈઃ સદા ક્રીડસિ ત્વં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૦॥

તથાપિ ત્વમેવં તદાકારહીનઃ સદા સાહજેનૈવ યોગેન યોગિન્ ।
સ્વસત્તાત્મકાયૈવ તુભ્યં નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૧॥

અતો વેદવાદા વિશેષેણ ધૂમ્રા ભવન્તિ હ્યહો વર્ણિતું તે સ્વરૂપમ્ ।
બુધૈઃ કથ્યસે ધૂમ્રવર્ણસ્તતસ્ત્વં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૨॥

સુશાન્તિં ગતા વેદયોગીન્દ્રમુખ્યાસ્ત્વયિ બ્રહ્મનાથે સદા ધૂમ્રવર્ણે ।
વયં કિં સ્તુવીમોઽલ્પબોધા નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૩॥

શ્રીશિવ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં પ્રણેમુરમરર્ષયઃ ।
તાનુવાચ મહાભાગાન્ ધૂમ્રવર્ણઃ પ્રતાપવાન્ ॥ ૨૪॥

ધૂમ્રવર્ણ ઉવાચ ।
વરાન્ બ્રૂત મહાભાગા દાસ્યામિ સ્તોત્રતોષિતઃ ।
દેવર્ષયો હૃદિ સ્થાન્ વઃ સુદુર્લભતરાનપિ ॥ ૨૫॥

સ્તોત્રં ભવત્ કૃતં મે તુ ભવિષ્યતિ સુસિદ્ધિદમ્ ।
બ્રહ્મભૂયકરં વિપ્રા ભવિષ્યતિ ન સંશયઃ ॥ ૨૬॥

પુત્રપૌત્રકલત્રાદિ સૌખ્યદં ધનધાન્યદમ્ ।
આયુરારોગ્યકૈશ્વર્યદાયકં પ્રભવિષ્યતિ ॥ ૨૭॥

પઠતે શ ृણ્વતે દેવા નાનાભાવપ્રપૂરકમ્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં ભજતામિદમ્ ॥ ૨૮॥

મારણોચ્ચાટનાદીનિ હ્યેકવિંશતિપાઠતઃ ।
એકવિંશતિભિર્નિત્યં દિવસૈઃ પ્રભવન્તિ હિ ॥ ૨૯॥

પરકૃત્યાદિકં સર્વં નાશમેતિ ન સંશયઃ ।
અનેન સ્તોત્રમુખ્યેન સ્તુવતઃ સર્વદા દ્વિજાઃ ॥ ૩૦॥

યં યં ચિન્તયતે કામં તં તં દાસ્યામિ સર્વદા ।
સ્તુતોઽનેન મહાદેવાઃ સ્તોત્રેણ તુષ્ટિમાગતઃ ॥ ૩૧॥

શ્રીશિવ ઉવાચ ।

દેવર્ષયો ધૂમ્રવર્ણવચઃ શ્રુત્વા પ્રણમ્ય તમ્ ।
પ્રહૃષ્ટમનસો દેવં સર્વસિદ્ધિકરં જગુઃ ॥ ૩૨॥

દેવર્ષય ઊચુઃ ।
ધૂમ્રવર્ણ ત્વયા નાથ કૃતઃ શાન્તિધરઃ સદા ।
અહં તેન વયં સર્વે વરયુક્તાઃ કૃતાઃ કિલ ॥ ૩૩॥

અહઙ્કારે પ્રશાન્તે તુ સ્વાધિકારે વસામહે ।
વર્ણાશ્રમયુતા લોકા ભવિષ્યન્તિ દ્વિજાદયઃ ॥ ૩૪॥

વૃણુમઃ કિં ગણાધીશ દેહિ ભક્તિં ત્વદીયિકામ્ ।
અહઙ્કારભયઘ્નીં વૈ તયા તુષ્ટા વયં પ્રભો ॥ ૩૫॥

તથેતિ તાનુવાચાસૌ ધૂમ્રવર્ણો ગણેશ્વરઃ ।
અન્તર્દધે ભવન્ દેવા મુનયસ્તં નતાસ્તતઃ ॥ ૩૬॥

સ્થાપયામાસુરાનન્દાત્ ધૂમ્રવર્ણં દિગન્તગે ।
ક્ષેત્રે તત્ર ગણેશાનં પૂજયામાસુરાદરાત્ ॥ ૩૭॥

સ્વે સ્વે પદે ચ તે જગ્મુસ્તતો હર્ષસમન્વિતાઃ ।
સુખિનઃ સ્વસ્વકાર્યેષુ વર્તતે ગણપે રતાઃ ॥ ૩૮॥

એતદ્વઃ કથિતં ચિત્રં ચરિત્રં સર્વસિદ્ધિદમ્ ।
અહઙ્કારભયઘ્નં ચ પઠતાં શ‍ૃણ્વતાં ભવેત્ ॥ ૩૯॥

એવં નાનાવતારાન્ સ ધૂમ્રવર્ણઃ પ્રતાપવાન્ ।
ધૃત્વા ચકાર વિશ્વં તુ નિર્વિઘ્નં ભક્તિભાવિતઃ ॥ ૪૦॥

(Page ખં. ૮ અ. ૯ પાન ૨૦)
ધૂમ્રવર્ણાવતારાશ્ચાનન્તાસ્તેષાં ચરિત્રકમ્ ।
કથિતું નૈવ શક્યં તત્ કદા ભવતિ કેનચિત્ ॥ ૪૧॥

અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં મુખ્યાવતારચેષ્ટિતમ્ ।
સનકાદ્યા ગણેશાનં ભજધ્વં ભાવસંયુતાઃ ॥ ૪૨॥

તેનાહઙ્કારનિર્મુક્તા ભવિષ્યથ ન સંશયઃ ।
યોગીન્દ્ર યોગિવન્દ્યાશ્ચ શાન્તિદાઃ શાન્તચેતસે ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ધૂમ્રવર્ણાવતારસમાપ્તિર્નામ અષ્ટમોઽધ્યાયઃ ॥ ૮.૮

# ૮.૯ ધૂમ્રમહિમાવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સનકાદ્યા ઊચુઃ ।
કુરુક્ષેત્રં મહાદેવ ધૂમ્રવર્ણસ્ય સર્વદમ્ ।
માહાત્મ્યં ક્ષેત્રમુખ્યસ્ય વદ સન્તોષદાયકમ્ ॥ ૧॥

શ્રીશિવ ઉવાચ ।
ઐશાન્યે હિમવત્પ્રાન્તે ધૂમ્રવર્ણસ્ય ક્ષેત્રકમ્ ।
વિખ્યાતં તસ્ય માહાત્મ્યં વર્ણિતું કઃ ક્ષમો ભવેત્ ॥ ૨॥

સઙ્ક્ષેપેણ વદિષ્યામિ પ્રણમ્ય ગણનાયકમ્ ।
માહાત્મ્યં ક્ષેત્રમુખ્યસ્ય શ‌ૃણુધ્વં ત્વેકચેતસઃ ॥ ૩॥

દેવર્ષિભિઃ પ્રહર્ષેણ સ્થાપિતો ધૂમ્રવર્ણકઃ ।
શુણ્ડાદણ્ડમુખઃ શ્રીમાંશ્ચતુર્બાહુપ્રધારકઃ ॥ ૪॥

ત્રિનેત્ર એકદન્તશ્ચ પરશ્વાદિસમન્વિતઃ ।
અહઙ્કારો ગણેશાનં ભજતે તત્ર નિત્યશઃ ॥ ૫॥

વામે સિદ્ધિર્દક્ષિણાઙ્ગે બુદ્ધિઃ સર્વપ્રિયઙ્કરી ।
પુરતો મૂષકસ્તસ્ય ધૂમ્રવર્ણસ્ય શોભનઃ ॥ ૬॥

દશયોજનવિસ્તારઃ ક્ષેત્રસ્ય ગણપસ્ય ચ ।
ચતુરસ્ત્રં ચ તત્ ક્ષેત્રં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૭॥

પુરતો ધૂમ્રવર્ણસ્ય ભક્તા મુદ્ગલમુખ્યકાઃ ।
શુકાદ્યાસ્તં ભજન્તે તે સ્તુવન્તિ સ્મ મહર્ષયઃ ॥ ૮॥

પૃષ્ઠતઃ પાર્ષદાસ્તસ્ય પ્રમોદામોદકાદયઃ ।
આત્તશસ્ત્રા મહાભાગાઃ સેવન્તે ધૂમ્રવર્ણકમ્ ॥ ૯॥

વામાઙ્ગે તીર્થમુખ્યાનિ પ્રયાગાદીનિ માનદાઃ ।
ક્ષેત્રાણિ કાશીમુખ્યાનિ ભજન્તે ધૂમ્રવર્ણકમ્ ॥ ૧૦॥

દક્ષિણાઙ્ગેઽમરેશાનાઃ શમ્ભુવિષ્ણુમુખાઃ સદા ।
સગણાઃ સપરીવારા ભજન્તે ગણનાયકમ્ ॥ ૧૧॥

શેષાદ્યા નાગરાજાશ્ચ પર્વતા હૈમમુખ્યકાઃ ।

ગન્ધર્વાશ્ચારણાઃ સિદ્ધા વસવો મનવસ્તથા ॥ ૧૨॥

આદિત્યા રુદ્રકાદ્યાશ્ચ વિદ્યાધરાપ્સરાદયઃ ।
વસન્તિ તત્ર ક્ષેત્રે તે ભજન્તે દ્વિરદાનનમ્ ॥ ૧૩॥

યદ્યચ્છ્રેષ્ઠતમં લોકે તત્તત્ત્રૈવ સંસ્થિતમ્ ।
સેવાર્થં ધૂમ્રવર્ણસ્ય ભક્તિભાવસમન્વિતમ્ ॥ ૧૪॥

તેષાં સ્થાનાદિકં વિપ્રાઃ કથિતું નૈવ શક્યતે ।
અપારત્વાત્તતઃ સઙ્ક્ષેપતઃ પ્રોક્તં મયા પરમ્ ॥ ૧૫॥

તત્ર તીર્થં મહાસિદ્ધિદાયકં વર્તતે પરમ્ ।
ધૂમ્રવર્ણસ્ય તત્રૈવ સ્નાનં કરોતિ વિઘ્નપઃ ॥ ૧૬॥

તત્ર સ્નાનેન સદ્યશ્ચ વાઞ્છિતં લભતે નરઃ ।
અન્તે મોક્ષં ન સન્દેહો યત્ર કુત્ર મૃતોઽપિ ચેત્ ॥ ૧૭॥

(Page ખં. ૮ અ. ૯ પાન ૨૧)
તત્ર વિષ્ણુમુખા દેવાઃ કશ્યપાદ્યા મહર્ષયઃ ।
નિત્યં સ્નાનં પ્રકુર્વન્તિ પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૧૮॥

અન્યક્ષેત્રસ્થનાગાદ્યાસ્તત્ર સ્નાનં પ્રકુર્વતે ।
જનાઃ ક્ષેત્રનિવાસાર્થં સ્થિતાસ્તેઽપિ મુદાન્વિતાઃ ॥ ૧૯॥

શિવવિષ્ણુમુખાનાં ચ તત્ર તીર્થાનિ માનદાઃ ।
સ્થિતાનિ સ્નાનમાત્રેણ તેષાં પદપ્રદાનિ ચ ॥ ૨૦॥

તત્ર દર્શનમાત્રેણ ધૂમ્રવર્ણસ્ય વૈ સકૃત્ ।
ઈપ્સિતં લભતે સદ્યો માનવો પુણ્યવાન્ ભવેત્ ॥ ૨૧॥

યાત્રામાત્રેણ તત્રૈવ ધર્માર્થકામમોક્ષકમ્ ।
લભતે એકવારેણ યત્ર કુત્ર ગતોઽપિ ચેત્ ॥ ૨૨॥

ભાદ્રશુક્લચતુર્થ્યાં સ સ્થાપિતો ધૂમ્રવર્ણકઃ ।
દેવર્ષિભિશ્ચ મધ્યાહ્ને સા તિથિઃ પરમા મતા ॥ ૨૩॥

વાર્ષિકઃ સુમહોત્સાહસ્તત્રૈવ ક્રિયતે જનૈઃ ।
ભાદ્રશુક્લચતુર્થ્યાં તુ યાત્રાં કુર્વન્તિ માનવાઃ ॥ ૨૪॥

પરસ્પરં પ્રહૃષ્ટાસ્તે બોધયન્તિ ગજાનનમ્ ।
સરોમાઞ્ચા ભવન્ત્યેવ શઙ્કરાદ્યા મહર્ષયઃ ॥ ૨૫॥

ગાણેશા ભાવસંયુક્તા યાત્રાર્થં હર્ષસંયુતાઃ ।
તત્ર ગચ્છન્તિ ચાન્યે યે વૈષ્ણવાદ્યાઃ પ્રહર્ષિતાઃ ॥ ૨૬॥

કૃત્વા યાત્રાં પુનઃ સર્વે સ્વસ્વસ્થાનગતા મુદા ।
સ્મરન્તિ ધૂમ્રવર્ણં તં ભક્તિભાવસમન્વિતાઃ ॥ ૨૭॥

અન્તે સ્વાનન્દગાઃ સર્વે ભવન્તે નાત્ર સંશયઃ ।
શૈવાદ્યાઃ ક્રમમાર્ગેણ સ્વાનન્દસ્થા ભવન્તિ તુ ॥ ૨૮॥

ક્ષેત્રે મરણતો વિપ્રાઃ સ્વાનન્દો લભ્યતે જનૈઃ ।
યત્ર કુત્ર સ્થિતાશ્ચૈવ ગાણપા બ્રહ્મરૂપકાઃ ॥ ૨૯॥

ધૂમ્રવર્ણસ્ય ક્ષેત્રસ્ય માહાત્મ્યં લેશતો મયા ।
કથિતું વિસ્તરેણૈવાર્હતિ કો નૈવ વર્ણિતુમ્ ॥ ૩૦॥

ગાણેશાનિ ચ ક્ષેત્રાણિ બ્રહ્મભૂતમયાનિ તુ ।
યાવન્તિ બ્રહ્મગોલેઽસ્મિંસ્તાવન્તિ મુનિસત્તમાઃ ॥ ૩૧॥

ધર્માર્થકામમોક્ષાણાં ક્ષેત્રાણિ વિવિધાનિ ચ ।
ચતુઃપદમયાન્યેવ જ્ઞાતવ્યાનિ ન સંશયઃ ॥ ૩૨॥

પઞ્ચમં યત્ પદં પ્રોક્તં બ્રહ્માકારં મહર્ષિભિઃ ।
ક્ષેત્રં ગણપતેર્વિપ્રા યત્ર તત્ર સ્થિતં કિલ ॥ ૩૩॥

ઇદં ક્ષેત્રસ્ય માહાત્મ્યં શ ૃણુયાદ્યો નરોત્તમઃ ।
શ્રાવયેત્ પ્રપઠેદ્વાઽપિ સ સર્વાર્થમવાપ્નુયાત્ ॥ ૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂર્મવર્ણચરિતે ધૂમ્રમહિમાવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૮.૯
(Page ખં. ૮ અ. ૧૦ પાન ૨૨)

## ૮.૧૦ શિવાત્મકાવતારચરિતં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સનકાદ્યા ઊચુઃ ।
ધૂમ્રવર્ણાવતારસ્ય ભેદા નાનાવિધાઃ સ્મૃતાઃ ।
વદ તેષુ વિભો મુખ્યાંશ્ચરિત્રસંયુતાન્ પરાન્ ॥ ૧॥

ધૂમ્રવર્ણચરિત્રં તુ શ્રુત્વા યામો ન તૃપ્તિકામ્ ।
અહઙ્કારહરં પૂર્ણં જ્ઞાત્વા ત્વત્તો જગદ્ગુરો ॥ ૨॥

શ્રીશિવ ઉવાચ ।
ધૂમ્રવર્ણાવતારસ્ય ભેદાનાં ચરિતં પરમ્ ।
કથિતું નૈવ શક્યં તન્મુખ્યાનાં મુનિસત્તમાઃ ॥ ૩॥

મુખ્યેષુ મુખ્યભૂતાનાં ચરિત્રં લેશતઃ પરમ્ ।
કથયામિ શ◌ૃણુધ્વં યત્ મનસા નિશ્ચલેન તત્ ॥ ૪॥

સહજં યત્પદં પ્રોક્તં નેતિરૂપં મુનીશ્વરાઃ ।
તેન સૃષ્ટં સમાખ્યં હિ બ્રહ્મ ત્વાનન્દવાચકમ્ ॥ ૫॥

તેન સત્યાનૃતે સૃષ્ટે તાભ્યામુત્થાનસંયુતે ।
વિપ્રેશા બ્રહ્મણી સૃષ્ટે તે સ્વતઃ પરતોઽભિધે ॥ ૬॥

તેન દેહિમયં દેહપ્રચુરં બ્રહ્મ વૈ તતઃ ।
બિન્દુ તેનૈવ સંસૃષ્ટં ચતુર્દેહમયં પરમ્ ॥ ૭॥

સ્થૂલં સૂક્ષ્મં સમં નાદં તૈઃ સૃષ્ટં વિશ્વરૂપકમ્ ।
નાનાભેદમયં તસ્માદ્વ્યષ્ટિરૂપં મુનીશ્વરાઃ ॥ ૮॥

એતાનિ બ્રહ્મરૂપાણિ હ્યુત્પન્નાનિ મહર્ષયઃ ।
જ્ઞાનહીનાન્યક્ષમાણિ સર્વતઃ કાર્યજાતિષુ ॥ ૯॥

તતસ્તૈશ્ચ તપસ્તપ્તં યસ્મૈ કસ્મૈ નમો નમઃ ।
બીજરૂપાણિ સર્વેષાં મન્ત્રં જપ્ત્વા નિરન્તરમ્ ॥ ૧૦॥

તતો વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ગજાનનઃ ।
દર્શયામાસ રૂપં સ્વં તેભ્યો મન્ત્રમયં પરમ્ ॥ ૧૧॥

તતસ્તત્કૃપયા તાનિ દદૃશુઃ સ્વહૃદિ સ્થિતમ્ ।
મન્ત્રમેકાક્ષરં તેજોયુક્તં જ્ઞાનકરં પરમ્ ॥ ૧૨॥

દૃષ્ટ્વા મન્ત્રં પ્રહૃષ્ટાનિ બ્રહ્માણિ નેમુરાદરાત્ ।
મન્ત્રં સઙ્ગૃહ્ય તં પૂર્વં ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૧૩॥

મન્ત્રાકારં ગણેશાનં ધ્યાત્વા તેપુઃ પરાણિ તુ ।
તોષયામાસુરત્યન્તં શ્રમયુક્તાનિ વિઘ્નપમ્ ॥ ૧૪॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નોઽભૂદ્ગજાનનઃ ।

દર્શયામાસ રૂપં સ્વં યોગિધ્યેયમનુત્તમમ્ ॥ ૧૫॥

નરકુઞ્જરરૂપં તુ દૃષ્ટ્વા હૃદિ વિસિસ્મિરે ।
બ્રહ્માણિ તાનિ વૈ ઢુણ્ઢિર્દદૌ જ્ઞાનં સુનિર્મલમ્ ॥ ૧૬॥

તેન તૈર્ગણરાજસ્ય જ્ઞાતં રૂપં વિશેષતઃ ।
સગુણનિર્ગુણાભ્યાં ચ યુક્તં યોગમયં પરમ્ ॥ ૧૭॥

તતોઽતિહર્ષયુક્તાનિ જાતાનિ મુનિસત્તમાઃ ।
નિત્યં બ્રહ્માણિ વિઘ્નેશં ધ્યાત્વા જપં સમાચરન્ ॥ ૧૮॥

તતો ગણપતિઃ પ્રીતો યયૌ તાનિ સુભક્તિતઃ ।
શિવરૂપધરો ભૂત્વા પઞ્ચવક્ત્રસ્ત્રિલોચનઃ ॥ ૧૯॥

મુણ્ડમાલાધરઃ શમ્ભુર્વ્યાઘ્રેભચર્મધારકઃ ।
વિભૂતિલેપઃ સર્વાઙ્ગે શેષનાગવિભૂષણઃ ॥ ૨૦॥

વૃષધ્વજો વૃષારૂઢશ્ચન્દ્રચૂડસ્ત્રિશૂલધૃક્ ।
અર્ધાઙ્ગે ગિરિજાયુક્તો યોગીન્દ્રો યોગિવન્દિતઃ ॥ ૨૧॥

સમાગતં મહેશાનં દૃષ્ટ્વા બ્રહ્માણિ બ્રાહ્મણાઃ ।
વિસ્મિતાનિ વિશેષેણ વિચારં ચક્રુરાદરાત્ ॥ ૨૨॥

ગણેશકૃપયા સદ્યો જ્ઞાતં તૈઃ સકલં મહઃ ।
શિવસ્ય હૃદિ બોધેન પરસ્પરમથાઽબ્રુવન્ ॥ ૨૩॥

સ્વમહિમ્નિ સ્થિતં બ્રહ્મ સહજં ગણપાકૃતિ ।
વર્ણા ધૂમ્રાયિતાસ્તત્ર તેન ધૂમ્રાક્ષરઃ સ્મૃતઃ ॥ ૨૪॥

તસ્ય બિમ્બં વિમોહેન પતિતં માયયા યુતમ્ ।
જગત્સુ બ્રહ્મસુ પ્રાજ્ઞં તદેવાયં વૃષધ્વજઃ ॥ ૨૫॥

બિમ્બબિમ્બિપ્રભાવેણ ધૂમ્રવર્ણોઽયમુચ્યતે ।
ન ભેદઃ શાસ્ત્રવાદેષુ વરદઃ પ્રભવિષ્યતિ ॥ ૨૬॥

(Page ખં. ૮ અ. ૧૦ પાન ૨૩)
તતસ્તાનિ સમુત્થાય બ્રહ્માણિ ગણપં પુનઃ ।
પ્રણમ્ય હૃદિ સંસ્થં તં શિવં નેમુર્વિશેષતઃ ॥ ૨૭॥

સમ્પૂજ્ય વિધિના શમ્ભું પ્રહૃષ્ટાનિ પ્રણમ્ય ચ ।
તુષ્ટુવુર્બ્રહ્મરૂપાણ્યાનન્દમુખ્યાનિ માનદાઃ ॥ ૨૮॥

બ્રહ્માણ્યૂચુઃ ।
નમસ્તે ધૂમ્રવર્ણાય ગણેશાકૃતિધારિણે ।
બિમ્બાય શઙ્કરાયૈવ શમ્ભવે તે નમો નમઃ ॥ ૨૯॥

અમેયશક્તયે તુભ્યં પાર્વતીપતયે નમઃ ।
વૃષધ્વજાય દેવાય સહજાય નમો નમઃ ॥ ૩૦॥

માયાશ્રયાય માયાયાશ્ચાલકાય પરાત્મને ।
મહેશ્વરાય પૂર્ણાય હેરમ્બાય નમો નમઃ ॥ ૩૧॥

જટાજૂટધરાયૈવ નિર્મોહાય સદાશિવ ।
પરેશાય ત્રિશૂલાદિધારિણે તે નમો નમઃ ॥ ૩૨॥

સ્વાધીનાય નમસ્તુભ્યં પઞ્ચવક્ત્રધરાય ચ ।
અનાથાય સનાથાય નાથાય નાથરૂપિણે ॥ ૩૩॥

પરબ્રહ્મસ્વરૂપાય બ્રહ્માદિપતયે નમઃ ।
ગિરીશાય ગિરૌ શાયિંશ્ચિતાભસ્માઙ્ગધારિણે ॥ ૩૪॥

મુણ્ડમાલાધરાયૈવ નમસ્તે સર્પભૂષણ ।
નાનાભેદપ્રકારેણ ખેલકાય નમો નમઃ ॥ ૩૫॥

વામભાગે હ્યસત્યાય સત્યાય દક્ષિણાઙ્ગકે ।
તયોરભેદયોગે ચાનન્દાય તે નમો નમઃ ॥ ૩૬॥

સમરૂપા મહામાયા દેહસ્તે નાત્ર સંશયઃ ।
તસ્ય આત્મસ્વરૂપસ્ત્વમર્ધનારીધૃષે નમઃ ॥ ૩૭॥

એતાદૃશં મહેશાનં પશ્યામો બ્રહ્મરૂપિણમ્ ।
સર્વેષાં નેતિકર્તારં તેન ધન્યાનિ વૈ વયમ્ ॥ ૩૮॥

ધૂમ્રવર્ણસ્ત્વમેવેહ ન ભેદો દૃશ્યતે કદા ।
કસ્ત્વાં સ્તોતું સમર્થઃ સ્યાત્ પ્રભોઽતસ્તે નમામહે ॥ ૩૯॥

શિવ ઉવાચ ।
એવમુક્ત્વા મહેશાનં બ્રહ્માણિ નેમુરાદરાત્ ।
તાન્યુવાચ પ્રહર્ષેણ શઙ્કરઃ કરુણાનિધિઃ ॥ ૪૦॥

આદિશમ્ભુરુવાચ ।

બ્રહ્માણિ યાન્ વરાન્ બ્રૂત દાસ્યામિ તપસા પરમ્ ।
તુષ્ટઃ સ્તોત્રેણ ભક્ત્યા મે સંશયો ન હૃદીપ્સિતાન્ ॥ ૪૧॥

બ્રહ્માણ્યૂચુઃ ।
વરદોઽસિ યદા નાથ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ સ્મૃતિં સ્વકાર્યેષુ વિદ્યારૂપાં મહેશ્વર ॥ ૪૨॥

સ્વસ્વકાર્યં તુ કૃત્વા વૈ બન્ધદં બન્ધહારક ।
કુરુષ્વ બન્ધહીનાનિ સતતં યોગધારકઃ ॥ ૪૩॥

શ્રીશિવ ઉવાચ ।
યદ્યત્ સમ્પ્રાર્થિતં મત્તો ભવિષ્યતિ સુખપ્રદમ્ ।
ભવતાં સત્યસઙ્કલ્પા દુર્લભં કિં ન સમ્ભવેત્ ॥ ૪૪॥

અતુલં બન્ધહીનાર્થં યોગં શ‍ૃણુત સૌખ્યદમ્ ।
તં સાધ્ય બન્ધહીનાનિ ભવિષ્યથ ન સંશયઃ ॥ ૪૫॥

સર્વેષાં નેતિકર્તારં માં જાનીત ચતુર્થકમ્ ।
ચતુર્ણાં ચૈવ સંયોગે સ્વસ્વરૂપં વિદુર્બુધાઃ ॥ ૪૬॥

તસ્માત્ સ્વાધીનરૂપં ચ પરાધીનં ત્રિધા મતમ્ ।
સમુત્પન્નં કલાંશેન તં જાનીત ગજાનનમ્ ॥ ૪૭॥

સ્વસ્વરૂપમયો ઢુણ્ઢિર્માયાયુક્તઃ પ્રકીર્તિતઃ ।
ચતુર્ણાં ચાલકત્વાત્તુ સંયોગાભેદતઃ પ્રભુઃ ॥ ૪૮॥

અયોગઃ પઞ્ચભિર્હીનઃ સદા નિવૃત્તિવાચકઃ ।
ન તત્ર બ્રહ્મણાં યોગો જગતાં તસ્ય તેષુ ચ ॥ ૪૯॥

સંયોગાયોગયોર્યોગે ગણેશો યોગવાચકઃ ।
પૂર્ણશાન્તિપ્રદઃ સાક્ષાદ્બ્રહ્મભૂતો ગજાનનઃ ॥ ૫૦॥

ગકારઃ સ્વસ્વરૂપાખ્યો ણકારો યોગ ઉચ્યતે ।
સ્વામી તયોર્ગણેશાનો નરકુઞ્જરરૂપધૃક્ ॥ ૫૧॥

તં ભજધ્વં વિશેષેણ તદા શાન્તિમવાપ્સ્યથ ।
સતતં બન્ધહીનાનિ ભવિષ્યથ ન ચાન્યથા ॥ ૫૨॥

યથા ધૂમ્રાયિતો દેશો દૃશ્યતે નૈવ માનવૈઃ ।
(Page ખં. ૮ અ. ૧૧ પાન ૨૪)

દૃશ્યમાનસ્તથાઽપ્યેવં ધૂમ્રરોધનભાવતઃ ॥ ૫૩॥

તથા ચિત્તમયી માયા પઞ્ચધા વિવિધે રતા ।
તયા યુક્તા ન પશ્યન્તિ તં દેવં વેદસાધનૈઃ ॥ ૫૪॥

વેદા વર્ણમયાઃ પ્રોક્તા ધૂમ્રા જાતાશ્ચ માયયા ।
ગણેશાનં સ્વશિષ્યેભ્યો ધૂમ્રવર્ણમતો જગુઃ ॥ ૫૫॥

પૂર્ણશાન્તિપ્રદં યોગં ધૂમ્રવર્ણાત્મકં પરમ્ ।
જાનીત યોગયુક્ત્યા વૈ ભજધ્વં તં ગજાનનમ્ ॥ ૫૬॥

કૃત્વા સ્વસ્વસ્વભાવસ્થં કાર્યં નાનાવિધં સદા ।
સમર્પ્ય ધૂમ્રવર્ણાય બન્ધહીનાનિ સર્વદા ॥ ૫૭॥

એવમુક્ત્વા મહાદેવસ્તત્રૈવાન્તરધાત્તતઃ ।
બ્રહ્માણિ તં નમસ્કૃત્ય સસૃજુર્વિવિધં જગત્ ॥ ૫૮॥

યથોપદિષ્ટયોગેન ગણેશં નિત્યમાદરાત્ ।
ભજન્તે તાનિ બ્રહ્માણિ યોગયુક્તાનિ વૈ દ્વિજાઃ ॥ ૫૯॥

અયં શિવાત્મકઃ પ્રોક્તોઽવતારઃ પરમાદ્ભુતઃ ।
ધૂમ્રવર્ણકલાંશશ્ચ સર્વસિદ્ધિપ્રદાયકઃ ॥ ૬૦॥

ચરિત્રં શ ૃણુયાદ્યશ્ચેદિદં પઠેદ્યદા નરઃ ।
ભુક્ત્વા ભોગાન્ સ્વયં ચાન્તે ગચ્છેત્ સ્વાનન્દકં પુરમ્ ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે શિવાત્મકાવતારચરિતં નામ દશમોઽધ્યાયઃ ॥ ૮.૧૦

## ૮.૧૧ પાર્વતીગણેશચરિતં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
એકદા સંસ્થિતં વિપ્રાઃ કૈલાસે ગિરિજાયુતમ્ ।
ગણેશં ભજમાનં માં દૃષ્ટ્વા નન્દી સમબ્રવીત્ ॥ ૧॥

નન્દ્યુવાચ ।
શિવ ત્વં સર્વરૂપશ્ચ સર્વસ્વેન પ્રકીર્તિતઃ ।
સર્વેભ્યઃ ફલદાતા વૈ કર્મણાં કર્મધારકઃ ॥ ૨॥

યોગિભ્યો યોગનાથસ્ત્વં યોગસિદ્ધિપ્રદાયકઃ ।
ત્વત્તઃ પરતરં નાસ્તિ ભજસે કં ગજાનનમ્ ॥ ૩॥

વેદે શિવસુતઃ પ્રોક્તો ગણેશો નાત્ર સંશયઃ ।
તં કથં ભજસે નાથ સ્વપુત્રં સ્વામિનં યથા ॥ ૪॥

ઈશસ્તે નામ વિખ્યાતં સર્વેશત્વાત્ સદાશિવઃ ।
તવેશો નૈવ વેદેષુ ત્વમેકઃ સર્વભાવનઃ ॥ ૫॥

કિં મોહાર્થં જનાનાં ચ પાર્વત્યા સહ શઙ્કર ।
ભજસે ગણનાથં ત્વં શૈવગુપ્તત્વકારણાત્ ॥ ૬॥

મા કુરુષ્વ વૃથા સ્વામિન્ ગણેશભજનં કદા ।
શૈવાનાં મોહદં દેવ વ્યભિચારપદપ્રદમ્ ॥ ૭॥

મુદ્ગલ ઉવાચ ।
નન્દિનો વાક્યમાકર્ણ્ય તમુવાચ સદાશિવઃ ।
હર્ષેણોત્ફુલ્લનેત્રશ્ચ મહાપાશુપતં પરમ્ ॥ ૮॥

શ્રીશિવ ઉવાચ ।
ન જાનાસિ ગણેશાનં નન્દિસ્ત્વં મત્પરાયણઃ ।
તસ્યાઽહં ગણરૂપશ્ચ પશ્ય વેદે વિચક્ષણ ॥ ૯॥

ગણાઃ સમૂહરૂપાશ્ચાનન્તાસ્તસ્ય મહાત્મનઃ ।
ઈશાનાં વૈ સમૂહેઽહં ગણો ગણપતેઃ સ્મૃતઃ ॥ ૧૦॥

એક એવ ગણેશાનઃ સર્વે તસ્ય ગણાઃ સ્મૃતાઃ ।
બ્રહ્માકારાશ્ચ વિશ્વાકારા બ્રહ્મેશસ્ય માનદ ॥ ૧૧॥

વિદ્યા નાનાત્મિકા પ્રોક્તા તસ્યા નાનાવિધાઃ સ્મૃતાઃ ।
(Page ખં. ૮ અ. ૧૧ પાન ૨૫)
સમુત્પન્ના વિશેષેણ વિદ્યા જ્ઞાનપ્રકાશકાઃ ॥ ૧૨॥

વિદ્યાધીશોઽહમેકશ્ચ કથિતો વેદવાદિભિઃ ।
યોગવિદ્યાં મયાઽઽશ્રિત્ય ગણેશઃ પ્રકટીકૃતઃ ॥ ૧૩॥

સમાધિજં પરં બ્રહ્મ તદેવ પુત્ર ઉચ્યતે ।
અતઃ સમાધિજો યો મે ગણેશઃ પુત્રતાં યયૌ ॥ ૧૪॥

વિદ્યયા જ્ઞાનસંયુક્તા અન્યે વિષ્ણુમુખાઽમરાઃ ।

ન તે વિદ્યાધિપાઃ પ્રોક્તા મચ્છિષ્યા નાત્ર સંશયઃ ॥ ૧૫॥

તૈશ્ચ યોગબલેનૈવ ગણેશઃ પ્રકટીકૃતઃ ।
સમાધિજઃ સુતસ્તેષાં બભૂવે યોગિનાં તથા ॥ ૧૬॥

આદૌ મયા કૃતં બ્રહ્મ સાક્ષાત્કારિ ગુરું વિના ।
વિદ્યાબલેન તસ્માત્તુ મુખ્યોઽહં વિશ્વપો ગુરુઃ ॥ ૧૭॥

અતઃ શિવસુતઃ પ્રોક્તો વેદેષુ ગણનાયકઃ ।
વિષ્ણ્વાદયો ન મુખ્યાશ્ચ ગણેશપિતરઃ સ્મૃતાઃ ॥ ૧૮॥

અતોઽહં યોગરૂપં તં બ્રહ્મેશં બ્રહ્મવન્દિતમ્ ।
ભજામિ સ્વામિનં દાસો નૈવ મોહાર્થમાદરાત્ ॥ ૧૯॥

શિવસ્ય વચનં શ્રુત્વા વિસ્મિતો નન્દિકેશ્વરઃ ।
ઉવાચ તં મહાદેવં સર્વજ્ઞં સર્વવન્દિતમ્ ॥ ૨૦॥

નન્દિકેશ ઉવાચ ।
કુલદેવો ગણેશાનોઽસ્માકં તે નાત્ર સંશયઃ ।
વિભો તસ્ય વદ જ્ઞાનં મન્ત્રં વિધિયુતં પરમ્ ॥ ૨૧॥

શ્રીશિવ ઉવાચ ।
ચિત્તં પઞ્ચવિધં પ્રોક્તં સા બુદ્ધિઃ પરમા મતા ।
નાનાભ્રાન્તિકરી સિદ્ધિર્ભેદૈશ્વર્યમયી હૃદિ ॥ ૨૨॥

તયોર્બિમ્બં ગણેશસ્ય પતિતં માયયા યુતમ્ ।
બિમ્બભાવં પરિત્યજ્ય ગણેશો જાયતે નરઃ ॥ ૨૩॥

સરસં ચિત્તમુત્સૃજ્ય યોગિવન્દ્યો ભવિષ્યસિ ।
એકાક્ષરવિધાનેન ભજ તં યોગસાધનૈઃ ॥ ૨૪॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં પરમ્ ।
સવિધિં સોઽપિ તં નત્વા તપોર્થી ચ યયૌ વનમ્ ॥ ૨૫॥

નિરાહારેણ તપસાઽઽરાધિતો દ્વિરદાનનઃ ।
નન્દિના ધ્યાનયુક્તેન સમાધિના વિશેષતઃ ॥ ૨૬॥

ગતે વર્ષશતે પૂર્ણે યોગીન્દ્રઃ સ બભૂવ ચ ।
વરદાતા ગણેશાનસ્તદાશ્રમપદં યયૌ ॥ ૨૭॥

આગતં ગણનાથં સ દૃષ્ટ્વા હર્ષસમન્વિતઃ ।

ઉત્થાય તં પ્રણમ્યાઽઽદૌ પૂજયામાસ ભક્તિતઃ ॥ ૨૮॥

પુનઃ પ્રણમ્ય વિઘ્નેશં સ્તોતું સમુપચક્રમે ।
પાર્વતીં વામભાગે વૈ દધતં વીક્ષ્ય વિસ્મિતઃ ॥ ૨૯॥

ગણેશકૃપયા સદ્યો જ્ઞાનં પ્રાપ્તં મહાદ્ભુતમ્ ।
તેન સર્વં ગણેશસ્ય ચેષ્ટિતં જ્ઞાતમાદરાત્ ॥ ૩૦॥

તતઃ સ નન્દિકેશાનો વિચારમકરોત્ હૃદિ ।
બાહ્યરૂપધરશ્ચાયં મહાદેવો ન સંશયઃ ॥ ૩૧॥

ગિરિજાયાઃ પતિઃ પ્રોક્તઃ પઞ્ચવક્ત્રાદિચિહ્નિતઃ ।
ત્રિનેત્રો નરદેહાખ્યો ભિન્નભાવપ્રદર્શકઃ ॥ ૩૨॥

આનન્દાત્મકરૂપા સા પાર્વતી વિષ્ણુરૂપિણી ।
શિવદેવમયી પ્રોક્તા તસ્યામાત્મા શિવઃ સ્મૃતઃ ॥ ૩૩॥

ગજાકારઃ સ્વયં શમ્ભુરૈક્યભોગપરાયણઃ ।
અર્ધાઙ્ગપ્રકૃતિસ્થત્વાદ્બભૌ નારીનરઃ શિવઃ ॥ ૩૪॥

નરકુઞ્જરયોર્યોગે ગણેશાકારતાં ગતઃ ।
શિવો બ્રહ્મમયઃ સાક્ષાદ્ગિરિજયા સમન્વિતઃ ॥ ૩૫॥

યોગમાયામયી રમ્યા ગણેશાઙ્ગવ્યવસ્થિતા ।
પાર્વતી પાર્વતીનાથો ગણેશઃ પ્રબભૌ સ્વયમ્ ॥ ૩૬॥

સ એવ વરદાનાર્થં સમાયયૌ ન સંશયઃ ।
શિવચિત્તસ્થિતશ્ચાયમિયં શિવસ્ય માનસી ॥ ૩૭॥

(Page ખં. ૮ અ. ૧૧ પાન ૨૬)
તતઃ પ્રણમ્ય હર્ષેણ પ્રણનામ ગજાનનમ્ ।
પુનઃ પુનઃ સરોમાઞ્ચસ્તં તુષ્ટાવ કૃતાઞ્જલિઃ ॥ ૩૮॥

નન્દિકેશ ઉવાચ ।
નમસ્તે ગણેશાય શાન્તિપ્રદાય સદા શાન્તિરૂપાય શાન્તેર્ધરાય ।
નરાણાં હૃદિસ્થાય નાગાકૃતીનાં હૃદિસ્થાય યોગાય યોગેશ્વરાય ॥ ૩૯॥

હેરમ્બાય નમસ્તુભ્યં સિદ્ધિબુદ્ધિવિહારિણે ।
સ્વાનન્દપાય ચૌરેશ વાહનાય નમો નમઃ ॥ ૪૦॥

પાર્વતીપતયે તુભ્યં શિવચિત્તગતાય વૈ ।

લક્ષ્મીપતે નમસ્તુભ્યં વિષ્ણુચિત્તસ્થમૂર્તયે ॥ ૪૧॥

સંજ્ઞાપતે નમસ્તુભ્યં ભાનોર્હૃદિ સ્થિતાય ચ ।
આદિશક્તિપતે તુભ્યં શક્તિચિત્તગમૂર્તયે ॥ ૪૨॥

સાવિત્રીપતયે તુભ્યં બ્રહ્મણો હૃદિ ખેલક ।
ગાયત્રીપતયે તુભ્યમોઙ્કારચિત્તવાસિને ॥ ૪૩॥

શચીપતે નમસ્તુભ્યમિન્દ્રચિત્તગમૂર્તયે ।
સ્વાહાપતે પરેશાયાગ્નિહૃદિસ્થાય તે નમઃ ॥ ૪૪॥

નરરૂપાય વૈ તુભ્યં ભિન્નસૌખ્યપ્રચારિણે ।
સર્વત્ર ભિન્નભાવેષુ નરાય તે નમો નમઃ ॥ ૪૫॥

નિર્ગુણાય નમસ્તુભ્યં કુઞ્જરાકારમૂર્તયે ।
સર્વત્રાભેદસૌખ્યેષુ નિર્ગુણેષુ સ્થિતાય ચ ॥ ૪૬॥

નરકુઞ્જરરૂપાય યોગાકારાય તે નમઃ ।
યોગાનાં પતયે તુભ્યં પૂર્ણયોગસ્વરૂપિણે ॥ ૪૭॥

ધન્યોઽહં કૃતકૃત્યોઽહં યેન દૃષ્ટો ગજાનનઃ ।
કિં સ્તૌમિ બ્રહ્મ બ્રહ્મેશ નમસ્તે વરદો ભવ ॥ ૪૮॥

એવં સ્તુત્વા ગણેશાનં નનર્ત પ્રેમસંયુતઃ ।
નન્દીશસ્તં જગાદાસૌ ગણેશો ભક્તવત્સલઃ ॥ ૪૯॥

શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ નન્દિંસ્તે મનસીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તુતઃ સ્તોત્રેણ માનદ ॥ ૫૦॥

ત્વયા કૃતમિદં સ્તોત્રં યોગદં તુ ભવિષ્યતિ ।
ભુક્તિદં કામિકાયૈવ મુક્તિદં મોક્ષમિચ્છતે ॥ ૫૧॥

સર્વસિદ્ધિકરં ભાવિ પઠતાં શ઼ૃણ્વતાં સદા ।
યં યમિચ્છન્તિ તં તં તે લભન્તેઽનેન નિશ્ચિતમ્ ॥ ૫૨॥

નન્દિકેશ ઉવાચ ।
યદિ ત્વં વરદો મેઽસિ ભક્તિં દેહિ ત્વદીયિકામ્ ।
ગાણપત્યં કુરુ સ્વામિન્ માં વિઘ્નેશપરાયણમ્ ॥ ૫૩॥

ક્ષેત્રં ભવતુ તે નાથ યત્ર તપ્તં તપો મયા ।

તથેતિ તં ગણાધીશો જગાદાન્તરધીયત ॥ ૫૪॥

તતઃ સંસ્થાપયામાસ ગણેશં બ્રાહ્મણૈઃ સહ ।
નન્દિકેશો મહાભક્ત્યા પૂજનં પ્રચકાર હ ॥ ૫૫॥

પાર્વતીગણપં નામ ચક્રે તસ્ય મહર્ષયઃ ।
સર્વસિદ્ધિકરં સ્થાનં બભૂવે તન્મહર્ષયઃ ॥ ૫૬॥

તતો નન્દીશ્વરો નત્વા સમાગત્ય જગાદ હ ।
વૃત્તાન્તં સોઽપિ તં શ્રુત્વા તં શંસન્ હર્ષિતોઽભવત્ ॥ ૫૭॥

નન્દીવિઘ્નેશ્વરં નિત્યમભજદ્ભક્તિસંયુતઃ ।
મહાયોગીન્દ્રમુખ્યોઽસૌ બભૂવ શિવસન્નિભઃ ॥ ૫૮॥

ઇદમામ્બિકવિઘ્નેશચરિતં કથિતં મયા ।
ધૂમ્રવર્ણાત્મકશ્ચાઽયં ગણેશઃ સર્વસિદ્ધિદઃ ॥ ૫૯॥

યઃ પઠેચ્છૃણુયાદ્વાઽપિ ચરિતં ગણપસ્ય ચ ।
ઇદં લભેન્નરઃ સર્વં વાઞ્છિતં ભુક્તિમુક્તિદમ્ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે પાર્વતીગણેશચરિતં નામૈકાદશોઽધ્યાયઃ ॥ ૮.૧૧
(Page ખં. ૮ અ. ૧૨ પાન ૨૭)

## ૮.૧૨ ગુણેશાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
ત્રિપુરો નામ દૈત્યોઽભૂન્મહાબલપરાક્રમઃ ।
બ્રહ્મણો વરદાનેન જિગ્યે સર્વં ચરાચરમ્ ॥ ૧॥

કર્મલોપં ચકારાઽસૌ મહાબલપરાક્રમઃ ।
વર્ણસઙ્કરજં કર્મ કારયામાસ માનવૈઃ ॥ ૨॥

તદોપોષણસંયુક્તા દેવા માં શરણં યયુઃ ।
અહં ક્રોધસમાયુક્તો યોદ્ધું તેન ગતોઽભવમ્ ॥ ૩॥

મમ તસ્ય મહદ્યુદ્ધં બભૂવે દારુણં પરમ્ ।
દેવાનાં દાનવાનાં ચ તુમુલં રોમહર્ષણમ્ ॥ ૪॥

સંહારાસ્ત્રાણિ સર્વાણિ મયા ત્યક્તાનિ વેગતઃ ।
તાનિ નિષ્ફલરૂપાણિ બભૂવુશ્ચ મહર્ષયઃ ॥ ૫॥

અતો વિસ્મિતચિત્તોઽહમભવં ખેદસંયુતઃ ।
સહસા દૈત્યરાજેનાગ્નિશસ્ત્રેણ જિતોઽભવમ્ ॥ ૬॥

તતઃ કૈલાસમુત્સૃજ્ય ગતોઽહં ગહનં વનમ્ ।
નિઃશ્વસ્ય ચિન્તયા યુક્તોઽભવં ચૈવ હતોદ્યમઃ ॥ ૭॥

વિચારં માનસે વિપ્રા અકરવં હિતાવહમ્ ।
મમ હસ્તેન દૈત્યોઽયં મરિષ્યતિ ન સંશયઃ ॥ ૮॥

તત્ કથં મોઘરૂપં મે કૃતં દૈવેન કેન ચ ।
ઈશોઽહમનીશો જાતઃ પશ્ચાત્ સૂર્યોદયો યથા ॥ ૯॥

તત્રૈવ સહસા દેવમુનિર્નારદ આયયૌ ।
માં પ્રણમ્ય સ્થિતો ભક્ત્યા પૂજિતઃ સ મયા તથા ॥ ૧૦॥

તતો મયાઽતિખેદેન પૃષ્ટોઽસૌ નારદો મુનિઃ ।
ત્રિપુરસ્ય વધાર્થાય માં જગાદ સ બુદ્ધિમાન્ ॥ ૧૧॥

નારદ ઉવાચ ।
શિવ ત્વં મોહસંયુક્તોઽહઙ્કારેણ ધૃતોઽસિ વૈ ।
વિઘ્નરાજમનર્ચ્યાઽસૌ સત્તાહીનોઽસિ ભો પ્રભો ॥ ૧૨॥

વિઘ્નાઃ સત્તાત્મકાઃ પ્રોક્તાસ્તેષાં સ્વામી ગજાનનઃ ।
ઈશત્વં તેઽધુના નષ્ટં ઢુણ્ઢેરનર્ચનાત્ પ્રભો ॥ ૧૩॥

સત્તાં સ્વકીયદેહસ્થાં ધૃત્વા મોહપરાયણાઃ ।
ગણેશં યે ન જાનન્તિ સત્તાહીના ભવન્તિ તે ॥ ૧૪॥

યસ્ય કટાક્ષપાતેન કૃપયા તૃણમેકકમ્ ।
સૃજતે પાતિ હન્ત્યેવ બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ॥ ૧૫॥

તસ્ય કૃપાવિહીનસ્ત્વમશક્તોઽસિ સદાશિવ ।
સંહર્તું તૃણકં ચૈવ કુતો દૈત્યં પ્રજેષ્યસિ ॥ ૧૬॥

અતસ્તં શરણં ગચ્છ તેન સત્તાસમન્વિતઃ ।
હનિષ્યસિ મહાદૈત્યં ત્રિપુરં ત્રિવિધે રતમ્ ॥ ૧૭॥

મુદ્ગલ ઉવાચ ।

એવમુક્ત્વા મહેશાનં તં પ્રણમ્ય મહામુનિઃ ।
નારદો ગણપં ગાયન્ યયૌ સ્વેચ્છાપરાયણઃ ॥ ૧૮॥

તતઃ શિવો હૃદિ સ્મૃત્વા ગણેશં બ્રહ્મનાયકમ્ ।
દણ્ડકારણ્યદેશે સ વનગસ્તપ આચરત્ ॥ ૧૯॥

શતવર્ષે ગતે તે સ આયયૌ ગણનાયકઃ ।
મૂષકોપરિ સંસ્થો યો દશાયુધધરઃ પ્રભુઃ ॥ ૨૦॥

તં દૃષ્ટ્વા સહસોત્થાય શઙ્કરઃ પ્રણનામ હ ।
પૂજ્ય તુષ્ટાવ હર્ષેણ ગણેશં ભક્તિસંયુતઃ ॥ ૨૧॥

શ્રીશિવ ઉવાચ ।
ગણેશાય પરેશાય ધૂમ્રવર્ણાય ઢુણ્ઢયે ।
શિવાત્મજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૨૨॥

ગણેશાય ગુણાનાં તે સ્રષ્ટ્રે પાત્રે મહાત્મને ।
સંહર્ત્રે દેવદેવાય હેરમ્બાય નમો નમઃ ॥ ૨૩॥

અનન્તવિભવાયૈવાનન્તમાયાપ્રચાલક ।
અનન્તોદરગાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૨૪॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપિણે ।
સર્વપૂજ્યાય તે સર્વાદિપૂજ્યાય નમો નમઃ ॥ ૨૫॥

સ્વાનન્દપતયે તુભ્યં મૂષકધ્વજધારિણે ।
(Page ખં. ૮ અ. ૧૨ પાન ૨૮)
સિદ્ધિબુદ્ધિપતે નાથેક્ષુસાગરપતે નમઃ ॥ ૨૬॥

મનોવાણીવિહીનાય મનોવાણીમયાય તે ।
યોગેશાય મહાવિષ્ણુસુતાય તે નમો નમઃ ॥ ૨૭॥

શેષપુત્રાય ત્રૈલોક્યક્ષેત્રસ્થાય નમો નમઃ ।
દણ્ડકારણ્યદેવાય બ્રહ્મેશાય નમો નમઃ ॥ ૨૮॥

યત્ર વેદાદયો નાથ યોગિનઃ શાન્તિમાયયુઃ ।
તં પશ્યામિ ગણાધીશં ધન્યોઽહં સર્વભાવતઃ ॥ ૨૯॥

નેત્રાણિ ધન્યરૂપાણિ પ્રભો ત્વત્ દર્શનેન મે ।
મસ્તકાનિ નમસ્કારાત્ સ્તવનાન્ મે મુખાનિ તે ॥ ૩૦॥

હસ્તાઃ પૂજનતસ્તે મે ધન્યાઃ સર્વં મદીયકમ્ ।
ધન્યં તે પાદપદ્મસ્ય દર્શનેન ગજાનન ॥ ૩૧॥

ભક્તિં દેહિ ત્વદીયાં મે તયાઽહં ગણનાયક ।
કૃતકૃત્યો ભવિષ્યામિ શાન્તિયોગપરાયણઃ ॥ ૩૨॥

ત્રિપુરસ્ય વધાર્થાય સામર્થ્યં દેહિ શાશ્વતમ્ ।
મહેશ ત્વં ગણાધીશ સાર્થકં કુરુ નિત્યદા ॥ ૩૩॥

શિવસ્ય વચનં શ્રુત્વા ગુણેશસ્તમથાબ્રવીત્ ।
ભક્તં દેવવરિષ્ઠં તુ તપસા તોષિતો ભૃશમ્ ॥ ૩૪॥

શ્રીગણેશ ઉવાચ ।
ત્વયોક્તં સફલં સર્વં ભવિષ્યતિ સદાશિવ ।
અન્યત્ ત્રિપુરનાશાર્થં વદામિ શ‍ૃણુ સામ્પ્રતમ્ ॥ ૩૫॥

ત્રિવિધા પરમા માયા દેહભોગપરાયણા ।
આસુરી ત્રિપુરાખ્યા સા નાનાવિષયલમ્પટા ॥ ૩૬॥

તસ્યા જયાર્થમત્યન્તં તુરીયં ગણપાકૃતિ ।
ત્વયાઽઽશ્રિતં મદીયં ચ રૂપં પુરુષવાચકમ્ ॥ ૩૭॥

પૌરુષં બીજરૂપં મેં ગૃહાણ ત્વં સદાશિવ ।
માયાં ત્રિગુણરૂપાં તુ મયિ ક્ષિપ વિચક્ષણ ॥ ૩૮॥

એવમુક્ત્વા ગુણેશસ્તં દદૌ મન્ત્રં તુ પૌરુષમ્ ।
માયાં ગૃહ્ય તદીયાં સ નિર્મોહમકરોચ્છિવમ્ ॥ ૩૯॥

તત્ર સોંઽતર્હિતઃ સદ્યો ગુણેશો બ્રહ્મનાયકઃ ।
શિવો મન્ત્રપ્રભાવેણ જઘાન ત્રિપુરાસુરમ્ ॥ ૪૦॥

સદા પૌરુષભાવેન સંયુક્તઃ સ બભૂવ હ ।
માયાં જિત્વા વિશેષેણ સ્વાધીનાં તાં ચકાર હ ॥ ૪૧॥

શ‍ૃણુયાદ્યો ગણેશસ્ય સ્તોત્રં શિવકૃતં પઠેત્ ।
નિર્મોહઃ સર્વભાવેષુ ભવેદ્દેવપરાયણઃ ॥ ૪૨॥

પુત્રપૌત્રસમાયુક્તો ધનધાન્યસમન્વિતઃ ।
ભુક્ત્વા ભોગાનનેકાંશ્ચાન્તે સ્વાનન્દમવાપ્નુયાત્ ॥ ૪૩॥

ઇદં ગુણેશમાહાત્મ્યં કથિતં લેશતો મયા ।

પઠનાચ્છ્રવણાન્ નૃભ્યઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૪॥

ધૂમ્રવર્ણાત્મકશ્ચાયમવતારઃ પ્રકીર્તિતઃ ।
પૌરુષાર્થપ્રદઃ પૂર્ણો ગણેશો ભુક્તિમુક્તિદઃ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ગુણેશાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૮.૧૨
(Page ખં. ૮ અ. ૧૩ પાન ૨૯)

## ૮.૧૩ બાણાસુરવરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
બલેઃ પુત્રોઽભવદ્બાણો દૈત્યઃ પરમધાર્મિકઃ ।
શિવભક્તઃ સદા સાધુગુણયુક્તઃ પ્રતાપવાન્ ॥ ૧॥

બાલ્યાત્ પ્રારભ્ય શમ્ભું સોઽભજદ્ભાવપરાયણઃ ।
નાન્યં દેવં પ્રજાનાતિ સ્વધર્મપાલકો બભૌ ॥ ૨॥

શુક્રઃ પઞ્ચાક્ષરં મન્ત્રં દદૌ તસ્મૈ મહાત્મને ।
સવિધિં શઙ્કરસ્યૈવાદિદેશ તપસે મતિમ્ ॥ ૩॥

સોઽતપત્તપ ઉગ્રં માં ધ્યાત્વા મદ્ભક્તિભાવિતઃ ।
પ્રગતેષુ ચ વર્ષેષુ સહસ્રે તોષિતોઽભવમ્ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
જગામ વરદો બાણં શઙ્કરઃ કરુણાનિધિઃ ।
સ તં તુષ્ટાવ રૌદ્રૈશ્ચ સ્તોત્રૈઃ પૂજ્ય યથાવિધિ ॥ ૫॥

પ્રસન્નો ભગવાન્ પ્રાહ વરાન્ વૃણુ મહામતે ।
દાસ્યામિ તપસા તુષ્ટો ભક્ત્યા ચૈવાસુરાધિપ ॥ ૬॥

બાણાસુર ઉવાચ ।
વરદોઽસિ મહાદેવ ભક્તિં દેહિ ત્વયિ સ્થિરામ્ ।
શૈવં માં કુરુ દેવેશ નાન્યદેવપરાયણમ્ ॥ ૭॥

બાહૂનાં તુ સહસ્રં મે દેહિ સામર્થ્યમદ્ભુતમ્ ।
ન મત્સમઃ પ્રસઙ્ગ્રામે સમ્ભવેત્ સચરાચરે ॥ ૮॥

તથેતિ તં મહાદેવો જગાદ ભક્તમુત્તમમ્ ।
યયૌ સ્વનગરં શુમ્ભુઃ પાર્વત્યા ગણસંયુતઃ ॥ ૯॥

તતો બાણાસુરો દૈત્યો જિગ્યે વૈ વિષ્ણુમુખ્યકાન્ ।
સુરાન્ રાજ્યં ચકારાઽસૌ ધર્મનિષ્ઠઃ સ્વભાવતઃ ॥ ૧૦॥

સ્વર્ગેષુ દેવપાન્ સ્થાપ્ય પાતાલેષુ મહાસુરાન્ ।
નાગાન્ નરાન્ પૃથિવ્યાં સ રાજ્યં ચકાર ધર્મતઃ ॥ ૧૧॥

વર્ણાશ્રમયુતાન્ સર્વાન્ પાલયામાસ દૈત્યપઃ ।
નિત્યં કૈલાસગો ભૂત્વા પૂજયચ્છઙ્કરં પ્રભુમ્ ॥ ૧૨॥

તસ્ય ધર્મપ્રભાવેણ ભક્ત્યા તુષ્ટઃ સદાશિવઃ ।
વાસાર્થમાયયૌ શમ્ભુર્નગરે તસ્ય પાર્ષદૈઃ ॥ ૧૩॥

તતઃ સ શામ્ભવે દૈત્યો વિચારમકરોત્ હૃદિ ।
પઞ્ચાયતનરૂપેણ શઙ્કરઃ પ્રબભૂવ હ ॥ ૧૪॥

એકનિષ્ઠતયા શમ્ભું ભજિષ્યામિ વિશેષતઃ ।
નાન્યં જાનામિ દેવેશં શઙ્કરાદપરં કદા ॥ ૧૫॥

પૂજિતે શઙ્કરે સર્વં પૂજિતં સચરાચરમ્ ।
મયા વેદવિવાદેષુ તથા સઙ્કથિતં બુધૈઃ ॥ ૧૬॥

એકનિષ્ઠા સમા ભક્તિર્ન ભૂતા ન ભવિષ્યતિ ।
અતોઽહમેકનિષ્ઠાતો ભજિષ્યામિ સદાશિવમ્ ॥ ૧૭॥

તત્રાઽઽદૌ ગણરાજશ્ચ પૂજનીયઃ પ્રયત્નતઃ ।
કથિતં સર્વશાસ્ત્રેષુ કિં કરોમિ ગજાનનમ્ ॥ ૧૮॥

બ્રાહ્મણૈર્ગાણપત્યૈર્યૈસ્તૈઃ કૃતં ત્વિદમાદરાત્ ।
દ્વિતીયે પૂજિતે દેવે એકનિષ્ઠા કથં ભવેત્ ॥ ૧૯॥

એવં વિચાર્ય દૈત્યેશો ત્યક્ત્વા ગણપતિં પરમ્ ।
એકનિષ્ઠતયા શમ્ભું પૂજયન્નિત્યમાદરાત્ ॥ ૨૦॥

એવં વર્ષે ગતે પૂર્ણે શઙ્કરં પૂજ્ય ભક્તિતઃ ।
શોણિતે નગરે સંસ્થં સ નનર્ત પુરોઽસુરઃ ॥ ૨૧॥

તતઃ પ્રસન્નતાં યાતઃ શિવઃ કલ્યાણદાયકઃ ।
જગાદ તં વરં બ્રૂહિ મહાપાશુપતાઽસુર ॥ ૨૨॥

શિવસ્ય વચનં શ્રુત્વા હર્ષિતો બલિનન્દનઃ ।
જગાદ તં મહાદેવં પ્રણિપત્યાતિભક્તિતઃ ॥ ૨૩॥

બાણાસુર ઉવાચ ।
યોદ્ધારં દેહિ દેવેશ સદૃશં બલસંયુતમ્ ।
સહસ્રભુજવીર્યસ્ય સહનેઽતિપરાક્રમમ્ ॥ ૨૪॥

તચ્છ્રુત્વા કુપિતઃ શમ્ભુર્દદૌ શાપં મહાત્મને ।
રાજ્યં ભ્રષ્ટં ભુજાનાં તે છેદશ્ચૈવ ભવિષ્યતિ ॥ ૨૫॥

વાસુદેવેન સઙ્ગ્રામં કરિષ્યસ્યસુરાધમ ।
(Page ખં. ૮ અ. ૧૩ પાન ૩૦)
મત્તો વૃણોષિ કિં દુષ્ટ ભવિષ્યસિ પરાજિતઃ ॥ ૨૬॥

તચ્છ્રુત્વા શોકસંયુક્તો બાણસ્તં પ્રણનામ હ ।
પુનઃ સ્વગૃહમાગત્ય કાવ્યં પૂજ્ય જગાદ સઃ ॥ ૨૭॥

શિવસ્તં ત્યજ્ય કૈલાસં યયૌ ક્રોધસમન્વિતઃ ।
ઉન્મત્તં ધારયામાસ માનસે ચાસુરેશ્વરમ્ ॥ ૨૮॥

કાવ્યસ્તં સાન્ત્વયામાસ શ્રુત્વા વૃત્તાન્તમઞ્જસા ।
બોધયામાસ દૈત્યેશં યોગીશો દ્વિજસત્તમાઃ ॥ ૨૯॥

શુક્ર ઉવાચ ।
ગણેશં ત્યજ્ય દૈત્યેન્દ્ર શઙ્કરં ભજસે પરમ્ ।
વેદે વિરુદ્ધં તત્ કર્મ કરોષિ ત્વં ન સંશયઃ ॥ ૩૦॥

જ્યેષ્ઠરાજ ઇતિ પ્રોક્તં વેદૈઃ પશ્ય મહામતે ।
સર્વપૂજ્યાદિપૂજ્યત્વં પ્રકાશકારકં શુભમ્ ॥ ૩૧॥

યથા સન્ધ્યાદિકં કર્માવશ્યં તદ્વદ્ ગજાનનઃ ।
એકનિષ્ઠાપરૈઃ પૂજ્યઃ સર્વાદૌ જ્યેષ્ઠભાવતઃ ॥ ૩૨॥

ત્યક્ત્વા ગણેશ્વરં શમ્ભું ભજસે નિત્યમાદરાત્ ।
કુપિતો ગણનાથસ્તુ બુદ્ધિભેદં ચકાર હ ॥ ૩૩॥

સિદ્ધિબુદ્ધિપતિઃ સાક્ષાદ્ગણેશો બ્રહ્મનાયકઃ ।
તં ત્યક્ત્વા શામ્ભવીં સિદ્ધિં લભસે કથમપ્યહો ॥ ૩૪॥

શિવસ્ય હૃદયે સોઽપિ તવ તિષ્ઠતિ સામ્પ્રતમ્ ।
યદિચ્છયા શિવાદ્યાશ્ચ વર્તન્તે ત્વમપિ ધ્રુવમ્ ॥ ૩૫॥

અતસ્ત્વં શિવહીનશ્ચ કૃતસ્તેન મહાત્મના ।
સંશપ્તઃ શઙ્કરેણૈવ શૈવઃ પરમભાવિકઃ ॥ ૩૬॥

ગચ્છ તં શરણં દેવં ગણેશં બ્રહ્મનાયકમ્ ।
તદા વિઘ્નવિહીનસ્ત્વં ભવિષ્યસિ ન સંશયઃ ॥ ૩૭॥

ગણાઃ સમૂહરૂપાશ્ચ સમૂહા બ્રહ્મવાચકાઃ ।
બાહ્યાન્તરૈકભાવેન સમૂહો જાયતે હ્યતઃ ॥ ૩૮॥

તથાઽયં ગણરાજસ્ય ગણ એકઃ શિવઃ સ્મૃતઃ ।
સમૂહાખ્યશ્ચ તપસાં વિચારય મહામતે ॥ ૩૯॥

અથવા શિવસંજ્ઞોઽયં સહજાનાં પરા ગતિઃ ।
ગણરૂપશ્ચેશ્વરાણાં સમૂહે સહજઃ શિવઃ ॥ ૪૦॥

એવં વિષ્ણ્વાદયઃ સર્વે ગણાસ્તસ્ય પ્રકીર્તિતાઃ ।
પશ્ય વેદોપનિષદિ કથિતં તત્ત્વથર્વણિ ॥ ૪૧॥

એવમુક્ત્વા મહાદૈત્યં કાવ્યઃ સ્વગૃહમાયયૌ ।
બાણઃ ખેદસમાયુક્તો વિચારમકરોત્ હૃદિ ॥ ૪૨॥

તતસ્તેન ગણેશસ્ય મહો જ્ઞાતં મહાદ્ભુતમ્ ।
ચતુર્થીં પ્રાપ્ય દૈત્યેશસ્તં પુપૂજ ગજાનનમ્ ॥ ૪૩॥

ધ્યાનનિષ્ઠો ગણેશસ્ય જજાપ મન્ત્રમુત્તમમ્ ।
ગણાનાં ત્વેતિ બાણઃ સ ક્ષમાપનં ચકાર હ ॥ ૪૪॥

અથર્વોપનિષદ્ભિસ્તં તુષ્ટાવ સ કૃતાઞ્જલિઃ ।
તતઃ પ્રસન્નતાં યાતો ગણેશો ભક્તવત્સલઃ ॥ ૪૫॥

ઉપવાસકરં બાણમાયયૌ દ્વિરદાનનઃ ।
વરદો હ્યેકવર્ષેણ મૂષકોપરિ સંસ્થિતઃ ॥ ૪૬॥

આગતં ગણરાજં સ દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
ઉત્થાય તં પ્રણમ્યાદૌ પુપૂજ ભક્તિલોલુપઃ ॥ ૪૭॥

પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટાવ સ કૃતાઞ્જલિઃ ।
બાણઃ પરમધર્માત્મા ભક્તિનમ્રાત્મકન્ધરમ્ ॥ ૪૮॥

બાણાસુર ઉવાચ ।
વિઘ્નેશાય પરેશાય ભક્તવિઘ્નવિદારિણે ।
અભક્તવિઘ્નકર્ત્રે તે વિઘ્નવિઘ્નાય વૈ નમઃ ॥ ૪૯॥

વિનાયકાય દેવેશ દૈત્યેશનાયકાય તે ।
નિરઙ્કુશાય સાતત્યં ગણેશાય નમો નમઃ ॥ ૫૦॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાય જ્યેષ્ઠપૂજ્યાય તે નમઃ ।
સર્વપૂજ્યાદિપૂજ્યાય પરેશેશ નમો નમઃ ॥ ૫૧॥

લમ્બોદરાય સર્વાય માત્રે પિત્રે તદાત્મને ।
(Page  ખં. ૮ અ. ૧૩ પાન ૩૧)
આદિમધ્યાન્તહીનાય હેરમ્બાય નમો નમઃ ॥ ૫૨॥

શૂર્પકર્ણાય શૂરાય મોહાન્ધકવિદારિણે ।
બ્રહ્મેશાય સુશાન્તાય શાન્તિદાત્રે નમો નમઃ ॥ ૫૩॥

એકદન્તાય દેવાય સ્વાનન્દે વાસકારિણે ।
અમેયાયાપ્રતર્ક્યાય માયિને તે નમો નમઃ ॥ ૫૪॥

માયામાયિકરૂપાય માયામાયિકવર્જિત ।
અનાથાનાં પ્રણાથાય નાથનાથાય તે નમઃ ॥ ૫૫॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સદા યોગપરાયણ ।
યોગીન્દ્રાણાં સુયોગાય કુલદેવાય તે નમઃ ॥ ૫૬॥

ત્વદધીનમિદં સર્વં બુદ્ધિચાલકરૂપિણે ।
સિદ્ધ્યા સમ્મોહિતં નાથ સિદ્ધિદાત્રે નમો નમઃ ॥ ૫૭॥

શિવાદયઃ સમર્થાશ્ચ ત્વદીયકૃપયાઽભવન્ ।
અહઙ્કારેણ યુક્તાશ્ચેદ્ભ્રષ્ટાઃ સ્વસ્વાધિકારતઃ ॥ ૫૮॥

મયા તેઽજ્ઞાનભાવેન ત્વં ત્યક્તઃ શિવકામ્યયા ।
માં શપ્ત્વા ત્યજ્ય સઃ શમ્ભુર્ગતઃ ક્રોધપરાયણઃ ॥ ૫૯॥

અતો માં રક્ષ વિઘ્નેશ ત્વન્નાથં નાથવર્જિતમ્ ।
અપરાધાન્ મહોગ્રાન્ મે ક્ષાન્ત્વા પાહિ નિરન્તરમ્ ॥ ૬૦॥

એવં સ્તુત્વા ગણેશાનં પ્રણનામ રુરોદ ચ ।

બાણઃ પરમદુઃખાર્તઃ પાદં ગૃહ્ય મહાત્મનઃ ॥ ૬૧॥

તમુત્થાપ્ય ગણાધીશસ્તં જગાદ મહાસુરમ્ ।
સ્વમાયામોહિતં દીનં સ્વસ્વૈવ શરણાર્થિનમ્ ॥ ૬૨॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં વ્યતિક્રમવિદાહકમ્ ।
ભવિષ્યતિ મહાદૈત્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૬૩॥

અનેન સ્તુવતે દૈત્ય પ્રસન્નોઽહં દદામિ વૈ ।
ભુક્તિં મુક્તિં સદા સૌખ્યં શ‍ૃણ્વતે મનસીપ્સિતમ્ ॥ ૬૪॥

ત્વયા ત્યક્તોઽહમત્યન્તક્રોધયુક્તશ્ચ નિત્યદા ।
શિવહીનં પ્રકૃત્વાંઽતે નારકં ત્વાં કરોમિ વૈ ॥ ૬૫॥

કિં કરોમ્યધુના દૈત્ય શુક્રશિષ્યં મહાસુરમ્ ।
શરણાગતમેવં મે મત્પાદપ્રવણં પરમ્ ॥ ૬૬॥

શિવશાપો ન મિથ્યા તે ભવિષ્યતિ કદાચન ।
તથાપિ શ‍ૃણુ મે વાક્યં તુભ્યં સૌખ્યપ્રદાયકમ્ ॥ ૬૭॥

વાસુદેવં સમાયુધ્ય ભુજચ્છેદો ભવિષ્યતિ ।
ભ્રષ્ટરાજ્યઃ પુનઃ સદ્યો રાજ્યયુક્તો ભવિષ્યસિ ॥ ૬૮॥

એવમુક્ત્વા મહાદૈત્યં ગણેશો વિરરામ હ ।
તમુવાચ મહાદૈત્યઃ પ્રણમ્ય ગણનાયકમ્ ॥ ૬૯॥

બાણ ઉવાચ ।
તવ વિસ્મરણં નાથ ન ભવેન્ મે તથા કુરુ ।
ત્વયા યુક્તં શિવં નિત્યં ભજિષ્યામિ સુભક્તિતઃ ॥ ૭૦॥

ગાણેશં જ્ઞાનમાદ્યં મે દેહિ વિઘ્નેશ શાશ્વતમ્ ।
નાન્યદિચ્છામિ સર્વેશ ત્વત્પાદપ્રવણોઽધુના ॥ ૭૧॥

શ્રીગણેશ ઉવાચ ।
ગાણેશજ્ઞાનસંયુક્તો ભવિષ્યસિ મહાસુર ।
અનેન જડદેહેન ગણઃ શૈવો ભવિષ્યસિ ॥ ૭૨॥

મહાકાલેતિ નામ્ના ત્વં વિખ્યાતઃ સર્વમણ્ડલે ।
નષ્ટે શિવપદે દૈત્ય સ્વાનન્દે આગમિષ્યસિ ॥ ૭૩॥

એવમુક્ત્વા ગણાધીશોંઽતર્દધે મુનિસત્તમાઃ ।
બાણો હર્ષસમાયુક્તો ગણેશમભજત્તતઃ ॥ ૭૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે બાણાસુરવરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૮.૧૩
(Page ખં. ૮ અ. ૧૪ પાન ૩૨)

## ૮.૧૪ બાણાસુરવર્ણસમ્ભવચરિતં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
કૃપયા વરદાનેન ગણેશભજનેન ચ ।
બુદ્ધિભેદઃ શિવસ્યાપિ બભૂવ સર્વસંયુતઃ ॥ ૧॥

તતો ગિરિસુતાયુક્તઃ શઙ્કરઃ સ્કન્દમુખ્યકૈઃ ।
ગણૈઃ સમાયયૌ સદ્યો બાણસ્ય નગરં પુનઃ ॥ ૨॥

તમાગતં સમાજ્ઞાય બાણો હર્ષસમન્વિતઃ ।
ધ્યાત્વા ગજાનનં દેવં યયૌ શઙ્કરસન્નિધિમ્ ॥ ૩॥

પ્રણનામ સ સાષ્ટાઙ્ગં શિવં ગણસમન્વિતમ્ ।
રુરોદ પૂજયિત્વા તં ક્ષમસ્વેતિ જગાદ સઃ ॥ ૪॥

તતસ્તં શઙ્કરો ભક્તં સમુત્થાપ્ય પ્રસસ્વજે ।
જગાદ મધુરં વાક્યં હર્ષયન્ દાનવાધિપમ્ ॥ ૫॥

શ્રીશિવ ઉવાચ ।
મા કુરુષ્વ વૃથા ચિન્તાં સન્તુષ્ટોઽહં સમાગતઃ ।
વરાન્ વૃણુ મહાભાગ દાસ્યામિ બલિનન્દન ॥ ૬॥

બાણાસુર ઉવાચ ।
તવ ભક્તિં સ્થિરાં દેહિ વિયોગસ્તે ન મે ક્વચિત્ ।
ભવેત્તથા મહાદેવ કુરુષ્વ શિવ સર્વદા ॥ ૭॥

તથેત્યુવાચ શમ્ભુસ્તં તસ્થૌ તન્નગરે સદા ।
તતસ્તસ્માત્ સુતા જજ્ઞે સર્વલક્ષણસંયુતા ॥ ૮॥

ઉષાનામ્નીં મહાભાગામુપયેમેઽનિરુદ્ધકઃ ।

તાં સ્વપ્ને સા શુશોચૈવ તદર્થં કામપીડિતા ॥ ૯॥

ચિત્રલેખા તમાનીય દદૌ તસ્યૈ પતિં સ્વકમ્ ।
માયયા યાદવાન્ સમ્મોહ્ય મુમોદ તતઃ પરમ્ ॥ ૧૦॥

એકસ્તમ્ભસ્થિતાં તાં સ ઉપયેમેઽનિરુદ્ધકઃ ।
તયા સમ્મોહિતોઽત્યન્તં રેમે હર્ષસમન્વિતઃ ॥ ૧૧॥

યાદવાઃ સંહૃતં રાત્રૌ દૃષ્ટ્વા કામસુતં દૃઢમ્ ।
શુશુચુઃ પરમોદ્વિગ્ના ન લેભુસ્તદ્ગતિં ચ તે ॥ ૧૨॥

પ્રદ્યુમ્નેન ગણાધીશઃ પ્રાર્થિતસ્તપસા પરઃ ।
તસ્ય પ્રસાદયોગેન નારદસ્તત્ર ચાયયૌ ॥ ૧૩॥

તેન સઙ્કથિતં સર્વં ચેષ્ટિતં કામપુત્રજમ્ ।
શ્રુત્વા સંહર્ષિતાઃ સર્વે યાદવાઃ પ્રબભૂવિરે ॥ ૧૪॥

તત ઈશ્વરસંયુક્તં બાણં જેતું મનો દધે ।
કૃષ્ણો રામેણ સંયુક્તો યાદવૈઃ પરમદ્યુતિઃ ॥ ૧૫॥

શઙ્કરસ્ય ભયેનૈવ ભીતં તં પ્રત્યુવાચ હ ।
ઉદ્ધવઃ કુરુ કૃષ્ણ ત્વં ગણેશારાધનં પરમ્ ॥ ૧૬॥

તેન વિઘ્નવિહીનસ્ત્વં ભવિષ્યસિ ન સંશયઃ ।
શિવસ્ત્વાં સંયુગે જેતુમશક્તઃ પ્રભવિષ્યતિ ॥ ૧૭॥

તત એકાક્ષરસ્યૈવ પુરશ્ચરણમાકરોત્ ।
કૃષ્ણો ગણપતિં ધ્યાત્વા યથાશાસ્ત્રં વિધાનતઃ ॥ ૧૮॥

યાદવૈઃ પ્રયયૌ તત્ર યત્ર બાણઃ સ્થિતોઽભવત્ ।
શઙ્ખં દધ્મૌ તતઃ સોઽપિ સ શિવો યોદ્ધુમાયયૌ ॥ ૧૯॥

તતઃ શિવો દદૌ તસ્મૈ કવચં ગણપસ્ય ચ ।
સામવેદભવં શુદ્ધં બાણાય ખેદસંયુતઃ ॥ ૨૦॥

શિવશસ્રાસુરેણાત્ર હસ્તચ્છેદસ્ય કારણાત્ ।
કૃષ્ણઃ સંયુયુધે તેન દૈત્યેન્દ્રેણ મહાબલઃ ॥ ૨૧॥

ખિન્નં બાણં સમાલોક્ય શઙ્કરો યોદ્ધુમાયયૌ ।
કૃષ્ણેન તં સમાલોક્ય કૃષ્ણઃ સસ્માર વિઘ્નપમ્ ॥ ૨૨॥

મહાયુદ્ધં તયોરાસીત્ ત્રિલોકીનાશસન્નિભમ્ ।
શિવસ્ય વાસુદેવસ્ય મયા વક્તું ન શક્યતે ॥ ૨૩॥

તતો જૃમ્ભાસ્ત્રવેગેન મોહયિત્વા સદાશિવમ્ ।
કૃષ્ણશ્ચક્રં મુમોચૈવ બાણસ્ય ભુજસઞ્છિદે ॥ ૨૪॥

ચક્રેણ ક્ષુરધારેણ ભુજાશ્છિન્નાઃ સમન્તતઃ ।
અવશિષ્ટૌ ભુજૌ દ્વૌ ચ ચક્રં સઙ્કુઠિતં તતઃ ॥ ૨૫॥

તતઃ ખેદસમાયુક્તઃ કૃષ્ણઃ સસ્માર વિઘ્નપમ્ ।
સ્વયમાકાશવાણીં સ શુશ્રાવ ગણપેરિતામ્ ॥ ૨૬॥

(Page ખં. ૮ અ. ૧૪ પાન ૩૩)
ગણેશકવચેનૈવ રક્ષિતં શઙ્કરેણ ચ ।
બાણં હન્તું રણે કૃષ્ણ ન ક્ષમસ્ત્વં ભવિષ્યસિ ॥ ૨૭॥

શિવદત્તા ભુજાસ્તસ્ય શિવશાપેન છેદિતાઃ ।
જન્મસ્થૌ દ્વૌ ભુજૌ પ્રાજ્ઞ કવચેન પ્રરક્ષિતૌ ॥ ૨૮॥

તતો હર્ષેણ સંયુક્તઃ કૃષ્ણશ્ચક્રં નિવર્ત્ય ચ ।
સંસ્થિતઃ સંયુગે સદ્યો જૃમ્ભાસ્ત્રૈર્વર્જિતોઽભવમ્ ॥ ૨૯॥

તતો મયાઽતિબોધેન જ્ઞાતં વિઘ્નેશચેષ્ટિતમ્ ।
કૃષ્ણો નનામ માં તત્ર સ્વસ્વજેઽહં જનાર્દનમ્ ॥ ૩૦॥

યથાવિધિ વિવાહં સ ચકાર દૈત્યનાયકઃ ।
અનિરુદ્ધાય પુત્રીં સ્વાં દદૌ પ્રેમપરિપ્લુતઃ ॥ ૩૧॥

તતઃ સ્વભવનં કૃષ્ણો યયૌ હર્ષસમન્વિતઃ ।
બાણો રાજ્યં પરિત્યજ્ય મહાકાલો બભૂવ હ ॥ ૩૨॥

કૈલાસે પ્રાતરુત્થાય પુપૂજ દ્વિરદાનનમ્ ।
શમીમન્દારદૂર્વાદિરક્તપુષ્પૈર્વિશેષતઃ ॥ ૩૩॥

સમ્પૂજ્યાદૌ ગણપતિં પશ્ચાચ્છમ્ભું મહાગણઃ ।
સદા ધ્યાનપરો ભૂત્વા તોષયામાસ તૌ પરૌ ॥ ૩૪॥

શૌનક ઉવાચ ।
સૂત વિઘ્નેશ્વરસ્યૈવ પ્રિયોઽત્યન્તં બભૂવ હ ।
રક્તવર્ણઃ કથં તેન તુષ્ટો ભવતિ સર્વપઃ ॥ ૩૫॥

રક્તવર્ણઃ સ્વયં સાક્ષાદ્ગણેશો બ્રહ્મણાં પતિઃ ।
રક્તવસ્ત્રધરો રક્તચન્દનેન વિરાજિતઃ ॥ ૩૬॥

રક્તપુષ્પધરઃ પૂર્ણઃ સિન્ધુરાઙ્ગવિલેપનઃ ।
રક્તસાગરખેલી સ વદ કારણમુત્તમમ્ ॥ ૩૭॥

સર્વવર્ણમયશ્ચાયં કથમેકં સમાશ્રિતઃ ।
તન્નઃ સંશયદં સાધો નુદ સર્વજ્ઞસત્તમ ॥ ૩૮॥

સૂત ઉવાચ ।
વર્ણાઃ પઞ્ચ સમુદ્ભૂતાઃ સૃષ્ટ્યાદૌ શ્વેતશામલૌ ।
રક્તઃ પીતસ્તથા નીલઃ સર્વવર્ણમયાઃ પુરા ॥ ૩૯॥

પરસ્પરવિભેદેન તથા સમ્મીલનેન ચ ।
અનન્તા વર્ણકાઃ પ્રોક્તા જાનીહિ દ્વિજસત્તમ ॥ ૪૦॥

તૈસ્તપો ગણનાથસ્ય કૃતં ઘોરં તુ પઞ્ચભિઃ ।
વર્ષકેષુ શતે તાન્ સ આયયૌ ગણનાયકઃ ॥ ૪૧॥

તં દૃષ્ટ્વા પ્રણતાઃ સર્વે વર્ણાઃ સન્તુષ્ટુવુઃ પરમ્ ।
વરાન્ વવ્રુઃ તથા વિપ્ર સ્વસ્વશોભાસમન્વિતાન્ ॥ ૪૨॥

અન્યે ગણેશ્વરં તે તુ જગુસ્તં બ્રહ્મનાયકમ્ ।
અસ્મદીયસ્વરૂપસ્થો ભવ સ્વામિન્નમોઽસ્તુ તે ॥ ૪૩॥

વયં તેન ગણાધ્યક્ષ કૃતકૃત્યા ભવામહે ।
માયાબન્ધનહીનાસ્ત્વાં ભજામહે નિરન્તરમ્ ॥ ૪૪॥

તથેતિ તાનુવાચૈવ ગણેશોઽન્તર્દધે તતઃ ।
વર્ણા હર્ષયુતાઃ સર્વે સ્વસ્વકાર્યરતાઃ પુરા ॥ ૪૫॥

વર્ણૈઃ સંશોભિતં સર્વં નાનાભેદૈઃ સમન્તતઃ ।
ચરાચરં વિશેષેણ વર્ણયુક્તં બભૂવ હ ॥ ૪૬॥

કાશ્યપો ગણનાથસ્તુ નીલવર્ણાકૃતિં ધરઃ ।
મયૂરેશસ્તથા શ્વેતવર્ણયુક્તો બભૂવ હ ॥ ૪૭॥

વરેણ્યસ્ય સુતો રક્તવર્ણયુક્તો ગજાનનઃ ।
ધૂમ્રવર્ણસ્તથા શ્યામવર્ણરૂપધરો બભૌ ॥ ૪૮॥

હરિદ્રાગણપઃ પીતવર્ણાકૃતિપરોઽભવત્ ।

નાનાવતારરૂપૈઃ સ નાનાવર્ણધરોઽભવત્ ॥ ૪૯॥

એવં વરપ્રદાનેન વર્ણાઃ સર્વે મહામુને ।
ગણેશારાધને સક્તાઃ સ્વસ્વકાર્યપરાયણાઃ ॥ ૫૦॥

તતો રક્તેન વર્ણેન પુનસ્તપ્તં તપો મહત્ ।
નિરાહારેણ વિપ્રેશ ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૫૧॥

સહસ્રવર્ષે ચ ગતે ગણપસ્તં સમાયયૌ ।
વરાન્ દાતું મહાભાગં સ નનામ ગણાધિપમ્ ॥ ૫૨॥

(Page ખં. ૮ અ. ૧૫ પાન ૩૪)
પૂજયિત્વા પ્રતુષ્ટાવ રક્તવર્ણઃ પ્રહર્ષિતઃ ।
સ્તોત્રૈર્નાનાવિધૈસ્તં તુ ગાણેશૈર્ગણપપ્રિયૈઃ ॥ ૫૩॥

તતઃ પ્રસન્નભાવેન વિઘ્નેશસ્તમુવાચ હ ।
વરાન્ વૃણુ મહાભાગ રક્તવર્ણ હૃદીપ્સિતાન્ ॥ ૫૪॥

રક્તવર્ણ ઉવાચ ।
રક્તવર્ણસ્વરૂપસ્થો ભવ ત્વં ગણનાયક ।
સદા રક્તપ્રિયો નાથ નાનાવર્ણેષુ માનદ ॥ ૫૫॥

તેનાઽહં સર્વવર્ણેષુ શ્રેષ્ઠો ભાવી ન સંશયઃ ।
સતતં કૃતકૃત્યશ્ચ તવ સન્નિધિસંસ્થિતઃ ॥ ૫૬॥

તથેતિ તમથોક્ત્વાઽસૌ ગણેશોંઽતર્દધે સ્વયમ્ ।
તદાદિ વેદશાસ્ત્રેષુ રક્તવસ્તુપ્રિયોઽભવત્ ॥ ૫૭॥

ઇદં બાણચરિત્રં યઃ શ‍ૃણુયાદ્વર્ણસમ્ભવમ્ ।
પઠેત્તસ્ય ગણાધીશો વરદશ્ચ ભવિષ્યતિ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે બાણાસુરવર્ણસમ્ભવચરિતં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૮.૧૪

## ૮.૧૫ બુદ્ધાવતારવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સનકાદ્યા ઊચુઃ ।
શ્રુત્વા ત્વદ્વદનામ્ભોજાત્ કથામમૃતરૂપિણીમ્ ।

જન્મમૃત્યુહરાં પૂર્ણાં સર્વસૌખ્યકરીં શિવ ॥ ૧॥

ગાણેશાનીં ન તૃપ્તા વૈ વયં વદ મહામતે ।
પુનર્ગણપતેઃ સૌમ્યાં કથામવતારજાં પરામ્ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
કલિપ્રવૃત્તિકામાર્થં બ્રહ્મા વિષ્ણું યયૌ પુરા ।
તુષ્ટાવ તં રમાનાથં જગાદ સ્વપ્રયોજનમ્ ॥ ૩॥

બ્રહ્મોવાચ ।
કલિં પાપસ્વરૂપં ચ સૃજામિ સ્મ જનાર્દન ।
ન તં જનાઃ પ્રહર્ષેણ માનયિષ્યન્તિ સર્વદા ॥ ૪॥

દ્વાપરાન્તે કલિઃ પ્રોક્તસ્તસ્ય કાલોઽધુનાઽઽગતઃ ।
તં પ્રવર્તય દેવેશ ત્વં સ્મૃતઃ સર્વપાલકઃ ॥ ૫॥

બ્રહ્મણો વચનં શ્રુત્વા કેશવસ્તમુવાચ હ ।
પાપરૂપં મહાઘોરં નાભિનન્દામ્યહં કલિમ્ ॥ ૬॥

ધર્મપાલનભાવાર્થમવતારં કરોમ્યહમ્ ।
ધર્મનાશકરં પાપં કલિં નૈવાભિનન્દયે ॥ ૭॥

તતસ્તં કેશવં દેવં જગાદ ચતુરાનનઃ ।
બુધ્દ્વાવતારભૃત્ત્વં વૈ કથિતોઽસિ જનાર્દન ॥ ૮॥

અવતારચરિત્રં તે કલિપ્રવર્તકં પ્રભો ।
પશ્ય પૌરાણિકીં ગાથાં સ્વધર્મસ્થાં ત્વદાશ્રિતામ્ ॥ ૯॥

બ્રહ્મણો વચનં શ્રુત્વા નિઃશ્વસ્ય તમથોઽબ્રવીત્ ।
વિષ્ણુસ્તથેતિ દુઃખેન બ્રહ્મા સ્વભવનં યયૌ ॥ ૧૦॥

તતઃ સ ભગવાંસ્તત્ર તતાપ તપ ઉત્તમમ્ ।
ષડક્ષરેણ મન્ત્રેણ ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૧૧॥

દશવર્ષૈર્ગણાધ્યક્ષઃ પ્રસન્નો વરદોઽભવત્ ।
તમાયયૌ મહાભક્તં ભક્તેશો ભક્તવત્સલઃ ॥ ૧૨॥

તમાગતં સમાલોક્ય તુષ્ટાવાઽઽપૂજ્ય વિઘ્નપમ્ ।
હેરમ્બોપનિષત્તત્ત્વૈર્ભક્ત્યા નમ્રાત્મકન્ધરઃ ॥ ૧૩॥

તતો ગજાનનસ્તુષ્ટસ્તં જગાદ કૃપાન્વિતઃ ।

વરાન્ વૃણુ મહાભાગ યાંસ્તે ચિત્તે સ્થિરાન્ પરાન્ ॥ ૧૪॥

(Page ખં. ૮ અ. ૧૫ પાન ૩૫)
ગણેશવચનં શ્રુત્વા વિષ્ણુસ્તં પુનરબ્રવીત્ ।
કૃતાઞ્જલિઃ પ્રણમ્યૈવ ગણેશં સર્વસિદ્ધિદમ્ ॥ ૧૫॥

શ્રીવિષ્ણુરુવાચ ।
ભક્તિં દેહિ ત્વદીયાં મે સર્વસિદ્ધિપ્રદાયિનીમ્ ।
બુદ્ધોઽહં ધર્મલોપાર્થં ભવિષ્યામિ કલૌ યુગે ॥ ૧૬॥

ધર્મસંસ્થાપનં નિત્યં કરોમિ ગણનાયક ।
ધર્મલોપાર્થમેવાહં ત્વયા બુદ્ધઃ પ્રકીર્તિતઃ ॥ ૧૭॥

એતદેવ વિરુદ્ધં મે પ્રાપ્તં ઢુણ્ઢે દયાનિધે ।
તદર્થં શરણં નાથ યાતોઽહં તે પદસ્ય ચ ॥ ૧૮॥

અતો માં રક્ષ વિઘ્નેશ વિરુદ્ધાચરણાત્ પ્રભો ।
વિનાયકસ્ત્વમેકો વૈ કુરુ માં ધર્મપાલકમ્ ॥ ૧૯॥

શ્રીગણેશ ઉવાચ ।
મા ભયં કુરુ વિષ્ણો ત્વં ધર્મયુક્તો ભવિષ્યસિ ।
કલિપ્રવર્તને દોષો ન તે ક્વાપિ મહાત્મનઃ ॥ ૨૦॥

મયા ચતુર્યુગાઃ ખેલાદ્રચિતાઃ ક્રમકારણાત્ ।
વરદાનેન મે સર્વે સ્વસ્વકાલયુતા બભુઃ ॥ ૨૧॥

કલિસ્તેષુ મહાપાપી મયા સંસ્થાપિતોઽભવત્ ।
મદાજ્ઞાપાલકો ભૂત્વા ભવ બુદ્ધસ્ત્વમાદરાત્ ॥ ૨૨॥

અહઙ્કારં વિભો ત્યક્ત્વા કર્તાહમિતિ ચિત્તગમ્ ।
સમર્પ્ય મયિ કર્માણિ કુરુ કર્મ યથાતથમ્ ॥ ૨૩॥

ચિત્તે ચિન્તામણિં પશ્ય તદિચ્છાવશગં જગત્ ।
બ્રહ્મ નાનાવિધં તદ્વત્તત્ર કસ્ત્વં વિચારય ॥ ૨૪॥

વેદશાસ્ત્રમયી વાણી ગણેશેન વિનિર્મિતા ।
તસ્યા આજ્ઞાં પ્રપાલ્યૈવ વર્તિતવ્યં તુ જન્તુભિઃ ॥ ૨૫॥

પ્રીતો ગણેશ્વરસ્તેન દાસ્યતિ સ્વપદં પરમ્ ।
સર્વેષાં નાત્ર સન્દેહો જીવાનામીશભાવિનામ્ ॥ ૨૬॥

કલિખેલકરઃ સોઽપિ ગણેશો ધૂમ્રવર્ણકઃ ।
ચકાર બુદ્ધરૂપસ્થં સ્વયં વિષ્ણું તદર્થતઃ ॥ ૨૭॥

એવં ધાર્ય મહાવિષ્ણો મદાજ્ઞાવશગો ભવ ।
કર્મ કૃત્વા હ્યધર્મસ્થં મય્યર્પ્ય સુખમેષ્યસિ ॥ ૨૮॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
વિષ્ણુર્હર્ષસમાયુક્તો બુદ્ધોઽભૂચ્ચ મહર્ષયઃ ॥ ૨૯॥

કૃતં તેન મહચ્છાસ્ત્રં બૌદ્ધં મોહપ્રદાયકમ્ ।
કલિદોષપ્રવૃદ્ધ્યર્થં સેવિભ્યો નરકપ્રદમ્ ॥ ૩૦॥

સનકાદ્યા ઊચુઃ ।
કીદૃશં બૌદ્ધશાસ્ત્રં તદ્વદ સર્વજ્ઞ તે નમઃ ।
જ્ઞાત્વા મોહવિહીનાસ્તજ્જના ભવન્તિ નિત્યદા ॥ ૩૧॥

શ્રીશિવ ઉવાચ ।
શ ૃણુધ્વં મુનયઃ સર્વે બૌદ્ધં નરકદાયકમ્ ।
વર્ણાશ્રમસ્થિતેભ્યસ્તદ્વિહીનેભ્યઃ સુખપ્રદમ્ ॥ ૩૨॥

સ્વયં બુદ્ધિપતિઃ સાક્ષાદ્ હૃદિ તિષ્ઠતિ દેહિનામ્ ।
બ્રહ્મણામીશ્વરાણાં ચ પઞ્ચચિત્તપ્રચાલકઃ ॥ ૩૩॥

સ વિનાયક ઇત્યુક્તઃ સર્વેષાં નાયકો મતઃ ।
નાયકેન વિહીનત્વાત્ સ્વેચ્છાચારી સનાતનઃ ॥ ૩૪॥

તદિચ્છયા સ્વયં બ્રહ્મ નાનારૂપધરં બભૌ ।
નાનાક્રીડાસમાયુક્તં નાનામાયાબલાશ્રિતમ્ ॥ ૩૫॥

તત્ર પાપાદિકં નાસ્તિ ન પુષ્પાદિકમઞ્જસા ।
જ્ઞાનાજ્ઞાનસમાનૈશ્ચ તુર્યં વૈ નાત્ર સંશયઃ ॥ ૩૬॥

ન સ્વર્ગપ્રાપ્તિદં કર્મ બ્રહ્મણો નારકં કથમ્ ।
ભ્રાન્તિદં સર્વમુત્સૃજ્ય બ્રહ્મભૂતો નરો ભવેત્ ॥ ૩૭॥

હૃદિ બુદ્ધિપ્રદાતારં સર્વેષાં ખેલકારકમ્ ।
તં જ્ઞાત્વા મોહહીનો વૈ ભવિષ્યતિ સદા નરઃ ॥ ૩૮॥

ચિત્તસ્ય સુખદં સર્વં પ્રકુર્યાન્નાત્ર સંશયઃ ।
ન વર્ણાશ્રમધર્મૈઃ સ શરીરં પીડયેત્ કદા ॥ ૩૯॥

(Page ખં. ૮ અ. ૧૫ પાન ૩૬)
દેહો ભોગાર્થમાનન્દાદ્રચિતસ્તેન બ્રહ્મણા ।
નાનાયત્નૈઃ શરીરં તત્ પોષણીયં નિરન્તરમ્ ॥ ૪૦॥

શરીરે કષ્ટમાપન્ને બુદ્ધિઃ ખેદયુતા ભવેત્ ।
તત્સ્થબુદ્ધિપતિઃ સાક્ષાદ્ દુઃખિતશ્ચ તથા ભવેત્ ॥ ૪૧॥

અહં બ્રહ્મેતિ સન્ધાર્ય સદા સ્વેચ્છાપરો ભવેત્ ।
પાપપુણ્યવિહીનઃ સ દેહપોષણકારકઃ ॥ ૪૨॥

નાનાપદાર્થભાવેષુ મનસ્તસ્ય પ્રવર્તતે ।
ભોક્તવ્યાસ્તે નરેણૈવ ત્યજ્ય વર્ણાશ્રમાશ્રમમ્ ॥ ૪૩॥

જીવહિંસામયં કર્મ કર્તવ્યં ન કદાચન ।
તૃણાઙ્કુરાદિકં તદ્વન્નચ્છેત્તવ્યં વિચારતઃ ॥ ૪૪॥

દેવાર્ચનાદિકં કર્મ ન કર્તવ્યં મનીષિભિઃ ।
ન સ્વાહા ન સ્વધાદ્યં યદહં બ્રહ્મેતિ બોધતઃ ॥ ૪૫॥

બ્રાહ્મણેભ્યો ન દાતવ્યં દાનભોજ્યાદિકં કદા ।
સર્વે સમાનરૂપાશ્ચ કથં તત્ર દ્વિજાદિકમ્ ॥ ૪૬॥

યત્ર ચિત્તસ્ય સમ્પ્રીતિર્જાયતે મુનિસત્તમાઃ ।
તદેવ પાત્રમુખ્યં વૈ જ્ઞાતવ્યં શ્રેષ્ઠભાવતઃ ॥ ૪૭॥

એવં નાનામતૈર્યુક્તં શાસ્ત્રં બૌદ્ધં મહર્ષયઃ ।
જ્ઞાતવ્યં કલિદોષૈશ્ચ યુક્તં નરકદં ભવેત્ ॥ ૪૮॥

વર્ણાશ્રમસ્થકં ધર્મં ત્યક્ત્વા સ્વેચ્છાપરો ભવેત્ ।
અહિંસા પરમો ભાવી હ્યેતદ્બૌદ્ધરહસ્યકમ્ ॥ ૪૯॥

સર્વાન્ સમ્મોહ્ય વિશ્વાત્મા બુદ્ધઃ કલિપ્રવર્તકઃ ।
સંસ્થિતઃ કૈકટે દેશે ગુપ્તરૂપેણ માનદાઃ ॥ ૫૦॥

ગણેશધ્યાનસંયુક્તઃ સમર્પ્ય ઢુણ્ઢયે કૃતમ્ ।
કર્મયોગયુતઃ સોઽપિ તદાઽઽજ્ઞાપાલકોઽભવત્ ॥ ૫૧॥

તથાપિ પૂજયા હીનો બભૂવે બુદ્ધરૂપધૃક્ ।
વિષ્ણુર્વેદવિરુદ્ધસ્થમાર્ગસંસર્જનાત્ કિલ ॥ ૫૨॥

કલિપ્રાન્તે દુરાચારા બૌદ્ધમાયા વિમોહિતાઃ ।

વર્ણાશ્રમપરિભ્રષ્ટા ભવિષ્યન્તિ ગૃહે ગૃહે ॥ ૫૩॥

લેશમાત્રેણ ધર્મસ્તુ સ્થિતસ્તત્ર મહર્ષયઃ ।
અધર્મેણ જિતઃ સોઽપિ સદોપોષણસંયુતઃ ॥ ૫૪॥

તતો બુદ્ધઃ સ્વયં ઢુણ્ઢિં પરં ધ્યાત્વા તપોન્વિતઃ ।
પ્રાર્થયિષ્યતિ વિઘ્નેશં ધર્મસંસ્થાપનાય વૈ ॥ ૫૫॥

તતો ગણેશ્વરઃ સાક્ષાત્ પ્રસન્નોઽવતરિષ્યતિ ।
ધૂમ્રવર્ણ ઇતિ ખ્યાતો ધર્મં સંસ્થાપયિષ્યતિ ॥ ૫૬॥

હૃષ્ટો બુદ્ધશ્ચ તં નત્વા પૂજ્ય સ્તુત્વા વિશેષતઃ ।
અન્તર્ધાનં સ્વયં કૃત્વા સ્વમહિમ્નિ સ્થિતો ભવેત્ ॥ ૫૭॥

ઇદં બુદ્ધસ્ય માહાત્મ્યં કથિતં સ્વલ્પભાવતઃ ।
પઠનાચ્છ્રવણાત્ સદ્યો મોહઘ્નં કામદં ભવેત્ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે બુદ્ધાવતારવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૮.૧૫
(Page ખં. ૮ અ. ૧૬ પાન ૩૭)

## ૮.૧૬ ધૂમ્રવર્ણકલિનિર્જયવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
વર્ણાશ્રમે કલૌ નષ્ટે દેવા દુઃખસમન્વિતાઃ ।
પ્રાર્થયિષ્યન્તિ વિઘ્નેશમુપોષણપરાયણાઃ ॥ ૧॥

નાનાતપોન્વિતાન્ વીક્ષ્ય પ્રાદુર્ભાવં ગજાનનઃ ।
કરિષ્યત્યમરાન્ વિપ્રાઃ પુરઃ પરમભક્તિતઃ ॥ ૨॥

સમાગતં ગણેશાનં ધૂમ્રવર્ણધરં પ્રભુમ્ ।
દ્વિભુજં વાજિસંસ્થં તં ખડ્ગચર્મપ્રધારિણમ્ ॥ ૩॥

નાનાપુષ્પમયીં માલાં દધાનં ગન્ધચર્ચિતમ્ ।
દૃષ્ટ્વા સુરાઃ પ્રણેમુસ્તં નત્વા પૂજ્ય પ્રતુષ્ટુવુઃ ॥ ૪॥

નમસ્તે ધૂમ્રવર્ણાય નાનાખેલકરાય ચ ।
અમેયશક્તયે તુભ્યં માયિને ધર્મરક્ષિણે ॥ ૫॥

અનાથાનાં પ્રણાથાય નાથનાથાય તે નમઃ ।
સગુણાય નમસ્તુભ્યં નિર્ગુણાય નમો નમઃ ॥ ૬॥

સગુણનિર્ગુણાભ્યાં ચ હીનાય યોગરૂપિણે ।
યોગાકારેણ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૭॥

નરકુઞ્જરરૂપાય ધૂમ્રવર્ણધરાય ચ ।
દ્વિભુજાયાશ્વવાહાય હેરમ્બાય નમો નમઃ ॥ ૮॥

ખડ્ગચર્મધરાયૈવ નાના ચન્દનચર્ચિત ।
નાના પુષ્પધરાયૈવ સર્વાધ્યક્ષાય તે નમઃ ॥ ૯॥

પૂર્ણાય પૂર્ણરૂપાય ગણેશાય પરાત્મને ।
ધર્મરક્ષ મહાભાગ ગજાનન નમોઽસ્તુ તે ॥ ૧૦॥

ધર્માન્ના અમરાઃ સર્વે સુરેશ્વર કૃતાસ્ત્વયા ।
નષ્ટે ધર્મેઽધુના નાથ મરિષ્યામસ્ત્વદગ્રતઃ ॥ ૧૧॥

બુદ્ધમાયાસહાયેન કલિના નિર્જિતા વયમ્ ।
વિષ્ણુશમ્ભુમુખા દેવાસ્તાન્ પાલય મહોદર ॥ ૧૨॥

સાર્ધેન દ્વિસહસ્રેણ પ્રભો વર્ષૈર્વિનિર્જિતાઃ ।
ક્ષુદ્રદેવાઃ સ્વગ્રામસ્થાઃ કલિના પપલુશ્ચ તે ॥ ૧૩॥

તતઃ પઞ્ચસહસ્રેણ વર્ષૈસ્તાસ્તીર્થદેવતાઃ ।
તીર્થાનિ કલિના નાથ જિતાનિ પપલુસ્તથા ॥ ૧૪॥

તતો દશસહસ્રેણ જિતા વિષ્ણુશિવાદયઃ ।
કલિના પૃથિવીં ત્યક્ત્વા પપલુર્દેવસત્તમાઃ ॥ ૧૫॥

કર્માકર્મવિકર્માખ્યા શક્તિસ્તત્ર સ્થિતા ભવેત્ ।
વિકર્મગુણસંયુક્તા બુદ્ધમાયાત્મિકા પ્રભો ॥ ૧૬॥

ત્વમપિ ત્વાદૃશો ભૂત્વા ફલદાતા સ્થિતઃ સ્વયમ્ ।
દેવરૂપધરઃ સ્વામિન્ સદા કલિપ્રવર્તકઃ ॥ ૧૭॥

ન તે દેવસ્વરૂપં તુ કલિઃ ક્રોધસમન્વિતઃ ।
છેત્તું સમુદ્યતઃ ક્વાપિ ત્વાં ચિન્તયતિ સર્વદા ॥ ૧૮॥

તવ ચિન્તનભાવેન વયં સર્વે પરાજિતાઃ ।
કલિના દેવદેવેશ ઉપોષણયુતાઃ કૃતાઃ ॥ ૧૯॥

અધુના લેશમાત્રેણ ધર્મસ્તિષ્ઠતિ વિઘ્નપ ।
તં હનિષ્યતિ વેગેન કલિઃ પરમદારુણઃ ॥ ૨૦॥

નષ્ટે ધર્મે ગણાધીશ અધર્મઃ કેવલો મહાન્ ।
ભવિષ્યતિ પુનર્ધર્મં કિં સ્રક્ષ્યસિ ચ દેવપ ॥ ૨૧॥

અતો લેશમયં ધર્મં રક્ષસ્વ ગણનાયક ।
નોચેદ્ધર્મશરીરાસ્તુ વયં નષ્ટા ભવામહે ॥ ૨૨॥

રક્ષ રક્ષ દયાસિન્ધો ધૂમ્રવર્ણ ગજાનન ।
મૃત્યુપ્રાયાનનાથાંશ્ચ દેવાન્ ધર્મપ્રરક્ષકાન્ ॥ ૨૩॥

એવમુક્ત્વા ગણાધીશં પ્રણેમુરમરાઃ પુનઃ ।
રુરુદુર્દુઃખસંયુક્તાંસ્તાન્ જગાદ ગજાનનઃ ॥ ૨૪॥

ધૂમ્રવર્ણ ઉવાચ ।
મા ભયં કુરુત પ્રાજ્ઞા ધર્મં સંરક્ષયામ્યહમ્ ।
સર્વૈરજેયમુગ્રં તં કલિં હત્વા વિશેષતઃ ॥ ૨૫॥

ભવત્કૃતમિદં સ્તોત્રં કલિદોષહરં ભવેત્ ।
પઠતે શૃણ્વતે દેવાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૬॥

ધનધાન્યપ્રદં ચૈવારોગ્યસમ્પત્પ્રવર્ધનમ્ ।
પુત્રપૌત્રકલત્રાદિદાયકં પ્રભવિષ્યતિ ॥ ૨૭॥

એવમુક્ત્વા સ્વદેહાત્ સ ધૂમ્રવર્ણઃ પ્રતાપવાન્ ।
નિર્મમે વિવિધાં સેનાં નાનાશસ્ત્રસમન્વિતામ્ ॥ ૨૮॥

(Page ખં. ૮ અ. ૧૬ પાન ૩૮)
નાનાવાહનગાં પૂર્ણતેજોયુક્તાં મહર્ષયઃ ।
તયા યુક્તો જનાન્ સર્વાન્ જઘાન મલિનાન્ પ્રભુઃ ॥ ૨૯॥

મ્લેચ્છપ્રાયાંશ્ચ વિવિધાન્ મ્લેચ્છાન્ કલિમલૈર્યુતાન્ ।
સ્વયં સન્ત્રાસયામાસ કલિં ધર્મવધે રતમ્ ॥ ૩૦॥

તસ્યાઙ્ગવાયુના સ્પૃષ્ટા જના ધર્મપરાયણાઃ ।
ભયયુક્તા ગણેશં તે શરણં જગ્મુરાદરાત્ ॥ ૩૧॥

કલિર્ગુપ્તસ્વરૂપેણ યુયુધે જનસંશ્રિતઃ ।

ગણેશૈઃ સંહતઃ સોઽપિ બભૂવ હ હતોદ્યમઃ ॥ ૩૨॥

તતો ભયસમાયુક્તં ત્યક્ત્વા હૃજ્જન્મિનાં કલિઃ ।
દેહધારી સમાગત્ય ધૂમ્રવર્ણં નનામ સઃ ॥ ૩૩॥

તુષ્ટાવ પૂજ્ય તં નત્વા ધૂમ્રવર્ણં મહાબલમ્ ।
જ્ઞાત્વા વિઘ્નેશ્વરં ભક્ત્યા હૃષ્ટરોમા મહાયશાઃ ॥ ૩૪॥

કલિરુવાચ ।
ધૂમ્રવર્ણ નમસ્તુભ્યં સર્વેભ્યઃ સુખદાયક ।
નાનારૂપધરાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૫॥

અનન્તપાદહસ્તાયાનન્તબાહુધરાય તે ।
અનન્તમાયયા ગુપ્તપ્રચારિણે નમો નમઃ ॥ ૩૬॥

હેરમ્બાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
અભક્તભયદાત્રે તે ગણેશાય નમો નમઃ ॥ ૩૭॥

આદિમધ્યાન્તહીનાયાદિમધ્યાન્તભયાય તે ।
આનન્દેભ્યઃ સદાનન્દદાયિને વૈ નમો નમઃ ॥ ૩૮॥

માયાહીનાય માયાયા આધારાય પરાત્મને ।
માયિભ્યો માયયા મોહદાયિને તે નમો નમઃ ॥ ૩૯॥

કર્મણાં ફલદાત્રે તે જ્ઞાનિભ્યો જ્ઞાનદાયિને ।
આનન્દેભ્યઃ સદાનન્દદાયિને વૈ નમો નમઃ ॥ ૪૦॥

સહજાય નમસ્તુભ્યં સ્વાનન્દાય સમાધયે ।
યોગાય યોગનાથાય બ્રહ્મેશાય નમો નમઃ ॥ ૪૧॥

કસ્ત્વાં સ્તોતું સમર્થઃ સ્યાદ્યત્ર શાન્તિં ગતાઃ પ્રભો ।
વેદાદયો નમામ્યેવ તેન તુષ્ટો ભવાધુના ॥ ૪૨॥

રક્ષ માં ગણનાથ ત્વં દાસં શરણમાગતમ્ ।
અજ્ઞાનયુદ્ધજં દોષં ક્ષમસ્વ કરુણાનિધે ॥ ૪૩॥

એવમુક્ત્વા કલિસ્તસ્ય પાદં ગૃહ્ય પપાત હ ।
તમુવાચ ગણાધ્યક્ષઃ સ્વભક્તં શરણાર્થિનમ્ ॥ ૪૪॥

ધૂમ્રવર્ણ ઉવાચ ।
મા ભયં કુરુ ધર્મઘ્ન ન હન્મિ ત્વાં કદાચન ।

શરણં માં પ્રપન્નં ચ શ઼ૃણુ મે વચ નોહતમ્ ॥ ૪૫॥

સ્તોત્રં ત્વયા કૃતં મે યત્ કલેર્મલહરં ભવેત્ ।
પઠતે શ઼ૃણ્વતે નિત્યં સર્વકામફલપ્રદમ્ ॥ ૪૬॥

અન્તે સ્વાનન્દદં પૂર્ણં ભવિષ્યતિ કલે પરમ્ ।
દૃઢભક્તિકરં નિત્યં યોગિભ્યો યોગદાયકમ્ ॥ ૪૭॥

તિષ્ઠ ત્વં દ્વેષમુત્સૃજ્ય ધર્મસ્ય સ્વાધિકારતઃ ।
કૃતપ્રાપ્તિં વિજાનીહિ મદાજ્ઞાવશગો ભવ ॥ ૪૮॥

તથેતિ તં નમસ્કૃત્ય કલિઃ સ્વસ્થાનગોઽભવત્ ।
ધૂમ્રવર્ણો દ્વિજાન્ મુખ્યાન્ વસિષ્ઠાદીન્ સમાનયત્ ॥ ૪૯॥

પુનસ્તાન્ સ્થાપ્ય સર્વેશઃ કૃતં તૈઃ સમ્પ્રવર્તયત્ ।
સ્વયમન્તહિતો દેવઃ સર્વેભ્યઃ સુખદાયકઃ ॥ ૫૦॥

ધૂમ્રવર્ણાવતારસ્ય ચરિતં કથિતં મયા ।
સર્વસિદ્ધિપ્રદં પૂર્ણં પઠનાચ્છ્રવણાદ્ભવેત્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ધૂમ્રવર્ણકલિનિર્જયવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૮.૧૬
(Page ખં. ૮ અ. ૧૭ પાન ૩૯)

## ૮.૧૭ યુગવરપ્રદાનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સૂત સૂત મહાભાગ કથાં પાપાપહારિણીમ્ ।
વદસે યોગદાં પૂર્ણાં શ્રુત્વા તૃપ્તા વયં દ્વિજ ॥ ૧॥

પુરાણેષુ યુગાનાં તુ શ્રુત્વા ચિહ્નાનિ વિસ્મિતાઃ ।
મહાસંશયસંયુક્તા વયં જાતા વિશેષતઃ ॥ ૨॥

કૃતે સ્ત્રીણાં ચ સ્વાતન્ત્ર્યં ત્રેતાયાં બ્રહ્મણા કૃતમ્ ।
દ્વાપરે સંસ્કૃતં શ્વેતકેતુનૈકપતિશ્રિતમ્ ॥ ૩॥

ગૌતમેન કથં શપ્તા કૃતેઽહલ્યા મહાસતી ।
ઇત્યાદિબહવોઽસ્માભિર્માર્ગા દૃષ્ટાઃ કૃતે યુગે ॥ ૪॥

અન્યત્ કૃતયુગે પ્રોક્તં વર્ણાશ્રમો ન વિદ્યતે ।
એકવર્ણાઽઽશ્રમસ્થાસ્તે ભવન્ સઙ્કીર્તિતા જનાઃ ॥ ૫॥

ત્રેતાયાં ક્ષાત્રધર્મં તુ ચકાર પ્રપિતામહઃ ।
તતોઽભવન્નરા વર્ણાશ્રમસ્થાસ્તે પ્રકીર્તિતમ્ ॥ ૬॥

સૌરચાન્દ્રભવૌ વિપ્ર દ્વાપરાન્તે સ્થિતૌ નૃપૌ ।
પુનઃ કૃતયુગે પ્રાપ્તે રાજ્યં તૌ ચ કરિષ્યતઃ ॥ ૭॥

વર્ણાશ્રમવિભાગેન વર્તયિષ્યન્તિ માનવાઃ ।
કિમિદં કૌતુકં તત્ર વિરુદ્ધવાચકં પરમ્ ॥ ૮॥

યુગધર્મેણ નષ્ટાસ્તાઃ કલૌ પાપમયે ક્રિયાઃ ।
વર્ણાશ્રમવિભાગસ્થાસ્તત્ર સિદ્ધિઃ કુતોઽભવત્ ॥ ૯॥

કલૌ ચતુર્ગુણેનૈવ કર્મણા સિદ્ધિમાપ્નુયાત્ ।
નરઃ સર્વત્ર સમ્પ્રોક્તં કથં તચ્ચ ભવિષ્યતિ ॥ ૧૦॥

અતો યુગભવં સર્વં કથયસ્વ વિશેષતઃ ।
યથાતથ્યં મહાભાગ સુલભં સુગમાર્થકમ્ ॥ ૧૧॥

સૂત ઉવાચ ।
યુગા નાનાવિધાઃ પ્રોક્તા મુનિભિસ્તત્ત્વદર્શિભિઃ ।
તદર્થજ્ઞો ન મુહ્યેત મતભેદપ્રમાણતઃ ॥ ૧૨॥

તુરીયદેહગં કેચિત્ કૃતં વદન્તિ નિશ્ચિતમ્ ।
ત્રેતા સુષુપ્તિગા સ્વાપ્નં દ્વાપારં જાગૃતં કલિમ્ ॥ ૧૩॥

તત્રાત્મા ગુણપઃ પ્રોક્તો સર્વત્રૈકો મહર્ષયઃ ।
માયા સુષુપ્તિરૂપા સા નાનાકારા પ્રકીર્તિતા ॥ ૧૪॥

તસ્યાં નાનાવિધાયાં ન વ્યભિચારો ભવિષ્યતિ ।
યત્ર તત્ર સ્થિતં સ્વસ્ય પતિં પશ્યતિ સા શુભા ॥ ૧૫॥

સૂક્ષ્મં સ્થૂલં વિભિન્નં યત્તયા સૃષ્ટં વિભાગતઃ ।
તયોર્ગુણેશજં રૂપં તદાકારં વિભાતિ ચ ॥ ૧૬॥

ભિન્નભાવાત્ સમુત્પન્ને જાગૃત્સ્વપ્ને ન સંશયઃ ।
તયોઃ પતિકલત્રાદિ વ્યભિચારયુતં ભવેત્ ॥ ૧૭॥

તત્ર સંસ્થાપિતા તેન મર્યાદા શ્વેતકેતુના ।

શ્વેતં સ્વપ્નં ધ્વજો યસ્ય શ્વેતકેતુઃ સ વૈ સ્મૃતઃ ॥ ૧૮॥

અનેન યુગમાનેન જ્ઞાતવ્યં તદ્વિચક્ષણૈઃ ।
નેમે યુગા મહાવિપ્રાઃ કથિતા મુનિભિઃ પુરા ॥ ૧૯॥

ધ્યાનં કૃતયુગં કેચિત્ યજ્ઞં ત્રેતાં વદન્તિ ચ ।
આચારં દ્વાપરં દેહવિષયં કલિમેવ ચ ॥ ૨૦॥

તત્ર ધ્યાને મહાભાગા એકવર્ણાશ્રમો ભવેત્ ।
જ્ઞાનં તદેવ જ્ઞાતવ્યમેકરૂપધરં સદા ॥ ૨૧॥

યજ્ઞઃ કર્મમયઃ પ્રોક્તસ્તત્ર વર્ણાશ્રમો ભવેત્ ।
અતો વર્ણાશ્રમાચારસ્ત્રેતાયાં પરિકીર્તિતઃ ॥ ૨૨॥

એવં નાના વિચારેણ મુનિભિઃ કથિતં પુરા ।
ન તત્ર સંશયઃ કાર્યો જનૈસ્તદર્થયુક્તિભિઃ ॥ ૨૩॥

અધુના યુગમાહાત્મ્યં કથયામિ સમાસતઃ ।
કલૌ સિદ્ધિકરં ચૈવ કર્મ યેન પ્રજાયતે ॥ ૨૪॥

આદૌ બ્રહ્માઽસૃજત્ કાલં ધર્માધર્મવ્યવસ્થયા ।
સ ચતુર્ધાઽભવત્તત્ર યુગરૂપઃ પુરાતનઃ ॥ ૨૫॥

કૃતં ત્રેતા દ્વાપરશ્ચ કલિશ્ચેતિ મહર્ષયઃ ।
તેભ્યઃ સિદ્ધિપ્રદાનાર્થં દદૌ મન્ત્રાન્ પ્રજાપતિઃ ॥ ૨૬॥

(Page ખં. ૮ અ. ૧૭ પાન ૪૦)
તં પ્રણમ્ય યયુઃ સર્વે તપસે વનમુત્તમમ્ ।
ગણેશં ચેતસિ ધ્યાત્વા જેપુર્મન્ત્રં યુગાનિ ચ ॥ ૨૭॥

નિરાહારપ્રભાવેણ પરિતુષ્ટો ગજાનનઃ ।
ભક્ત્યા તેષાં યયૌ વર્ષસહસ્રે વરદઃ પુરઃ ॥ ૨૮॥

તમાગતં સમાલોક્ય પ્રણેમુસ્તે ગણાધિપમ્ ।
પૂજ્ય તે તુષ્ટુવુઃ સર્વે હર્ષગદ્ગદભાષણાઃ ॥ ૨૯॥

યુગપુરુષા ઊચુઃ ।
ગણેશાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
નાનારૂપભૃતે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૦॥

ભક્તેભ્યઃ સર્વદાયૈવાભક્તાનાં નાશનાય ચ ।

પરેશાય પરાણાં તે પરાય ચ નમો નમઃ ॥ ૩૧॥

સ્વાનન્દવાસિને તુભ્યં નાનામાયાપ્રચારિણે ।
સદા સ્વાનદમ્ભોગસ્થ પાલકાય નમો નમઃ ॥ ૩૨॥

અમેયશક્તયે તુભ્યં નાનામાયાપ્રહારિણે ।
માયિભ્યો મોહદાત્રે વૈ માયિને તે નમો નમઃ ॥ ૩૩॥

લમ્બોદરાય લોકાનામુદરસ્થાય તે નમઃ ।
એકદન્તાય શૂર્પાકારકર્ણાય નમો નમઃ ॥ ૩૪॥

ત્રિનેત્રાય ગજાકારવક્ત્રાય પરમાત્મને ।
ચતુર્ભુજાય સર્વેષામાદિપૂજ્યાય વૈ નમઃ ॥ ૩૫॥

દેવાય દેવરૂપાય દેવદેવાય તે નમઃ ।
દેવદેવેશકાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૬॥

સર્વેષાં જ્યેષ્ઠરૂપાય માત્રે પિત્રે નમો નમઃ ।
સતતં સર્વપૂજ્યાય બ્રહ્મનિષ્ઠાય તે નમઃ ॥ ૩૭॥

બ્રહ્મણે બ્રહ્મણાં નાથ બ્રહ્મભૂયપ્રદાય ચ ।
બ્રહ્મભ્યો બ્રહ્મદાત્રે તે શાન્તિસ્થાય નમો નમાઃ ॥ ૩૮॥

કિં સ્તુમસ્ત્વાં ગણેશાન યત્ર વેદાઃ શિવાદયઃ ।
યોગરૂપા ભવન્તિ સ્મ તતસ્તે નમનં શુભમ્ ॥ ૩૯॥

એવમુક્ત્વા પ્રણેમુસ્તે યુગા ગણપતિં દ્વિજ ।
સ તાનુવાચ પ્રીતાત્મા ભક્તવાત્સલ્યયન્ત્રિતઃ ॥ ૪૦॥

શ્રીગણેશ ઉવાચ ।
સ્તોત્રં ભવત્કૃતં મે યત્ સર્વદં પ્રભવિષ્યતિ ।
પઠનાચ્છ્રવણાત્ નૃભ્યો મત્પ્રીતિદાયકં ભવેત્ ॥ ૪૧॥

યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રતોષિતઃ ।
ભુક્તિમુક્તિપ્રદં ભાવિ સર્વમાન્યં યુગાઃ કિલ ॥ ૪૨॥

વરાન્ બ્રૂત મહાભાગા દદામિ મનસેપ્સિતાન્ ।
તપસા સ્તોત્રમુખ્યેન તુષ્ટો ભક્ત્યા વિશેષતઃ ॥ ૪૩॥

યુગા ઊચુઃ ।
યથા સંરચિતા દેવ ગજાનન વયં ત્વયા ।

સામર્થ્યમતુલં દેહિ તથા તે ભક્તિમુત્તમામ્ ॥ ૪૪॥

કૃત ઉવાચ ।
સદા સત્ત્વયુતં માં ત્વં કુરુ કર્મપરાયણમ્ ।
સ્વધર્મરુચિસંયુક્તં પ્રભો મોક્ષાર્થમુદ્યતમ્ ॥ ૪૫॥

ત્રેતોવાચ ।
ભુક્તિમુક્તિપ્રિયાં માં ચ કુરુ સત્ત્વરજોયુતામ્ ।
તદર્થં ધર્મનિષ્ઠત્વં ગજાનન નમોઽસ્તુ તે ॥ ૪૬॥

દ્વાપર ઉવાચ ।
ભુક્તિસૌખ્યયુતં માં ત્વં કુરુ ધર્મપરાયણમ્ ।
ભોગબુદ્ધિપરાર્થં ચ રજસ્તમોયુતં પ્રભો ॥ ૪૭॥

કલિરુવાચ ।
તામસં દેહભોગાર્થમુદ્યતં સતતં પ્રભો ।
વિકર્મરુચિસંયુક્તં માં કુરુષ્વ ગજાનન ॥ ૪૮॥

પુનસ્તે તં વદન્તિ સ્મ યુગા હર્ષસમન્વિતાઃ ।
એકૈકાશ્રિતભાવેન ભો કુરુષ્વ નિરન્તરમ્ ॥ ૪૯॥

તેષાં તદ્વચનં શ્રુત્વા ગણેશસ્તાનુવાચ હ ।
મેઘગમ્ભીરયા વાચા સર્વેભ્યઃ સુખદાયકઃ ॥ ૫૦॥

શ્રીગણેશ ઉવાચ ।
લક્ષાંશેન કૃતે પ્રાપ્તે કલિસ્તત્ર ભવિષ્યતિ ।
શતાંશેન ચ સા ત્રેતા દ્વાપરસ્ત્વયુતાંશતઃ ॥ ૫૧॥

યદા ત્રેતાયુગં પ્રાપ્તં શતાંશેન તદા કૃતમ્ ।
(Page ખં. ૮ અ. ૧૮ પાન ૪૧)
સહસ્રાંશેન તત્રૈવ દ્વાપરઃ પ્રભવિષ્યતિ ॥ ૫૨॥

અયુતાંશેન પાપિષ્ઠઃ કલિસ્તેન સમન્વિતઃ ।
ચરિષ્યતિ ન સન્દેહઃ પરસ્પરપ્રવેશનાત્ ॥ ૫૩॥

દ્વાપરે સમનુપ્રાપ્તે શતાંશેન ભવિષ્યતિ ।
કલિઃ સહસ્રભાગાત્રેતાયુતાંશં કૃતં ભવેત્ ॥ ૫૪॥

કલૌ શતાંશરૂપેણ દ્વાપરઃ પ્રભવિષ્યતિ ।

સહસ્રભાગાત્રેતા ચ લક્ષાંશેન કૃતં ભવેત્ ॥ ૫૫॥

ધર્માઽધર્માવિચારેણ મોહદઃ સ કલિઃ સ્મૃતઃ ।
ધર્મજ્ઞો મોહકર્માઽસૌ દ્વાપરઃ પરિકીર્તિતઃ ॥ ૫૬॥

યશાઃ પ્રિયા સ્વધર્મસ્થાસ્ત્રેતા સર્વત્ર સમ્મતા ।
મુક્તિપ્રિયં કૃતયુગં સ્વધર્મસ્થં પ્રકીર્તિતમ્ ॥ ૫૭॥

એવં ક્રમેણ સર્વત્ર ભવિષ્યથ યુગાઃ પ્રિયાઃ ।
માં જ્ઞાત્વા બન્ધહીનાશ્ચ વાઞ્છિતાર્થપ્રદાયકાઃ ॥ ૫૮॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ગણવલ્લભઃ ।
યુગા હર્ષસમાયુક્તાઃ સ્વસ્વકર્મપરાઃ બભુઃ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે યુગવરપ્રદાનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૮.૧૭

## ૮.૧૮ યુગપ્રભાવકર્મસિદ્ધિવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
કૃતે કલિમુખાશ્ચૈવ યુગાઃ સન્તિ મહર્ષયઃ ।
કૃતાજ્ઞાપાલકાઃ સર્વે કૃતમાનભયાર્દિતાઃ ॥ ૧॥

તત્રાયુઃ કૃતતુલ્યં વૈ સર્વેષાં જન્મિનાં સદા ।
પાપાચારાદિયુક્તાનાં સર્વં કૃતસમં ભવેત્ ॥ ૨॥

શાપાદિકં નરાણાં તુ સફલં કૃતભાવતઃ ।
ભવતે પાપિનામેવ યથા સુકૃતિનાં વચઃ ॥ ૩॥

તત્ર ભેદં પ્રવક્ષ્યામિ નરોઽપરાધસંયુતઃ ।
ન ભવેચ્છાપભીતઃ સન્ કૃતે યુગપ્રમાણતઃ ॥ ૪॥

તદ્વત્ ત્રેતાયુગે વિપ્ર યુગાસ્ત્રયઃ કૃતાદયઃ ।
વર્તન્તે ભયસંયુક્તાસ્ત્રેતાયાં નાત્ર સંશયઃ ॥ ૫॥

પાપિનાં સુકૃતિનાં ચાયુરાદિ તત્ સમં ભવેત્ ।
ત્રેતાયુગપ્રમાણેન જ્ઞાતવ્યં દ્વિજસત્તમ ॥ ૬॥

દ્વાપારે દ્વાપરાજ્ઞાયાં સંસ્થિતાસ્તે યુગાસ્ત્રયઃ ।

તેન સર્વં તદાકારં ફલં ભવતિ કર્મજમ્ ॥ ૭॥

આયુરાદિ નરાણાં ચ દ્વાપરેણ સમં ભવેત્ ।
નાનાભાવાસ્તદાકારા મયા વક્તું ન શક્યતે ॥ ૮॥

કલૌ યુગાસ્ત્રયસ્તે તુ તદાજ્ઞાવશવર્તિનઃ ।
વર્તન્તે તેન કર્માદિફલં કલિસમં ભવેત્ ॥ ૯॥

આયુરાદિ મહર્ષે તુ કલિતુલ્યં ન સંશયઃ ।
સુકૃતિનાં મહાપાપિનાં યુગસ્ય પ્રમાણતઃ ॥ ૧૦॥

અતો લેશમયી સિદ્ધિઃ કલૌ સત્કર્મકારિણામ્ ।
ભવિષ્યતિ તથા સર્વમાસુરેણ હતં ભવેત્ ॥ ૧૧॥

યોગઃ શાન્તિપ્રદઃ પ્રોક્તઃ સ એવ મુનિસત્તમ ।
ચતુર્ષુ યુગધર્મેષુ સમરૂપો ભવિષ્યતિ ॥ ૧૨॥

કૃતે કર્મ કૃતં ચૈકફલદં શાસ્ત્રસમ્મતે ।
ત્રેતાયાં તદ્દશાધિક્યં દ્વાપારે તુ શતાધિકમ્ ॥ ૧૩॥

(Page ખં. ૮ અ. ૧૮ પાન ૪૨)
સહસ્રગુણસંયુક્તં ભવતે સર્વમઞ્જસા ।
કલૌ યુગેન સન્દેહો ગણેશવરદાનતઃ ॥ ૧૪॥

કલૌ તાવન્મયં પ્રોક્તં વિકર્મકૃતમઞ્જસા ।
ફલદં દ્વાપરે તચ્ચ દશાધિક્યં ભવેત્ પરમ્ ॥ ૧૫॥

ત્રેતાયાં તચ્છતાધિક્યં કૃતે સાહસ્રકં ભવેત્ ।
યુગમાનસ્ય માહાત્મ્યાન્નિશ્ચિતં મુનિભિઃ પુરા ॥ ૧૬॥

એવં નાનાપ્રમાણાનિ યુગેષુ કથિતાનિ ચ ।
કથિતં તત્ પુરા વિપ્રાઃ પુરાણેષુ સમાસતઃ ॥ ૧૭॥

અથ સિદ્ધિં પ્રવક્ષ્યામિ કલૌ સર્વાર્થદાયિનીમ્ ।
યથાઽઽચારયુતં કર્મ ફલદં તત્ ક્ષણાદ્ભવેત્ ॥ ૧૮॥

આસુરેણ સ્વભાવેન કલિના સર્વમાવૃતમ્ ।
ફલં કર્મભવં વિપ્ર તસ્માત્ ન ફલદં ભવેત્ ॥ ૧૯॥

કર્મસિદ્ધિં કલૌ તત્ર યદીચ્છતિ જનો હૃદિ ।
સર્વાદાવયુતં કુર્યાત્ ગાયત્રીસમ્ભવં જપમ્ ॥ ૨૦॥

હવિષ્યાન્નં તુ ભુક્ત્વા સ એકભુક્તપરાયણઃ ।
બ્રહ્મચર્યયુતો જન્તુઃ સત્યભાષી જિતેન્દ્રિયઃ ॥ ૨૧॥

શૌચાચારસમાયુક્તો દ્વેષાદિ સ પરિત્યજેત્ ।
મનસાઽપિ સ્ત્રિયં નૈવ ભોગાર્થં સંસ્મરેત્ કદા ॥ ૨૨॥

યદા દેહં સમાગૃહ્ય નરઃ કર્મપરાયણઃ ।
મનસા વિષયં ચેચ્છેત્તદા સિદ્ધિઃ કથં ભવેત્ ॥ ૨૩॥

એવમાદિ સ્વધર્મસ્થાં ક્રિયાં કૃત્વા મહાયશાઃ ।
ગાયત્ર્યાશ્ચ જપં કુર્યાત્તેન વિપ્રત્વવાન્ ભવેત્ ॥ ૨૪॥

તતઃ કૃચ્છ્રં સમા કુર્યાત્તતઃ કર્મ સમાચરેત્ ।
સ સર્વકલિદોષેણ મુક્તઃ સિદ્ધિમવાપ્નુયાત્ ॥ ૨૫॥

યથોક્તવિધિના કર્મ કૃતં યેન મહાત્મના ।
ચતુર્ગણં કલૌ વિપ્રાઃ સિદ્ધિદં તત્ ક્ષણાદ્ભવેત્ ॥ ૨૬॥

આસુરેણ સ્વભાવેન કૃતં કર્મ દ્વિજાદિભિઃ ।
કથં સિદ્ધિપ્રદં તત્ર ભવિષ્યતિ કલૌ યુગે ॥ ૨૭॥

કેવલાસુરભાવેન સત્કર્મ માનવેન ચ ।
સહસ્રગુણિતં હર્ષાત્ કૃતમાસુરગં ભવેત્ ॥ ૨૮॥

સુરાસુરસ્વભાવેન કૃતં કર્મ શુભાશુભમ્ ।
સુરાસુરભવં સૌખ્યપ્રદં તચ્ચ ભવેત્ નૃણામ્ ॥ ૨૯॥

એવં સર્વં સમાખ્યાતં યુગધર્મરહસ્યકમ્ ।
સઙ્ક્ષેપેણ કલૌ તદ્વત્ સિદ્ધિદં મુનિસત્તમ ॥ ૩૦॥

શ ृણુયાદિદમાખ્યાનં યુગાનાં માનવઃ પરમ્ ।
પઠેદ્વા પાઠયેત્ સોઽપિ દોષહીનો ભવેત્તતઃ ॥ ૩૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે યુગપ્રભાવકર્મસિદ્ધિવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૮.૧૮
(Page ખં. ૮ અ. ૧૯ પાન ૪૩)

## ૮.૧૯ સમાસવત્સરચરિતં નામૈકોનવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
માસાનાં ચરિતં બ્રૂહિ સૂત સર્વાર્થકોવિદ ।
મલમાસે ગણેશસ્ય પૂજનં કીદૃશં ભવેત્ ॥ ૧॥

સૂત ઉવાચ ।
બ્રહ્મણોઽઙ્ગસમુત્પન્નઃ સંવત્સરઃ પ્રતાપવાન્ ।
માસા દ્વાદશ તસ્યાંઽગાત્ સમુત્પન્નાઃ પુરા મુને ॥ ૨॥

છાયાયા મલમાસશ્ચ સમુત્પન્નઃ શુભપ્રદઃ ।
સહ તૈર્ગણપં ધ્યાત્વા તપસ્તેપે સ વત્સરઃ ॥ ૩॥

ષડક્ષરં મહામન્ત્રં જજાપ બ્રહ્મણોદિતમ્ ।
ગણેશસ્ય સદા ધ્યાનં ચકાર હર્ષસંયુતઃ ॥ ૪॥

એવં વર્ષસહસ્રેણ પ્રસન્નો વરદોઽભવત્ ।
તમાયયૌ ગણાધીશો ભક્તં ભક્તજનપ્રિયઃ ॥ ૫॥

ઉવાચ તં સમાધિસ્થં સંવત્સરં ગજાનનઃ ।
સમાસ ત્વં વરાન્ બ્રૂહિ પરાન્ મત્તો હૃદીપ્સિતાન્ ॥ ૬॥

ગણેશવચનં શ્રુત્વા સંવત્સરો બુબોધ તમ્ ।
સમુત્થાય ગણેશાનં નનામ ભક્તિસંયુતઃ ॥ ૭॥

સમાસઃ પૂજયામાસ યથાવિધ્યુપચારતઃ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટાવ કરસમ્પુટઃ ॥ ૮॥

સમાસસંવત્સર ઉવાચ ।
નમસ્તે ધૂમ્રવર્ણાય વક્રતુણ્ડાય ઢુણ્ઢયે ।
હેરમ્બાય પરેશાય વિઘ્નેશાય નમો નમઃ ॥ ૯॥

શૂર્પકર્ણાય સર્વેષાં પૂજ્યાય પરમાત્મને ।
લમ્બોદરાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૧૦॥

અનાથાનાં સુનાથાય પાત્રે હર્ત્રે નમો નમઃ ।
કર્ત્રે ત્રિગુણરૂપાય ગુણહીનાય તે નમઃ ॥ ૧૧॥

આદિમધ્યાન્તસંસ્થાયાદિમધ્યાન્તવિવર્જિત ।

ગણેશાય ગણાનાં તે ચાલકાય નમો નમઃ ॥ ૧૨॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મભ્યો બ્રહ્મદાયિને ।
બ્રહ્મણે બ્રહ્મભૂતાય બ્રહ્મિષ્ઠાય નમો નમઃ ॥ ૧૩॥

સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં સર્વેશાય નમો નમઃ ॥ ૧૪॥

અનન્તવિભવાયૈવાનન્તમાયાપ્રચારિણે ।
માયિને માયિનાં મોહદાત્રે માયાસ્વરૂપિણે ॥ ૧૫॥

શાન્તિયોગમયાયૈવ શાન્તિયોગધરાય તે ।
શાન્તિયોગપ્રદાત્રે ચ યોગેશાય નમો નમઃ ॥ ૧૬॥

કિં સ્તૌમિ ત્વાં ગણાધીશ ચિન્તામણિસ્વરૂપિણે ।
યોગિનઃ શાન્તિમાપન્ના વેદા યત્ર વિશેષતઃ ॥ ૧૭॥

અતો નમામ્યહં નાથ તેન તુષ્ટો ભવ પ્રભો ।
વરાન્ દેહિ સ્વકાર્યાણાં સિદ્ધિદાન્ સુખદાયકાન્ ॥ ૧૮॥

ભક્તિં તે ચરણે નિત્યં દેહિ સર્વભયાપહામ્ ।
કાલમાનકરં ઢુણ્ઢે વીર્યં દેહિ સ્વભાવજમ્ ॥ ૧૯॥

કર્મ માસાદિષુ પ્રાજ્ઞૈઃ કૃતં તચ્છુભદં ભવેત્ ।
સાક્ષિત્વં કર્મણાં દેહિ સાધુપાદપ્રપૂજનમ્ ॥ ૨૦॥

એવમુક્ત્વા પ્રણેમુસ્તં માસાઃ સંવત્સરાન્વિતાઃ ।
તાનુવાચ ગણાધ્યક્ષો વચઃ સ્તોત્રેણ તોષિતઃ ॥ ૨૧॥

શ્રીગણેશ ઉવાચ ।
યદ્યત્ સમ્પ્રાર્થિતં માસાઃ સંવત્સર તથાસ્તુ વૈ ।
સર્વગાઃ કાલરૂપસ્થા ભવિષ્યથ ન સંશયઃ ॥ ૨૨॥

સૂર્યેણ સંયુતાઃ સર્વે દ્વાદશદેહધારિણા ।
ફલદાઃ કર્મણાં ચૈવ ભવિષ્યથ વિશેષતઃ ॥ ૨૩॥

બ્રહ્માર્પણતયા કર્મ યદ્ભવત્સુ કૃતં નરૈઃ ।
અન્તે સલોકતાં તેભ્યો દાતારશ્ચ ભવિષ્યથ ॥ ૨૪॥

યાથાતથ્યવિભાગેન સાક્ષિણઃ સર્વજન્મિનામ્ ।
ભવિષ્યથ તથા ભક્તા મયિ મોહવિવર્જિતાઃ ॥ ૨૫॥

આદિત્યેન પરિત્યક્તોऽધિમાસસ્ત્વં ભવિષ્યસિ ।
દેવતાऽહં ત્વદીયે તુ કર્મણાં ફલદાયકઃ ॥ ૨૬॥

(Page ખં. ૮ અ. ૨૦ પાન ૪૪)
સર્વેષુ મલરૂપં યત્ કૃતં માસેષુ માનવૈઃ ।
નાનાભાવયુતં તેભ્યોऽહં ભવામિ ફલપ્રદઃ ॥ ૨૭॥

ત્વદીયે કાલભાવે તુ કર્મ યન્ માનવૈઃ કૃતમ્ ।
નાનાભાવયુતં તેભ્યોऽહં ભવામિ ફલપ્રદઃ ॥ ૨૮॥

ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં નૃણાં ભાવપૂરં ન સંશયઃ ॥ ૨૯॥

કાલદોષભવં પાપં કાલસ્યોલ્લઙ્ઘનાદિકમ્ ।
હરામ્યનેન સ્તોત્રેણ તુષ્ટોऽહં ભુક્તિમુક્તિદઃ ॥ ૩૦॥

એવમુક્ત્વાંऽતર્દધેऽસૌ ગણેશો ગણવલ્લભઃ ।
સંવત્સરઃ પ્રસન્નાત્મા સ્વકાર્યનિરતોऽભવત્ ॥ ૩૧॥

માસાઃ સ્વકાર્યસામર્થ્યયુક્તા હૃષ્ટા બભૂવિરે ।
કાલભાવધરાઃ સર્વે સાક્ષિણઃ સર્વકર્મણામ્ ॥ ૩૨॥

એતત્ સંવત્સરસ્યૈવ સમાસસ્ય ચરિત્રકમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાऽપિ સ કાલસુખમાપ્નુયાત્ ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે સમાસવત્સરચરિતં નામૈકોનવિંશોऽધ્યાયઃ ॥ ૮.૧૯

## ૮.૨૦ મલમાસાદિમાસેભ્યો વરપ્રદાનં નામ વિંશતિતમોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
તતો બહૌ ગતે કાલે માસાઃ ષટ્ તપસિ સ્થિતાઃ ।
નિરાહારપરાઃ સર્વે ગણેશં સમતોષયન્ ॥ ૧॥

કાર્તિકો માર્ગશીર્ષશ્ચ માઘો વૈશાખશ્રાવણૌ ।
અધિમાસસ્તથા વિપ્ર ગણેશધ્યાનતત્પરઃ ॥ ૨॥

દશવર્ષેષુ વિઘ્નેશસ્તાન્ યયૌ વરદાયકઃ ।
સ્તુતઃ સમ્પૂજિતસ્તૈસ્તુ વરાન્ બ્રૂત સ ચાબ્રવીત્ ॥ ૩॥

ગણેશવચનં શ્રુત્વા માસાસ્તં પ્રણિપત્ય ચ ।
ઊચુઃ પ્રહૃષ્ટચિત્તાસ્તે ભક્ત્યા નમ્રાત્મકન્ધરાઃ ॥ ૪॥

માસા ઊચુઃ ।
યદિ વિઘ્નેશ સર્વેશ વરદોઽસિ તદા પ્રભો ।
અસ્માસુ યત્કૃતં કર્મ બહુલં કુરુ સર્વદા ॥ ૫॥

તેનાસ્મત્કાલસમ્પ્રાપ્તૌ નરા યત્નપરાયણાઃ ।
ભવિષ્યન્તિ વિશેષેણ સદા સત્કર્મકારિણઃ ॥ ૬॥

તદ્ભક્તિનિલયાન્નિત્યં કુરુ નો ગણનાયક ।
ત્વદ્દાસપ્રવણાંસ્તદ્વત્ કર્મદોષવિવર્જિતાન્ ॥ ૭॥

શ્રીગણેશ ઉવાચ ।
અન્યેષુ સર્વમાસેષુ કૃતં કર્મ તદાત્મકમ્ ।
ફલદં સમ્મતં શાસ્ત્રે મદીયવરદાનતઃ ॥ ૮॥

તેભ્યો દશાધિકં કર્મ ફલદં પ્રભવિષ્યતિ ।
માર્ગશીર્ષે કૃતં માસાઃ શુભદં માનવૈઃ કિલ ॥ ૯॥

તસ્માદ્વૈશાખમાસે તદ્ભવિષ્યતિ દશાધિકમ્ ।
તસ્માત્ કાર્તિકિકે માસે દશાધિકફલપ્રદમ્ ॥ ૧૦॥

તસ્માદ્દશાધિકં માઘે કર્મ યન્માનવૈઃ કૃતમ્ ।
તસ્માદ્દશાધિકં ભાવિ શ્રાવણે ફલદં ભવેત્ ॥ ૧૧॥

તસ્માદ્દશાધિકં પ્રોક્તં ઢૌણ્ઢે માસે ફલપ્રદમ્ ।
એવં ક્રમેણ શ્રેષ્ઠા વૈ ભવિષ્યથ યથા તપઃ ॥ ૧૨॥

અધિમાસસ્ય દેવોઽહં ઢુણ્ઢિરાજો ન સંશયઃ ।
ઢૌણ્ઢમાસઃ સમાખ્યાતો મયા નામ્નાઽધુના મહાન્ ॥ ૧૩॥

(Page ખં. ૮ અ. ૨૧ પાન ૪૫)
અમાચિહ્નેન સંયુક્તઃ શ્રાવણો મે પ્રિયોઽધિકઃ ।
નાનાસિદ્ધિપ્રદો ભાવી હ્યનુષ્ઠાનવતાં નૃણામ્ ॥ ૧૪॥

ઉપાસતે શ્રાવણે માં નાનાયત્નપરાયણાઃ ।

ઉપોષણયુતા ભાદ્રે ચતુર્દિનાનિ માનવાઃ ॥ ૧૫॥

સમારભ્ય પ્રતિપદં ચતુર્થ્યન્તં મદર્ચનમ્ ।
ચતુર્થ્યાં જાગરં કુર્યાત્ પઞ્ચમ્યાં પારણં તથા ॥ ૧૬॥

યથાશક્તિ દ્વિજાન્ ભોજ્ય દદ્યાદ્વિપુલદક્ષિણામ્ ।
સ સર્વસુખમાભોજ્યાન્તે સ્વાનન્દમવાપ્નુયાત્ ॥ ૧૭॥

મુખ્યં પઞ્ચસુ વૈ સ્નાનં માસેષુ સર્વભાવતઃ ।
પ્રાતઃકાલે વિશેષેણાનુષ્ઠાનં શ્રાવણે મતમ્ ॥ ૧૮॥

એવં માસા ભવન્તોઽપિ ભવિષ્યન્તિ જનૈઃ સદા ।
સત્કર્મભિર્મહાભાગાઃ સેવિતાઃ સતતં પરાઃ ॥ ૧૯॥

મયિ ભક્તિયુતા નિત્યં સર્વદેવપરાયણાઃ ।
ભવિષ્યથ મદીયેન વરેણૈવ વિશેષતઃ ॥ ૨૦॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ભક્તવત્સલઃ ।
માસા હર્ષસમાયુક્તાઃ સ્વસ્વકાર્યરતા બભુઃ ॥ ૨૧॥

શૃણોતિ માસચારિત્રમેવં પઠતિ યો નરઃ ।
સ માસફલસંયુક્તો ગાણેશો ભવતીત્યહો ॥ ૨૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે મલમાસાદિમાસેભ્યો વરપ્રદાનં નામ વિંશતિતમોઽધ્યાયઃ ॥ ૮.૨૦

## ૮.૨૧ ધૂમ્રમહિમાવર્ણનં નામ એકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ષટ્સુ માસેષુ વિઘ્નેશઃ પૂજનીયો નરૈઃ કથમ્ ।
તેષુ મુખ્યપ્રકારેણ તુષ્ટઃ કેન ગજાનનઃ ॥ ૧॥

કે કે સિદ્ધિં ગતાસ્તેષુ ગણેશભજનેન વૈ ।
તેષાં ચરિત્રકં બ્રૂહિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨॥

સૂત ઉવાચ ।
અરુણોદયકાલે વૈ સ્નાનં કુર્યાન્નરઃ સદા ।
તીર્થેષુ વ્રતસંયુક્તઃ સ્વસ્વશાખાપ્રમાણતઃ ॥ ૩॥

સ્વશાખોક્તેન માર્ગેણ સન્ધ્યાદિકં સમાચરેત્ ।
વૈદિકૈસ્તાન્ત્રિકૈર્મન્ત્રૈઃ પૂજયેદ્ગણનાયકમ્ ॥ ૪॥

પુરાણસમ્ભવૈર્વાઽપિ યથોપચારસંયુતઃ ।
એકભુક્ સ ભવેન્નિત્યં નક્તભુક્ વા ભવેન્મુને ॥ ૫॥

હવિષ્યાન્નં ફલહારો નિરાહારોઽથવા પુનઃ ।
બ્રહ્મચર્યસમાયુક્તો નખલોમયુતો ભવેત્ ॥ ૬॥

પૃથવ્યાં શયનકારી સ સત્યાવાઙ્ મૌનધારકઃ ।
યથા સ્વધર્મસંયુક્તો વ્રતં માસાત્મકં ચરેત્ ॥ ૭॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રો વાઽપિ મહામુને ।
સ્વસ્વધર્મયુતો ભૂત્વા વ્રતં માસાત્મકં ચરેત્ ॥ ૮॥

સ્ત્રીણાં વ્રતમિદં પુણ્યં સાધવાનાં સુખપ્રદમ્ ।
વિધવાનાં વિશેષેણ પરં માસાત્મકં ભવેત્ ॥ ૯॥

તેષુ પઞ્ચકમાનન્દાચ્ચરેન્ મુખ્યં સદા જનઃ ।
ગણેશપૂજનં વિપ્ર ભોજનં દીપદાનકમ્ ॥ ૧૦॥

શમીમન્દારસેવાં ચ પ્રદક્ષિણપરાયણામ્ ।
(Page ખં. ૮ અ. ૨૧ પાન ૪૬)
ગવાં શુશ્રૂષણં તદ્વત્ સર્વસિદ્ધિપ્રદં ભવેત્ ॥ ૧૧॥

એવમાદિ ગણેશસ્ય પ્રિયં નાનાવિધં ચરેત્ ।
સદા તન્નિષ્ઠભાવેન તિષ્ઠેન્ માસવ્રતી મુને ॥ ૧૨॥

અન્યાન્ શમ્ભુમુખાન્ દેવાન્ પૂજયેન્ માનવો મુને ।
સ્વસ્વેચ્છાયુતભાવેન વ્રતં માસમયં ચરેત્ ॥ ૧૩॥

આવશ્યકેન ભાવેન માસાઃ સેવ્યા ઇમે નરૈઃ ।
ધર્માર્થકામામોક્ષાણાં બ્રહ્મભૂયસ્ય દાયકાઃ ॥ ૧૪॥

યં યમિચ્છતિ તં તં વૈ લભતે નાત્ર સંશયઃ ।
માસાત્મકેન મુખ્યેન વ્રતેન માનવઃ સદા ॥ ૧૫॥

અત્રેતિહાસમુખ્યં તે કથયામિ સમાસતઃ ।
માસવ્રતેન યે સિદ્ધિં લેભિરે ભક્તિસંયુતાઃ ॥ ૧૬॥

શઙ્ખાસુરો મહાદૈત્યો બ્રહ્માણ્ડાધિપતિઃ પુરા ।

બભૂવ સ જહારૈવ વેદાન્ સ્મૃતિસમન્વિતાન્ ॥ ૧૭॥

તતો હાહા કૃતં સર્વૈઃ કર્મહીનપ્રભાવતઃ ।
વર્ણસઙ્કરજં કર્મ બભૂવે સર્વમણ્ડલે ॥ ૧૮॥

તતો મુનિગણૈર્યુક્તા દેવા વિધિમુખા યયુઃ ।
વિષ્ણું ચ શરણં સર્વે તુષ્ટુવુર્વેદહેતવે ॥ ૧૯॥

તતો વિષ્ણુઃ સ્વયં શમ્ભું જગામ તાન્ વિસૃજ્ય સઃ ।
તં જગાદ મહાભાગં વિનયેન સમન્વિતઃ ॥ ૨૦॥

વિષ્ણુરુવાચ ।
શઙ્ખં વેદહરં શમ્ભો દુર્જયં દેવતાદિભિઃ ।
જેષ્યામિ ત્વત્પ્રસાદેન તત્રોપાયં વદસ્વ મે ॥ ૨૧॥

શ્રીશિવ ઉવાચ ।
સમીપે કાર્તિકો માસો જનાર્દન સમાગતઃ ।
તત્ર માસવ્રતેન ત્વં તોષયસ્વ ગજાનનમ્ ॥ ૨૨॥

તેન વિઘ્નવિહીનસ્ત્વં વિજેષ્યસિ મહાબલમ્ ।
શઙ્ખાસુરં ન સન્દેહો નાન્યથા પુરુષોત્તમ ॥ ૨૩॥

શ્રુત્વા તં શઙ્કરં નત્વા વિષ્ણુઃ પરપુરઞ્જયઃ ।
ગતો બદરિકારણ્યં વ્રતાર્થં ભક્તિસંયુતઃ ॥ ૨૪॥

તત્રૈકાક્ષરમન્ત્રસ્ય પુરશ્ચરણમુત્તમમ્ ।
ચકાર ગણનાથં સ તોષયામાસ યત્નતઃ ॥ ૨૫॥

કાર્તિકે પઞ્ચકં સેવ્યં ગાણેશં સર્વસિદ્ધિદમ્ ।
માર્ગશીર્ષે ગણેશાનં પ્રણમ્ય પ્રયયૌ સુરાન્ ॥ ૨૬॥

તતો બુદ્ધિપતિં સ્મૃત્વા વિચારમકરોત્ હૃદિ ।
કેનોપાયેન દૈત્યેશં વિજેષ્યામિ સુદારુણમ્ ॥ ૨૭॥

તત્ર સ્ફૂર્તિઃ સમુત્પન્ના ગણેશકૃપયા હૃદિ ।
માત્સ્યેનૈવ સ્વરૂપેણ વિજયો મે ભવિષ્યતિ ॥ ૨૮॥

એતસ્મિન્નન્તરે તત્ર બભૂવાઽઽકાશજાં પરામ્ ।
વાણીં શુશ્રાવ દેવેશઃ કેશવઃ પરવીરહા ॥ ૨૯॥

માત્સ્યરૂપેણ શઙ્ખં તં જહિ સર્વભયઙ્કરમ્ ।

માં સ્મૃત્વા નાત્ર સન્દેહો વિજયસ્તે ભવિષ્યતિ ॥ ૩૦॥

તતો ગણપતિં સ્મૃત્વા મત્સ્યો ભૂત્વા જનાર્દનઃ ।
ઘોરં યુદ્ધં સ કૃત્વા તં જઘાન શઙ્ખમુલ્બણમ્ ॥ ૩૧॥

સાઙ્ગાન્ વેદાન્ સમાનાય્ય દદૌ તાન્ બ્રહ્મણે પ્રભુઃ ।
સ્તુતઃ સમ્પૂજિતો દેવૈર્મુનિભિઃ સ્વસ્થલં યયૌ ॥ ૩૨॥

એવં કાર્તિકમાસે તુ સ્નાનાદિવ્રતતેજસા ।
હતઃ શઙ્ખાસુરસ્તેન વિષ્ણુના મત્સ્યરૂપિણા ॥ ૩૩॥

અન્યચ્ચ શ઼ૃણુ વિપેન્દ્ર કથાં પાપપ્રણાશિનીમ્ ।
કાર્તિકવ્રતસંયુક્તાં પુરાતનભવાં પરામ્ ॥ ૩૪॥

પૌલસ્ત્યો બ્રાહ્મણઃ કશ્ચિત્ સોમદત્ત ઇતિ શ્રુતઃ ।
સ્વધર્મનિરતો નિત્યં તપસ્વી શુચિમાનસઃ ॥ ૩૫॥

જગામ સ ગણેશસ્ય ભક્ત્યર્થં ગૌતમં મુનિમ્ ।
(Page ખં. ૮ અ. ૨૧ પાન ૪૭)
પપ્રચ્છ વિનતો ભૂત્વા ભક્ત્યર્થં યોગિનાં વરમ્ ॥ ૩૬॥

સોમદત્ત ઉવાચ ।
કેનોપાયેન વિઘ્નેશઃ સદ્યો વૈ દૃષ્ટિગો ભવેત્ ।
ક્ષણભઙ્ગુરદેહત્વાત્તદુપાયં વદ પ્રભો ॥ ૩૭॥

ગૌતમ ઉવાચ ।
સમીપે કાર્તિકો માસઃ સમાયાતો મહામુને ।
વ્રતં માસાત્મકં કાર્યં દર્શનાર્થં મહાપ્રભોઃ ॥ ૩૮॥

એવમુક્ત્વા વિધિં તસ્મૈ કથયિત્વા દદૌ પરમ્ ।
સ્થાનં સ્વસ્યાશ્રમે સોઽપિ તત્રારમ્ભં ચકાર હ ॥ ૩૯॥

એકનિષ્ઠઃ સ્વભાવેન પરં ગાણેશપઞ્ચકમ્ ।
સેવયામાસ ભક્ત્યા સ કાર્તિકવ્રતસંયુતઃ ॥ ૪૦॥

ઉપોષણયુતસ્તત્ર ધ્યાત્વા હૃદિ ગજાનનમ્ ।
જજાપ મન્ત્રરાજં સ ષડક્ષરં શુભપ્રદમ્ ॥ ૪૧॥

તત્ર ચિત્રં સમભવત્ સમાપ્તિસમ્ભવે દિને ।
તચ્છૃણુષ્વ મહાવિપ્ર દૃઢનિશ્ચયદં ભવેત્ ॥ ૪૨॥

પૂજાયાં સંસ્થિતો વિપ્રઃ સોમદત્તો મહાયશાઃ ।
કાર્તિક્યાં પૂર્ણિમાયાં સ એકાસનવિધૌ રતઃ ॥ ૪૩॥

તત્ર દૂર્વાશમીમન્દારપુષ્પાણિ સ્થિતાનિ તુ ।
અકસ્માદ્બ્રાહ્મણઃ કશ્ચિત્તાનિ ગૃહ્ય પપાલ હ ॥ ૪૪॥

સોમદત્તઃ સ્વયં તત્ર મૌનવાનાસને સ્થિતઃ ।
નોત્થિતો નિયમે સંસ્થઃ શુશોચ ગણપં સ્મરન્ ॥ ૪૫॥

તતસ્તેન વિચારેણ તદર્થં જ્ઞાતમદ્ભુતમ્ ।
લોમાનિ દેહસંસ્થાનિ સર્વૌષધિમયાનિ ચ ॥ ૪૬॥

અતો લોમાનિ સર્વાણિ ત્વચાયુક્તાનિ ભાવતઃ ।
દાસ્યામિ ગણનાથાય દૂર્વા શમ્યાદિકારણાત્ ॥ ૪૭॥

તતઃ શસ્ત્રં સમાગૃહ્ય શિરશ્છેત્તું સમુદ્યતઃ ।
શિખાયુક્તં ગણેશાય દૂર્વાર્થં સ્વસ્ય ચાર્પયન્ ॥ ૪૮॥

સ્વકણ્ઠે શસ્ત્રઘાતં સ ચકાર ગણનાયકઃ ।
તાવત્ સમાયયૌ તત્ર બ્રાહ્મણસ્ય સ્વરૂપધૃક્ ॥ ૪૯॥

શમીમન્દારદૂર્વાદીન્ ગૃહ્ય તસ્મૈ દદૌ પુનઃ ।
ઉવાચ પૂજય ત્વં તુ ગણેશં હઠતત્પર ॥ ૫૦॥

દૃષ્ટ્વાઽતિહર્ષસંયુક્તઃ સોમદત્તો મહાયશાઃ ।
નિયમં સ્વં ચકારૈવ તમુવાચ પ્રણમ્ય તુ ॥ ૫૧॥

સોમદત્ત ઉવાચ ।
ત્વં કોઽસિ વદ માં નાથ હૃત્વા દૂર્વાદિકં પુરા ।
સમાયાતઃ પુનઃ સર્વં દત્તં મે નિયમાત્મકમ્ ॥ ૫૨॥

ન ત્વં વિપ્રોઽસિ દેવેશ સાક્ષાદ્વિઘ્નેશ્વરો ભવાન્ ।
નિશ્ચયં મે દૃઢં દૃષ્ટ્વા પરીક્ષાર્થં સમાગતઃ ॥ ૫૩॥

દર્શયસ્વ નિજં રૂપં નોચેદ્દેહં ત્યજામ્યહમ્ ।
સત્યં વદ મહાભાગ તેન તૃપ્તો ભવામિ ચ ॥ ૫૪॥

તતો વ્રતપ્રભાવેણ ભક્ત્યા નિયમયુક્તયા ।
સન્તુષ્ટો ગણરાજઃ સ દર્શયામાસ સ્વં વપુઃ ॥ ૫૫॥

ચતુર્ભુજં ત્રિનેત્રં ચ શુણ્ડાદણ્ડવિરાજિતમ્ ।

સિદ્ધિબુદ્ધિસમાયુક્તં પરશ્વાદિસુચિહ્નિતમ્ ॥ ૫૬॥

નાનાભૂષણશોભાઢ્યં શેષનાભિધરં પરમ્ ।
ચિન્તામણિં મણિં હૃત્સ્થં લમ્બોદરૈકદન્તકમ્ ॥ ૫૭॥

મૂષકોપરિ સંસ્થં તં દૃષ્ટ્વા વસ્ત્રવિરાજિતમ્ ।
નનામ સોમદત્તઃ સ હર્ષનિર્ભરમાનસઃ ॥ ૫૮॥

સરોમાઞ્ચો નનર્તાઽસૌ સાશ્રુનેત્રઃ પ્રતાપવાન્ ।
ન વિવેદ વિધિં કિઞ્ચિદ્દેહાતીત ઇવાબભૌ ॥ ૫૯॥

તતો હર્ષં સમાગૃહ્ય પૂજયામાસ તં પ્રભુમ્ ।
પુનઃ પ્રણમ્ય હેરમ્બં તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૬૦॥

સોમદત્ત ઉવાચ ।
ગણેશાય પરેશાય સદા શાન્તિપ્રદાયિને ।
યોગિનાં યોગરૂપાય હૃદિસ્થાય નમો નમઃ ॥ ૬૧॥

(Page ખં. ૮ અ. ૨૧ પાન ૪૮)
વિઘ્નેશાય મહાવિઘ્નવિઘ્નદાય પરાત્મને ।
વિઘ્નહર્ત્રે સ્વભક્તાનાં સત્તાધારાય તે નમઃ ॥ ૬૨॥

અનાદયે મહાકાલ કાલાય કાલરૂપિણે ।
અન્તે વિહારયુક્તાયાદિનાથાય નમો નમઃ ॥ ૬૩॥

વિનાયકાય દેવાય સર્વેષાં નાયકાય ચ ।
નાયકેભ્યઃ પદાદીનાં દાત્રે તુભ્યં નમો નમઃ ॥ ૬૪॥

લમ્બોદરાય સર્વેષામુદરસ્થાય તે નમઃ ।
અપારોદારભાવાય બ્રહ્મેશાય નમો નમઃ ॥ ૬૫॥

આદિમધ્યાન્તહીનાય તદાકારસ્વરૂપિણે ।
સ્વાનન્દપતયે તુભ્યં સ્વસંવેદ્યાય તે નમઃ ॥ ૬૬॥

સિદ્ધિદાત્રે સુભક્તેભ્યો દુષ્ટાનાં સિદ્ધિહારિણે ।
સિદ્ધિપતે મહાસિદ્ધિરૂપાય તે નમો નમઃ ॥ ૬૭॥

બુદ્ધિપતે સુબુદ્ધીનાં દાત્રે સાધુજનપ્રિય ।
દુર્બુદ્ધિદાયિને તુભ્યં દુષ્ટેભ્યો વૈ નમો નમઃ ॥ ૬૮॥

સમ્પ્રજ્ઞાતસ્વરૂપાયાસમ્પ્રજ્ઞાતં મહાશિરઃ ।

તયોર્યોગે નરાકાર ગજાકારાય તે નમઃ ॥ ૬૯॥

કિં સ્તૌમિ ગણનાથ ત્વાં સદા યોગસ્વરૂપિણે ।
અતસ્તે નમનં કૃત્વા કૃતકૃત્યો ભવામ્યહમ્ ॥ ૭૦॥

ધન્યોઽહં સર્વભૂતેષુ ત્વાં દૃષ્ટ્વા ગણનાયકમ્ ।
કુલં શીલં યશો ધન્યં જનકૌ તપ આશ્રમઃ ॥ ૭૧॥

ધન્યં વ્રતં ગણાધીશ મહત્ કાર્તિકમાસગમ્ ।
તસ્યાચરણમાત્રેણ ત્વં મે દૃષ્ટિગતઃ પ્રભો ॥ ૭૨॥

ભક્તિં ત્વદીયપાદેષુ દેહિ મે દ્વિરદાનન ।
નાન્યદ્યાચે ભ્રમૈર્યુક્તં ગાણપત્યપરાયણઃ ॥ ૭૩॥

તસ્ય તદ્વચનં શ્રુત્વા ગણેશસ્તમુવાચ હ ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૭૪॥

ગાણપત્યપ્રિયોઽત્યન્તં ભવિષ્યસિ મહામુને ।
ભક્તો મદીયપાદસ્ય સર્વમાન્યો ભવિષ્યસિ ॥ ૭૫॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ નૃણાં વિપ્ર પઠતાં શ ૃણ્વતાં સદા ॥ ૭૬॥

એવમુક્ત્વાંઽતર્દધેઽસૌ વિઘ્નેશઃ કરુણાનિધિઃ ।
સોમદત્તો મહાભાગો ગૌતમં પ્રણનામ હ ॥ ૭૭॥

તદાદિ સ મુનિઃ ખ્યાતો બભૂવ ગણપપ્રિયઃ ।
યોગી યોગવિદાં શ્રેષ્ઠઃ સર્વવેદાર્થતત્ત્વવિત્ ॥ ૭૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ધૂમ્રમહિમાવર્ણનં નામ એકવિંશતિતમોઽધ્યાયઃ ॥ ૮.૨૧
(Page ખં. ૮ અ. ૨૨ પાન ૪૯)

## ૮.૨૨ કાર્તિકમાસમાહાત્મ્યે નાનાનિયમનિરુપણં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
કર્ણાટે બ્રાહ્મણઃ કશ્ચિદત્રિગોત્રસમુદ્ભવઃ ।
નામ્ના સર્વપ્રિયઃ સોઽપિ કાર્તિકવ્રતમાચરત્ ॥ ૧॥

પ્રાતઃ સ્નાનં સ કૃત્વા તુ ગણેશપૂજને રતઃ ।
નિયમેન સમાવિષ્ટો ગાણપત્યપ્રિયોઽભવત્ ॥ ૨॥

તત્રૈકઃ ક્ષત્રિયઃ શુદ્ધઃ સ્નાનં કૃત્વા શમીં પરામ્ ।
જલેનાસિચ્ય ભીમાખ્યઃ પ્રદક્ષિણપરોઽભવત્ ॥ ૩॥

અન્યઃ કૈવર્તકસ્તત્ર તથા મન્દારકં મુને ।
પૂજ્ય મેઘપ્રિયઃ સ્નાત્વા પ્રદક્ષિણપરોઽભવત્ ॥ ૪॥

વૈશ્યો ગવાં પુષ્પવાહઃ શુશ્રૂષાયાં રતોઽભવત્ ।
સ્નાત્વા ગણપતિં ધ્યાત્વા ગોરૂપધરમાદરાત્ ॥ ૫॥

શૂદ્રઃ શ્યામલસંજ્ઞસ્તુ દીપદાનં ચકાર હ ।
ગણેશપ્રીતયે નિત્યં સ્નાત્વા માસવ્રતે રતઃ ॥ ૬॥

અન્યો વૈશ્યો મહાબાહુર્નામ્ના સ્નાત્વા વ્રતે સ્થિતઃ ।
બ્રાહ્મણાન્ ભોજયામાસ નિત્યં ભાવપરાયણઃ ॥ ૭॥

કારુકઃ પદ્મનામા વૈ સ્નાત્વા નિત્યં નમામ હ ।
ગણેશં ભાવસંયુક્તઃ કાર્તિકવ્રતસંસ્થિતઃ ॥ ૮॥

શૂદ્રઃ કશ્ચિન્મહીપાલો નામ્ના ગુણયુતોઽભવત્ ।
તીર્થં કાર્તિકમાસે સ જગ્રાહ ગણપસ્ય તુ ॥ ૯॥

એવં નાના જનાસ્તત્ર ગણેશપ્રીતયે મુને ।
સ્નાત્વા કિઞ્ચિત્ સ્વભાવેનાભજંસ્તં ગણનાયકમ્ ॥ ૧૦॥

રોગવન્ધ્યાદિદોષૈસ્તે મુક્તા જાતા વિશેષતઃ ।
સમાપ્તે વ્રતમુખ્યે તુ ધનધાન્યયુતા બભુઃ ॥ ૧૧॥

અન્તે સ્વાનન્દગાઃ સર્વે ગણેશં નમ્ય તત્ક્ષણાત્ ।
બ્રહ્મભૂતા બભૂવુશ્ચ કાર્તિકવ્રતપુણ્યતઃ ॥ ૧૨॥

અતઃ કાર્તિકમાસસ્થં વ્રતં કાર્યં વિશેષતઃ ।
ગણેશપ્રીતયે વિપ્ર સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૩॥

નિયમેન સમા ભક્તિર્ન ભૂતા ન ભવિષ્યતિ ।
કિઞ્ચિન્નિયમસંયુક્તો ગણેશં વશમાનયેત્ ॥ ૧૪॥

નિયમેન કૃતં કિઞ્ચિદ્ગણેશપ્રીતયે નરૈઃ ।
ભવેત્ કોટિગુણં વિપ્ર સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૫॥

કાર્તિકે સ્નાનમત્યન્તં મુખ્યં વિઘ્નેશસેવનમ્ ।
યથાશક્તિ કૃતં સર્વસિદ્ધિદં પ્રભવિષ્યતિ ॥ ૧૬॥

કરોતિ યઃ કાર્તિકે ચેત્ પઞ્ચકં ગણપપ્રિયમ્ ।
સ ગણેશપ્રિયોઽત્યન્તં ભવત્યત્ર ન સંશયઃ ॥ ૧૭॥

દાનં હોમાદિકં કિઞ્ચિત્ કાર્તિકેઽનન્તપુણ્યદમ્ ।
ભવેત્તુ ગણનાથાય ચાર્પિતં કર્મજં ફલમ્ ॥ ૧૮॥

બહુનાત્ર કિમુક્તેન કાર્તિકે નમનં સકૃત્ ।
ગણેશાય કૃતં નિત્યં તદક્ષય્યપ્રદં ભવેત્ ॥ ૧૯॥

ઇદં કાર્તિકમાસસ્ય માહાત્મ્યં કથિતં મયા ।
ગણેશલોકદં પુણ્યં ઇહ સૌખ્યપ્રદં પરમ્ ॥ ૨૦॥

યઃ શ ૃણોતિ નરો ભક્ત્યા પઠતે ભાવસંયુતઃ ।
સોઽપિ કામાનવાપ્યૈવ ગાણપત્યપ્રિયો ભવેત્ ॥ ૨૧॥

અન્યદેવપરા યે વૈ કાર્તિકવ્રતસંસ્થિતાઃ ।
તેષાં લોકસુખં સર્વમન્તે ભુઞ્જન્તિ નિશ્ચિતમ્ ॥ ૨૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે કાર્તિકમાસમાહાત્મ્યે નાનાનિયમનિરૂપણં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૮.૨૨
(Page ખં. ૮ અ. ૨૩ પાન ૫૦)

## ૮.૨૩ માર્ગશીર્ષમાસમાહાત્મ્યે વજ્રપઞ્જરકથનં નામ ત્રયોવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સઙ્ક્ષેપેણ મહાભાગ માર્ગશીર્ષભવં પરમ્ ।
માહાત્મ્યં વદ સૂત ત્વં ગણેશભક્તિદાયકમ્ ॥ ૧॥

સૂત ઉવાચ ।
અન્ધકાસુરનામા વૈ દૈત્યઃ પરમદારુણઃ ।
જિત્વા ત્રિભુવનં સર્વં ચકાર રાજ્યમુત્તમમ્ ॥ ૨॥

દેવા વનસ્થિતાઃ સર્વે ભયયુક્તાઃ વિશેષતઃ ।

વધાર્થં તસ્ય ચોદ્યુક્તા લેભિરે ન કિમપ્યહો ॥ ૩॥

તતઃ શમ્ભુઃ પરાં ચિન્તામાપેદે મુનિભિઃ સહ ।
જગામ સહસા તત્ર નારદઃ કરુણાનિધિઃ ॥ ૪॥

તં દૃષ્ટ્વા હર્ષસંયુક્તા દેવાઃ શઙ્કરમુખ્યકાઃ ।
પપ્રચ્છુસ્તે મહાભાગં દુઃખશોકયુતાઃ પરમ્ ॥ ૫॥

શ્રીશિવ ઉવાચ ।
અન્ધકેન જિતાઃ સર્વે વયં યોગીન્દ્રસત્તમ ।
ગૃહીતું પાર્વતીં પત્નીં ભાવાર્થમુદ્યતોઽભવત્ ॥ ૬॥

કર્મનાશપ્રભાવેણોપોષણેન સમન્વિતાન્ ।
દેવાંસ્તાન્ રક્ષ વિપ્રેશ દ્વિજાન્ કર્મપરાયણાન્ ॥ ૭॥

અન્ધકસ્ય વધોપાયં વદ ત્વં સર્વવિત્તમ ।
કરિષ્યામો વયં તં તુ ભક્તિયુક્તા મહામતે ॥ ૮॥

નારદ ઉવાચ ।
સમીપે માર્ગશીર્ષસ્તુ સમ્પ્રાપ્તઃ સર્વસિદ્ધિદઃ ।
વ્રતં માસાત્મકં કાર્યં ગણેશપ્રીતયે ત્વયા ॥ ૯॥

તતો વ્રતપ્રભાવેણ જેષ્યસે દૈત્યપુઙ્ગવમ્ ।
અન્ધકં નામ સન્દેહો વિઘ્નેશસ્ય પ્રસાદતઃ ॥ ૧૦॥

એવમુક્ત્વા મહાયોગી નારદો ગણપં સ્મરન્ ।
વીણાગાનરતો વિપ્ર નમ્ય તં સ્વેચ્છયા યયૌ ॥ ૧૧॥

તતો દેવગણૈર્યુક્તો મુનિભિઃ શઙ્કરઃ સ્વયમ્ ।
માર્ગશીર્ષભવં મુખ્યં વ્રતં ચકાર વૈઘ્નપમ્ ॥ ૧૨॥

ગણેશપઞ્ચકં નિત્યં સેવયામાસ યત્નતઃ ।
ઉષઃ સ્નાત્વા વિશેષેણ ગણેશમભજત્ પ્રભુમ્ ॥ ૧૩॥

ઉપોષણસમાયુક્તઃ શઙ્કરોઽહર્નિશં પરમ્ ।
તમેવ ચિન્તયન્ ભક્ત્યા ધ્યાનસંસ્થો બભૂવ હ ॥ ૧૪॥

એવં માસવ્રતં પૂર્ણં શિવઃ કૃત્વા દ્વિજોત્તમાન્ ।
પૂજ્ય ભોજ્ય સ્વયં દેવશ્ચકાર પારણં મુને ॥ ૧૫॥

તતો વ્રતપ્રભાવેણ સન્તુષ્ટો ગણનાયકઃ ।

આયયૌ શઙ્કરં તત્ર વરદાનાર્થમાદરાત્ ॥ ૧૬॥

સિદ્ધિબુદ્ધિયુતં વીક્ષ્ય મૂષકોપરિ સંસ્થિતમ્ ।
વિઘ્નેશં હર્ષસંયુક્તઃ શઙ્કરઃ પ્રણનામ તમ્ ॥ ૧૭॥

શિવઃ પૂજ્ય ગણાધીશં દેવૈર્મુનિભિરાદરાત્ ।
તુષ્ટાવ હૃષ્ટરોમાઽસૌ પ્રબદ્ધકરસમ્પુટઃ ॥ ૧૮॥

શ્રીશિવ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં વિઘ્નરાજાય ઢુણ્ઢયે ।
પરેશાય ચ હેરમ્બાય પાશિને નમો નમઃ ॥ ૧૯॥

મૂષકવાહનાયૈવ નમઃ પરશુપાણયે ।
દન્તાભયધરાયૈવ ત્રિનેત્રાય નમો નમઃ ॥ ૨૦॥

શૂર્પકર્ણાય વીરાય ચન્દ્રરેખાધરાય તે ।
સિન્દૂરભૂષણાયૈવ રક્તરઙ્ગાય તે નમઃ ॥ ૨૧॥

હેરમ્બાય મહાવિઘ્નવારણાય ગજાનન ।
આદિપૂજ્યાય સર્વેષાં પૂજ્યાય તે નમો નમઃ ॥ ૨૨॥

સ્વાનન્દવાસિને તુભ્યં સ્વાનન્દમયમૂર્તયે ।
સર્વાકારાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૨૩॥

અનન્તોદરભાવાય બ્રહ્મણાં પતયે નમઃ ।
બ્રહ્મભૂતાય દેવાય દૈત્યદાનવમર્દિને ॥ ૨૪॥

અનન્તવિભવાયૈવ ભક્તપાલનધર્મિણે ।
અભક્તાનાં વિનાશાય ખેલકાય નમો નમઃ ॥ ૨૫॥

યોગાય યોગનાથાય યોગિને યોગદાયિને ।
સદા શાન્તિસ્વરૂપાય શાન્તિશાતાય તે નમઃ ॥ ૨૬॥

(Page ખં. ૮ અ. ૨૩ પાન ૫૧)
કિં સ્તૌમિ ત્વાં ગણેશાન બ્રહ્મણસ્પતિરૂપિણમ્ ।
યોગિનો વેદવેદાન્તાઃ શાન્તિં યત્ર ભજન્તિ ચ ॥ ૨૭॥

ધન્યોઽહં દેવપૈર્દેવૈર્મુનિભિર્ગણનાયક ।
દર્શનાત્તેઽદ્ય પાદસ્ય પરાત્પરતરસ્ય ચ ॥ ૨૮॥

સામર્થ્યં દેહિ વિઘ્નેશ જ્ઞાનરૂપં ત્વયિ સ્થિતમ્ ।

આજ્ઞાનાન્ધકનાશાર્થં ભક્તિં તેઽવ્યભિચારિણીમ્ ॥ ૨૯॥

એવમુક્ત્વા નનર્તાઽસૌ મહાદેવઃ સુરર્ષિભિઃ ।
તં જગાદ ગણાધીશો ભક્તં ભક્તજનપ્રિયઃ ॥ ૩૦॥

શ્રીગણેશ ઉવાચ ।
વજ્રપઞ્જરકં મે ત્વં ગૃહ્ય દૈત્યેન્દ્રસત્તમમ્ ।
જહિ જ્ઞાનમયં શમ્ભો વિજયી સર્વદા ભવ ॥ ૩૧॥

ભક્તિં મદીયપાદે ત્વં લભસેઽનન્યવૃત્તિજામ્ ।
યદ્યદિચ્છસિ તત્તત્તે સફલં તુ ભવિષ્યતિ ॥ ૩૨॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં યઃ પઠેન્નરઃ ।
શ ૃણુયાત્ સ લભેત્ સર્વં વાઞ્છિતં સર્વદા શિવ ॥ ૩૩॥

ભુક્તિં મુક્તિં પુત્રપૌત્રધનધાન્યાદિકં લભેત્ ।
ભક્તિં મે બ્રહ્મભૂતત્વં શ્રવણાન્નાત્ર સંશયઃ ॥ ૩૪॥

સૂત ઉવાચ ।
એવં ગણેશવાક્યં સ શ્રુત્વા હર્ષસમન્વિતઃ ।
શિવઃ પ્રણમ્ય તં વાક્યં જગાદ ભક્તિલાલસઃ ॥ ૩૫॥

શ્રીશિવ ઉવાચ ।
વજ્રપઞ્જરકં નાથ બ્રૂહિ મે ગણપપ્રિયમ્ ।
જ્ઞાનમયં મહાન્ધસ્ય નાશકં સુખદાયકમ્ ॥ ૩૬॥

શ્રીગણેશ ઉવાચ ।
આદૌ નિત્યવિધિં કૃત્વા પૂજયિત્વા ગજાનનમ્ ।
વજ્રપઞ્જરકં ગ્રાહ્યં સર્વાજ્ઞાનવિનાશનમ્ ॥ ૩૭॥

ત્રિનેત્રં ગજાસ્યં ચતુર્બાહુધારં પરશ્વાદિશસ્ત્રૈર્યુતં ભાલચન્દ્રમ્ ।
નરાકારદેહં સદા યોગશાન્તં ગણેશં ભજે સર્વવન્દ્યં પરેશમ્ ॥ ૩૮॥

એવં ધ્યાત્વા ગણેશાનં માનસૈરુપચારકૈઃ ।
પૂજયેત્તં નમસ્કૃત્ય ધારયેદ્વજ્રપઞ્જરમ્ ॥ ૩૯॥

બિન્દુરૂપો વક્રતુણ્ડો રક્ષતુ મે હૃદિ સ્થિતઃ ।
દેહાંશ્ચતુર્વિધાંસ્તત્વાંસ્તત્વાધારઃ સનાતનઃ ॥ ૪૦॥

દેહમોહયુતં હ્યેકદન્તઃ સોઽહં સ્વરૂપધૃક્ ।

દેહિનં માં વિશેષેણ રક્ષતુ ભ્રમનાશકઃ ॥ ૪૧॥

મહોદરસ્તથા દેવો નાનાબોધાન્ પ્રતાપવાન્ ।
સદા રક્ષતુ મે બોધાનન્દસંસ્થો હ્યહર્નિશમ્ ॥ ૪૨॥

સાઙ્ખ્યાન્ રક્ષતુ સાઙ્ખ્યેશો ગજાનનઃ સુસિદ્ધિદઃ ।
અસત્યેષુ સ્થિતં માં સ લમ્બોદરશ્ચ રક્ષતુ ॥ ૪૩॥

સત્સુ સ્થિતં સુમોહેન વિકટો માં પરાત્પરઃ ।
રક્ષતુ ભક્તવાત્સલ્યાત્ સદૈકામૃતધારકઃ ॥ ૪૪॥

આનન્દેષુ સ્થિતં નિત્યં માં રક્ષતુ સમાત્મકઃ ।
વિઘ્નરાજો મહાવિઘ્નૈર્નાનાખેલકરઃ પ્રભુઃ ॥ ૪૫॥

અવ્યક્તેષુ સ્થિતં નિત્યં ધૂમ્રવર્ણસ્વરૂપધૃક્ ।
માં રક્ષતુ સુખાકારઃ સહજઃ સર્વપૂજિતઃ ॥ ૪૬॥

સ્વસંવેદ્યેષુ સંસ્થં માં ગણેશઃ સ્વસ્વરૂપધૃક્ ।
રક્ષતુ યોગભાવેન સંસ્થિતો ભવનાયકઃ ॥ ૪૭॥

અયોગેષુ સ્થિતં નિત્યં માં રક્ષતુ ગણેશ્વરઃ ।
નિવૃત્તિરૂપધૃક્ સાક્ષાદસમાધિસુખે રતઃ ॥ ૪૮॥

યોગશાન્તિધરો માં તુ રક્ષતુ યોગસંસ્થિતમ્ ।
ગણાધીશઃ પ્રસન્નાત્મા સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૪૯॥

પુરો માં ગજકર્ણશ્ચ રક્ષતુ વિઘ્નહારકઃ ।
વાહ્ન્યાં યામ્યાં ચ નૈરૃત્યાં ચિન્તામણિર્વરપ્રદઃ ॥ ૫૦॥

રક્ષતુ પશ્ચિમે ઢુણ્ઢિર્હેરમ્બો વાયુદિક્ સ્થિતમ્ ।
વિનાયકશ્ચોત્તરે તુ પ્રમોદશ્ચેશદિક્ સ્થિતમ્ ॥ ૫૧॥

ઉર્ધ્વં સિદ્ધિપતિઃ પાતુ બુદ્ધીશોઽધઃ સ્થિતં સદા ।
(Page ખં. ૮ અ. ૨૪ પાન ૫૨)
સર્વાઙ્ગેષુ મયૂરેશઃ પાતુ માં ભક્તિલાલસઃ ॥ ૫૨॥

યત્ર તત્ર સ્થિતં માં તુ સદા રક્ષતુ યોગપઃ ।
પરશુપાશસંયુક્તો વરદાભયધારકઃ ॥ ૫૩॥

ઇદં ગણપતેઃ પ્રોક્તં વજ્રપઞ્જરકં પરમ્ ।
ધારયસ્વ મહાદેવ વિજયી ત્વં ભવિષ્યસિ ॥ ૫૪॥

ય ઇદં પઞ્જરં ધૃત્વા યત્ર કુત્ર સ્થિતો ભવેત્ ।
ન તસ્ય જાયતે ક્વાપિ ભયં નાનાસ્વભાવજમ્ ॥ ૫૫॥

યઃ પઠેત્ પઞ્જરં નિત્યં સ ઈપ્સિતમવાપ્નુયાત્ ।
વજ્રસારતનુર્ભૂત્વા ચરેત્ સર્વત્ર માનવઃ ॥ ૫૬॥

ત્રિકાલં યઃ પઠેન્નિત્યં સ ગણેશ ઇવાપરઃ ।
નિર્વિઘ્નઃ સર્વકાર્યેષુ બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૫૭॥

યઃ શૃણોતિ ગણેશસ્ય પઞ્જરં વજ્રસંજ્ઞકમ્ ।
આરોગ્યાદિસમાયુક્તો ભવતે ગણપપ્રિયઃ ॥ ૫૮॥

ધનં ધાન્યં પશૂન્ વિદ્યામાયુષ્યં પુત્રપૌત્રકમ્ ।
સર્વસમ્પત્સમાયુક્તમૈશ્વર્યં પઠનાલ્લભેત્ ॥ ૫૯॥

ન ભયં તસ્ય વજ્રાત્તુ ચક્રાચ્છૂલાદ્ભવેત્ કદા ।
શઙ્કરાદેર્મહાદેવ પઠનાદસ્ય નિત્યશઃ ॥ ૬૦॥

યં યં ચિન્તયતે મર્ત્યસ્તં તં પ્રાપ્નોતિ શાશ્વતમ્ ।
પઠનાદસ્ય વિઘ્નેશ પઞ્જરસ્ય નિરન્તરમ્ ॥ ૬૧॥

લક્ષાવૃત્તિભિરેવં સ સિદ્ધપઞ્જરકો ભવેત્ ।
સ્તમ્ભયેદપિ સૂર્યં તુ બ્રહ્માણ્ડં વશમાનયેત્ ॥ ૬૨॥

એવમુક્ત્વા ગણેશાનોઽન્તર્દધે મુનિસત્તમ ।
શિવો દેવાદિભિર્યુક્તો હર્ષિતઃ સમ્બભૂવ હ ॥ ૬૩॥

લક્ષાવૃત્તિં ચકારાઽસૌ યથાવિધિ પરાયણઃ ।
સિદ્ધપઞ્જરકો ભૂત્વા યયાવન્ધકદૈત્યપમ્ ॥ ૬૪॥

ગણેશં મનસા ધ્યાત્વા કૃત્વા યુદ્ધં સુદારુણમ્ ।
ત્રિશૂલેનાન્ધકં સોઽપિ વિવ્યાધ ગર્વસંયુતમ્ ॥ ૬૫॥

એવમન્ધકદૈત્યેશં જિત્વા શમ્ભુઃ પ્રતાપવાન્ ।
દેવાન્ સંસ્થાપયામાસ સ્વસ્થાનેષુ સુનિર્ભયાન્ ॥ ૬૬॥

વિશ્વં સ્વધર્મસંયુક્તં ચકાર શઙ્કરઃ સ્વયમ્ ।
માર્ગશીર્ષવ્રતેનૈવ પઞ્જરેણ સમન્વિતઃ ॥ ૬૭॥

ઇદમન્ધકનાશાખ્યં ચરિતં યઃ શૃણોતિ વા ।

પઠેદ્વા સ લભેત્ પ્રીતિં ગણેશે સર્વસિદ્ધયે ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે માર્ગશીર્ષમાસમાહાત્મ્યે વજ્રપઞ્જરકથનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૮.૨૩

## ૮.૨૪ માર્ગશીર્ષમાસમાહાત્મ્યે સાધુચરિતવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ભારદ્વાજો દ્વિજઃ કશ્ચિન્નામ્ના સાધુરિતિ સ્મૃતઃ ।
ગણેશભજને પ્રીતિસંયુક્તોઽભૂન્નિરન્તરમ્ ॥ ૧॥

જગામ મુનિમુખ્યં સ એકદા ભક્તિસંયુતઃ ।
ભરદ્વાજં પ્રણમ્યાદૌ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૨॥

સાધુરુવાચ ।
ગણેશપ્રાપ્તયે સ્વામિન્ વદોપાયં સુસિદ્ધિદમ્ ।
યેનાત્માનં ગણાધીશો દર્શયેન્ મે મહામુને ॥ ૩॥

ભરદ્વાજ ઉવાચ ।
માર્ગશીર્ષવ્રતં પુત્ર કુરુ શીઘ્રં સમાગતમ્ ।
(Page ખં. ૮ અ. ૨૪ પાન ૫૩)
તેન ત્વં ગણનાથસ્ય પ્રિયોઽત્યન્તં ભવિષ્યસિ ॥ ૪॥

એવમુક્ત્વા ભરદ્વાજો કથયામાસ ભાવતઃ ।
વિધિયુક્તં વ્રતં પૂર્ણં ગણેશપઞ્ચકૈર્યુતમ્ ॥ ૫॥

સાધુસ્તં નમ્ય તત્રસ્થશ્ચકાર વ્રતમુત્તમમ્ ।
ઉપોષણપરો ભૂત્વા તોષયામાસ વિઘ્નપમ્ ॥ ૬॥

સમાપ્તિસમ્ભવે તત્ર દિવસે ગણનાયકઃ ।
દ્વિજરૂપધરો ભૂત્વા યયૌ તસ્યાશ્રમં શુભમ્ ॥ ૭॥

ઉવાચ તં મહાભાગં પૂજાન્તે મુનિમુખ્યકમ્ ।
ભોજનં દેહિ મે વિપ્ર તૃપ્તિકારકમુત્તમમ્ ॥ ૮॥

તથેતિ તં પ્રણમ્યાદૌ પુપૂજ ભક્તિસંયુતઃ ।
ભોજયામાસ ભક્ત્યા સ નાનારસયુતાન્નકૈઃ ॥ ૯॥

સ ભુક્ત્વા સકલાન્નં તમુવાચ ક્ષુધિતો ભૃશમ્ ।
દેહિ તૃપ્તિકરં ભક્ષ્યં વ્રજામિ વિમુખો ન ચેત્ ॥ ૧૦॥

શ્રુત્વાઽતિવિસ્મયાવિષ્ટો વિચારમકરોદ્ હૃદિ ।
શતપ્રસ્થમિતં ચાન્નં ભક્ષિતં મે દ્વિજેન હ ॥ ૧૧॥

તથાપિ તૃપ્તિહીનોઽયં સ્થિતઃ કુર્વે કિમપ્યહો ।
સ્વયં માં છલિતું યાતો ગણેશો દ્વિજરૂપધૃક્ ॥ ૧૨॥

પુરાણેષુ મહાવિપ્રૈઃ કથિતં તૃપ્તિકારકમ્ ।
ગણેશસ્યૈકદૂર્વાયા ભક્ષણં નાત્ર સંશયઃ ॥ ૧૩॥

અત એનં કરિષ્યામિ તૃપ્તં દૂર્વાસમન્વિતઃ ।
એવં વિચાર્ય સાધુઃ સ દૂર્વાં ચિક્ષેપ ચાન્ધસિ ॥ ૧૪॥

ગણેશં હૃદિ સઞ્ચિન્ત્ય પાયસં ગૃહ્ય સત્વરઃ ।
દૂર્વયા સંયુતં તસ્મૈ દદાવન્નં સુભક્તિતઃ ॥ ૧૫॥

તૃપ્તો દ્વિજઃ પ્રસન્નાત્મા તમુવાચ સુહર્ષિતઃ ।
જ્ઞાતં ભક્તિરહસ્યં તુ ગણેશસ્ય ત્વયા મુને ॥ ૧૬॥

તેનાઽહં તૃપ્તિસંયુક્તઃ સંશયો ન કૃતસ્ત્વયા ।
વરં બ્રૂહિ મહાભાગ દાસ્યામિ વિનયાચ્ચ તે ॥ ૧૭॥

સાધુરુવાચ ।
યદિ ત્વં વરદો મેઽસિ તદાત્માનં પ્રદર્શય ।
ગણેશસ્ત્વં ન સન્દેહો મમ ભાગ્યાત્ સમાગતઃ ॥ ૧૮॥

તસ્ય તદ્વચનં શ્રુત્વા બ્રાહ્મણો ગણપોઽભવત્ ।
તં દૃષ્ટ્વા હર્ષિતોઽત્યન્તં સાધુઃ સાધુગુણાન્વિતઃ ॥ ૧૯॥

પ્રણમ્ય પૂજયામાસ તુષ્ટાવ સ કૃતાઞ્જલિઃ ।
ગણેશભક્તિસંયુક્તઃ સાશ્રુનેત્રો મહાયશાઃ ॥ ૨૦॥

સાધુરુવાચ ।
હેરમ્બાય નમસ્તુભ્યં ત્રિનેત્રાય પરાત્મને ।
અનાકારાય દેવાય સાકારાય નમો નમઃ ॥ ૨૧॥

લમ્બોદરાય વીરાય શૂર્પકર્ણાય ઢુણ્ઢયે ।
અનાદયે પરેશાય ગણેશાય નમો નમઃ ॥ ૨૨॥

સ્વાનન્દવાસિને તુભ્યં ભક્તભાવસ્વરૂપિણે ।
ભક્તેશાય સુભક્ત્યા વૈ સન્તુષ્ટાય નમો નમઃ ॥ ૨૩॥

સર્વાકારાય સર્વાદિપૂજ્યાય પરમાત્મને ।
બ્રહ્મેશાય ગણાનાં તે પાલકાય નમો નમઃ ॥ ૨૪॥

નિરાકારાય સર્વેષાં પૂજ્યાય પરમપ્રિય ।
વિઘ્નેશાય મહાવિઘ્નહારિણે તે નમો નમઃ ॥ ૨૫॥

માત્રે પિત્રે સમસ્તાનાં તત્ત્વરૂપાય તે નમઃ ।
બ્રહ્મણે વિષ્ણવે તુભ્યં શઙ્કરાય નમો નમઃ ॥ ૨૬॥

શક્તયે સૂર્યરૂપાયેન્દ્રાય વાયુસ્વરૂપિણે ।
ચન્દ્રાય વરુણાયૈવ યમાય તે નમો નમઃ ॥ ૨૭॥

અગ્નયે નૈરૃતાયૈવ કુબેરાય ધરાધર ।
(Page  ખં. ૮ અ. ૨૪ પાન ૫૪)
નરાય પશુરૂપાય નમો નાગાસુરાય તે ॥ ૨૮॥

ચરાચરમયાયૈવ ચરાચરવિવર્જિત ।
સમાય સહજાયૈવ સ્વસંવેદ્યાય તે નમઃ ॥ ૨૯॥

યોગાય શાન્તિનાથાય શાન્તિદાય નમો નમઃ ।
કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકાર નમો નમઃ ॥ ૩૦॥

ધન્યોઽહં સર્વભાવેન તવાઙ્ઘ્રિયુગદર્શનાત્ ।
વરં દેહિ ગણેશાન તવ ભક્તિં દૃઢાત્મિકામ્ ॥ ૩૧॥

એવં સ્તુત્વા ગણાધીશં સાધુસ્તં પ્રણનામ ચ ।
તમુવાચ ગણેશાનો ભક્તં ભક્તજનપ્રિયઃ ॥ ૩૨॥

શ્રીગણેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામતે ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૩૩॥

ત્વયા કૃતં મદીયં યત્ સ્તોત્રં ભક્તિવિવર્ધનમ્ ।
ભવિષ્યતિ મહાભાગ પઠતાં શ◌ૃણ્વતાં સદા ॥ ૩૪॥

સર્વસિદ્ધિપ્રદં પૂર્ણં મત્પ્રસાદાદિદં પરમ્ ।
નાનાકાર્યકરં ભાવિ અન્તે સ્વાનન્દદાયકમ્ ॥ ૩૫॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
સાધુસ્તં હૃદિ સન્ધ્યાત્વાઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૩૬॥

એવં નાના જના વિપ્ર સિદ્ધિં પ્રાપ્તા વિશેષતઃ ।
માર્ગશીર્ષવ્રતેનૈવ ગાણપત્યપરાયણાઃ ॥ ૩૭॥

અન્યચ્ચ શ‍ૃણુ વિપ્રેન્દ્ર ચરિત્રં સર્વસિદ્ધિદમ્ ।
માર્ગશીર્ષભવં ચિત્રં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૩૮॥

એકઃ કૈવર્તકઃ કશ્ચિન્નામ્ના શમ્બુરિતિ સ્મૃતઃ ।
સ માર્ગશીર્ષમાહાત્મ્યં શુશ્રાવ ગણપાશ્રિતમ્ ॥ ૩૯॥

સમાગતે માર્ગશીર્ષે સ્નાનં કૃત્વા મહામતિઃ ।
ગણેશં પ્રણનામાઽથ નિત્યં કુટુમ્બપોષકઃ ॥ ૪૦॥

તતઃ પરં નૃપસ્યૈવ ચકાર સેવનં સદા ।
પૌષે મૃતશ્ચ તં ધૃત્વા ગાણેશાઃ સ્વપદં યયુઃ ॥ ૪૧॥

તત્ર વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ।
માર્ગશીર્ષવ્રતં તેન કૃતમંશપ્રકારતઃ ॥ ૪૨॥

તદપિ બ્રહ્મભૂતઃ સ બભૂવ વ્રતસેવનાત્ ।
એવં નાના જના બ્રહ્મન્ સિદ્ધિં પ્રાપ્તા વ્રતેન વૈ ॥ ૪૩॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગામિનઃ ।
કિઞ્ચિન્નિયમસંયુક્તાઃ કિં પુનર્વિધિચારિણઃ ॥ ૪૪॥

ઇદં યઃ શ‍ૃણુયાન્નિત્યં માર્ગશીર્ષે નરોત્તમઃ ।
પઠેત્ સ સિદ્ધિસંયુક્તો ભવિષ્યતિ નિરન્તરમ્ ॥ ૪૫॥

માર્ગશીર્ષવ્રતસ્યૈવ માહાત્મ્યં લેશતો મયા ।
કથિતં કિં પુનઃ શ્રોતુમિચ્છસિ મુનિસત્તમ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે માર્ગશીર્ષમાસમાહાત્મ્યસાધુચરિતવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૮.૨૪
(Page ખં. ૮ અ. ૨૫ પાન ૫૫)

## ૮.૨૫ માઘમાસમાહાત્મ્યે વિરોચનવધો નામ પઞ્ચવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
માઘમાસવ્રતં બ્રૂહિ ગણેશપ્રીતિવર્ધનમ્ ।
ન તૃપ્યામિ કથાં શૃણ્વન્ ગાણેશીં સર્વસિદ્ધિદામ્ ॥ ૧॥

સૂત ઉવાચ ।
પ્રહ્લાદસ્ય મહાતેજાઃ પુત્રોઽભૂદ્દૈત્યપાલકઃ ।
વિરોચનઃ સમાખ્યાતઃ તેજસ્વિનાં શિરોમણિઃ ॥ ૨॥

સ શુક્રમુપસઙ્ગમ્ય પ્રણમ્ય મુનિસત્તમમ્ ।
જગાદ દુઃખસંયુક્તો નિઃશ્વસ્યાસુરનાયકઃ ॥ ૩॥

વિરોચન ઉવાચ ।
દૈત્યા દેવાર્દિતાઃ સ્વામિંસ્તિષ્ઠન્તિ ભયસઙ્કુલાઃ ।
પાતાલેષુ તતો મહ્યં શાધિ તેષાં હિતાય ભોઃ ॥ ૪॥

શુક્ર ઉવાચ ।
આકૃષ્ણેનેતિ મન્ત્રેણ સૂર્યમારાધય પ્રભુમ્ ।
તેન ત્વં દાનવાનાં તુ પાલકઃ પ્રભવિષ્યસિ ॥ ૫॥

તં પ્રણમ્ય મહાબાહુર્વિરોચનઃ પ્રતાપવાન્ ।
કામં વનં સમાશ્રિત્ય તતાપ પરમં તપઃ ॥ ૬॥

ધ્યાત્વા રવિં વિશેષેણાર્ઘ્યદાનં તુ ચકાર હ ।
ઉપસ્થાનપરો ભૂત્વા સૂર્યમારાધયત્ સદા ॥ ૭॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નઃ સવિતા યયૌ ।
વરં દાતું મહાતેજા વિરોચનાશ્રમં મુને ॥ ૮॥

તમાગતં સમાલોક્ય નનામ હ વિરોચનઃ ।
પૂજ્ય તુષ્ટાવ દેવેશમથર્વશિરસા પ્રભુમ્ ॥ ૯॥

તુષ્ટો ભાનુરુવાચેદં વાક્યં ભક્તવરપ્રદઃ ।
વરં બ્રૂહિ મહાદૈત્ય મનસીપ્સિતમુત્તમમ્ ॥ ૧૦॥

વિરોચન ઉવાચ ।
સર્વેભ્યો મરણં નાથ ન ભવેત્ મે દિવાકર ।

ચરાચરમયેભ્યશ્ચ રાજ્યં દેહિ ત્રિલોકજમ્ ॥ ૧૧॥

વિસ્મિતઃ સવિતા તસ્મૈ દદૌ સ્વમુકુટં પરમ્ ।
જગાદ ભાવગમ્ભીરો વચનં જગદીશ્વરઃ ॥ ૧૨॥

ભાનુરુવાચ ।
મસ્તકે ધારયસ્વૈનં તેન મૃત્યુવિવર્જિતઃ ।
ભવિષ્યસિ યદાઽન્યસ્ય હસ્તઃ શિરસિ નો પતેત્ ॥ ૧૩॥

પરહસ્તઃ સ્પૃશેદ્દૈત્ય મસ્તકે ચેન્ મરિષ્યસિ ।
યદા મુકુટહીને તે સાવધાનસ્તતો ભવ ॥ ૧૪॥

રાજ્યં ત્રૈલોક્યસમ્ભૂતં દત્તં તુભ્યં મયાઽધુના ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૧૫॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ભાનુઃ સવાર્થકોવિદઃ ।
વિરોચનઃ પ્રસન્નાત્મા સ્વગૃહં પ્રયયૌ તતઃ ॥ ૧૬॥

તતઃ શુક્રેણ દૈત્યેશોઽભિષિક્તો રાજ્યકર્મણિ ।
દૈત્યૈઃ સમાવૃતઃ સોઽપિ જિગ્યે ભૂમિં મહાબલઃ ॥ ૧૭॥

તતઃ શેષં વિનિર્જિત્ય યયૌ સ હ્યમરાવતીમ્ ।
દેવેન્દ્રં વશમાનાય્ય વિકુણ્ઠમગમત્તતઃ ॥ ૧૮॥

વિષ્ણોર્વિરોચનસ્યૈવ યુદ્ધં બભૂવ દારુણમ્ ।
જિત્વા વિષ્ણું મહાદૈત્યો હર્ષિતઃ સમ્બભૂવ હ ॥ ૧૯॥

વિષ્ણુના સંયુતા દેવાઃ પપલુર્વનમાશ્રિતાઃ ।
દૈત્યાઃ સ્વર્ગભુજઃ સર્વે કૃતાસ્તેન મહાત્મના ॥ ૨૦॥

તતઃ સ દૈત્યપાન્ સ્થાપ્ય વિકુણ્ઠાદિપદેષુ ચ ।
આયયૌ નગરં સ્વીયં દૈત્યવૃન્દસમન્વિતઃ ॥ ૨૧॥

તતઃ સ દૈત્યપૈર્યુક્તો ભોગાન્નાનાવિધાન્ પરાન્ ।
બુભુજે પાપસન્નિષ્ઠઃ સ્ત્રીમાંસાદિષુ લોલુપઃ ॥ ૨૨॥

તતો બહૌ ગતે કાલે દૈત્યેશૈઃ પ્રેરિતઃ ખલઃ ।
કર્મ વર્ણાશ્રમસ્થં સ ખણ્ડયામાસ ભૂતલે ॥ ૨૩॥

આસુરં કર્મ સર્વત્ર કારયામાસ માનવૈઃ ।
તતો હાહાકૃતં સર્વૈર્મુને ત્રૈલોક્યવાસિભિઃ ॥ ૨૪॥

એવં બહૌ ગતે કાલે દેવાશ્ચોપોષણાન્વિતાઃ ।
મુનિભિઃ કેશવં સર્વે તુષ્ટુવુસ્તદ્વધાય તમ્ ॥ ૨૫॥

(Page ખં. ૮ અ. ૨૫ પાન ૫૬)
સોઽપિ નિઃશ્વસ્ય દેવેશો વિચારમકરોત્ હૃદિ ।
નાવાપ દૈત્યનાશાર્થં સ્વયં ખિન્નો બભૂવ હ ॥ ૨૬॥

તતો વિઘ્નેશ્વરં વિષ્ણુઃ સસ્માર દુઃખમુક્તયે ।
ગણેશકૃપયા તત્રાઽઽજગામ દેવલો મુનિઃ ॥ ૨૭॥

તં પ્રણમ્યામરાઃ સર્વે પપ્રચ્છુઃ કાર્યસિદ્ધયે ।
વિરોચનવધાર્થાર્યં તાનુવાચ સ હર્ષિતઃ ॥ ૨૮॥

સમીપે હ્યધુના પ્રાપ્તો માસો માઘઃ સુપુણ્યદઃ ।
તત્ર સ્નાનસમાયુક્તાઃ સેવધ્વં ગણનાયકમ્ ॥ ૨૯॥

એવમુક્ત્વા મહાયોગી દેવલોઽકથયત્ પરમ્ ।
વિધિં માઘભવં સર્વં ગાણેશપઞ્ચકાત્મકમ્ ॥ ૩૦॥

ઉપદિશ્ય વ્રતં યોગી યયૌ સ્વેચ્છાપરાયણઃ ।
દેવલઃ કેશવાદ્યાંશ્ચ ગણેશભજને રતાઃ ॥ ૩૧॥

માઘમાસવ્રતં ચક્રુર્ગાણેશં સર્વસિદ્ધિદમ્ ।
યથાશાસ્ત્રં વિધાનેન વિઘ્નેશમભજત્ પરમ્ ॥ ૩૨॥

સમ્પૂર્ણે તદ્વ્રતે તત્ર ખવાણી તાનુવાચ હ ।
વિષ્ણો સ્ત્રીવેષગો ભૂત્વા જહિ દૈત્યં મહાબલમ્ ॥ ૩૩॥

ગણેશં મનસિ સ્મૃત્વા ગચ્છ તં દૈત્યનાયકમ્ ।
તવાધીનો મહાદૈત્યો ભવિષ્યતિ વિરોચનઃ ॥ ૩૪॥

શ્રુત્વાઽતિહર્ષિતા દેવાસ્તુષ્ટુવુર્ગણનાયકમ્ ।
તતો વિષ્ણું મહાભાગાઃ પ્રેરયામાસુરાદરાત્ ॥ ૩૫॥

ગચ્છ ગચ્છ મહાવિષ્ણો જહિ દૈત્યં મહાબલમ્ ।
ચરાચરં સદા હર્ષયુક્તં કુરુ જનાર્દન ॥ ૩૬॥

તથેતિ તાનુવાચાથ વિષ્ણુર્ધ્યાત્વા ગજાનનમ્ ।
સ્ત્રીરૂપઃ પ્રયયૌ તત્ર યત્ર દૈત્યાધિપોઽભવત્ ॥ ૩૭॥

પુષ્પવૃક્ષયુતાયાં સ વાટિકાયાં સ્થિતોઽભવત્ ।
તત્ર નારાયણં દૈત્યા દદૃશુઃ સ્ત્રીસ્વરૂપિણમ્ ॥ ૩૮॥

મોહિતાસ્તાં સમાગમ્ય પપ્રચ્છુર્વિનયાન્વિતાઃ ।
કાઽસિ કસ્યાઽસિ રમ્ભોરુ કિમર્થં ત્વાગતા વદ ॥ ૩૯॥

આજ્ઞાં કુરુ મહાભાગે વયં દાસા ન સંશયઃ ।
તવ પાદસ્ય વામાક્ષિ પશ્ય સર્વાન્ શુચિસ્મિતે ॥ ૪૦॥

એવં તેષાં વચઃ શ્રુત્વા તાન્ જગાદ સુરૂપિણી ।
હાવભાવસમાયુક્તા મોહિની મોહકારિણી ॥ ૪૧॥

મોહિન્યુવાચ ।
અહં સ્વેચ્છામયી રમ્યા નાવૃતા સ્વેચ્છયા ગતા ।
મોહિની સર્વવિખ્યાતા ચરામિ હ્યકુતોભયા ॥ ૪૨॥

વિશ્વસ્ય નાયકઃ કોઽપિ ભવિષ્યતિ મહાબલઃ ।
વરિષ્યામિ પતિં દૈત્યા નાન્યં ગચ્છત મા ચિરમ્ ॥ ૪૩॥

તસ્યાસ્તદ્વચનં શ્રુત્વા ક્ષુભિતા દૈત્યદાનવાઃ ।
તેષુ કેચિદ્યયુસ્તત્ર વિરોચનં સદાન્વિતમ્ ॥ ૪૪॥

તં પ્રણમ્ય મહાત્માનં જગુર્વૃત્તાન્તમાદરાત્ ।
શ્રુત્વા સોઽપિ મહામોહયુક્તો બભૂવ તત્ક્ષણાત્ ॥ ૪૫॥

ગણેશમાયયા ભ્રાન્તઃ પ્રયયૌ તામનિન્દિતામ્ ।
વિરોચનો મહાદૈત્યઃ સંવૃતસ્તાં દદર્શ હ ॥ ૪૬॥

સમાગતં મહાદૈત્યં દૃષ્ટ્વા વિષ્ણુઃ પ્રહર્ષિતઃ ।
સસ્માર ગણપં ચિત્તે ધ્યાત્વા તત્રૈવ સંસ્થિતઃ ॥ ૪૭॥

તતો ગણેશ્વરઃ સાક્ષાત્તયોર્હૃદિ વ્યવસ્થિતઃ ।
બુદ્ધિભેદં ચકારાસૌ તાદૃશૌ તૌ બભૂવતુઃ ॥ ૪૮॥

અથો વિરોચનો દેવીં દૃષ્ટ્વા મોહયુતોઽભવત્ ।
સમીપે પ્રયયૌ તસ્યા એકાકી હર્ષસંયુતઃ ॥ ૪૯॥

તામુવાચ મહાદૈત્યો વિનયેન સમન્વિતઃ ।
કૃત્વા કરપુટં વિપ્ર મહામાયાપ્રમોહિતઃ ॥ ૫૦॥

વિરોચન ઉવાચ ।

(Page ખં. ૮ અ. ૨૬ પાન ૫૭)
બ્રહ્મવિષ્ણુમહેશેન્દ્રાદ્યા જિતાઃ સચરાચરાઃ ।
મયા બ્રહ્માણ્ડનાથેન તવ દાસેન ભામિનિ ॥ ૫૧॥

તવાજ્ઞાવશગોઽહં તુ ભવિષ્યામિ નિરન્તરમ્ ।
પત્ની ભવ મદીયા ત્વં ગૃહમાગચ્છ મે પ્રિયે ॥ ૫૨॥

એવં તસ્ય વચઃ શ્રુત્વા તમુવાચ સુમોહિની ।
યદા વચોઽન્યથા મે ત્વં કરિષ્યસિ ત્યજામ્યહમ્ ॥ ૫૩॥

તથેતિ તાં સમાગૃહ્ય યયૌ સ્વગૃહમુત્તમમ્ ।
તન્નિષ્ઠસ્તત્પરઃ સોઽપિ બભૂવ સમીપસ્થિતઃ ॥ ૫૪॥

નાનાચાતુર્યભાવેન મોહયામાસ તં હરિઃ ।
મોહિનીરૂપસંસ્થશ્ચ ખલં યભિતુમુદ્યતમ્ ॥ ૫૫॥

તમુવાચ મહાભાગા મોહિની સર્વમોહિની ।
અભ્યઙ્ગં કુરુ નાથ ત્વં મદ્ધસ્તેન મહામતે ॥ ૫૬॥

પશ્ચાત્ સ્નાનં ચ કૃત્વા તુ ભોજનં કુરુ સુવ્રત ।
તતો માં સ્પૃશ દૈત્યેન્દ્ર તવાધીનાં નિરન્તરમ્ ॥ ૫૭॥

ગણેશમાયયા ભ્રાન્તસ્તામુવાચ તથેતિ સઃ ।
સુવાસિતેન તૈલેનાભ્યઙ્ગં કર્તું સમુદ્યતઃ ॥ ૫૮॥

પ્રગૃહ્ય મોહિની તૈલમુત્તાર્ય મુકુટં પરમ્ ।
મસ્તકાત્તસ્ય હસ્તાભ્યાં મૂર્ધ્નિ હૃષ્ટા વ્યમર્દયત્ ॥ ૫૯॥

હસ્તયોઃ સ્પર્શમાત્રેણ શતચૂર્ણોઽભવત્તદા ।
મસ્તકસ્તસ્ય દૈત્યસ્ય મોહિની હર્ષિતાઽભવત્ ॥ ૬૦॥

જય લમ્બોદરેત્યુક્ત્વાંઽતર્દધે સા તુ મોહિની ।
દૈત્યા મૃતં સમાલોક્ય વિવિશુસ્તે રસાતલમ્ ॥ ૬૧॥

દેવર્ષિભિસ્તતો વિષ્ણુઃ સ્વલોકમગમચ્ચ તૈઃ ।
સ્વસ્વધર્મયુતાન્ લોકાન્ કારયામાસ માધવઃ ॥ ૬૨॥

એવં માઘવ્રતેનૈવ ગાણેશેન જનાર્દનઃ ।
જઘાન દૈત્યનાથં તં ત્રૈલોક્યજયકારિણમ્ ॥ ૬૩॥

ઇદં યઃ શૃણુયાત્ જન્તુઃ પઠેદ્વા ગણપં સ્મરન્ ।

સ સર્વસુખસંયુક્તો ભવિષ્યતિ નિરન્તરમ્ ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે માઘમાસમાહાત્મ્યે વિરોચનવધો નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૮.૨૫

## ૮.૨૬ માઘમાસમાહાત્મ્યે નાનાજનોદ્ધરણં નામ ષડ્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
મૌદ્ગલો બ્રાહ્મણઃ કશ્ચિન્નામ્ના વિશ્વસહોઽભવત્ ।
ગાણપત્યપ્રિયોઽત્યન્તં સદા સત્સઙ્ગલાલસઃ ॥ ૧॥

સ કદાચિન્ મહાભાગો માઘવ્રતપરોઽભવત્ ।
ગાણેશપઞ્ચકં નિત્યમસેવદ્ભક્તિસંયુતઃ ॥ ૨॥

પ્રાતઃ કાલે સમુત્થાય સ્નાનાર્થં ચાગતં દ્વિજમ્ ।
તત્રૈકા રાક્ષસી ઘોરા તં દૃષ્ટ્વા ભક્ષિતું યયૌ ॥ ૩॥

વિકરાલમુખીં તાં સ દૃષ્ટ્વા ભયસમન્વિતઃ ।
ગણેશેતિ સમુચ્ચાર્ય જલં ચિક્ષેપ દૂર્વયા ॥ ૪॥

દૂર્વાયુક્તં જલં તસ્યા દેહે લગ્નં મહામુને ।
તેન શુદ્ધા વિશ્વસહં નનામૈવ જગાદ હ ॥ ૫॥

રાક્ષસ્યુવાચ ।
અહં ત્વાં શરણં પ્રાપ્તા તારયસ્વ ભવાર્ણવાત્ ।
તવ દર્શનમાત્રેણ જાતાઽહં શુદ્ધમાનસા ॥ ૬॥

(Page ખં. ૮ અ. ૨૬ પાન ૫૮)
તસ્યાસ્તદ્વચનં શ્રુત્વા રુદતીં દુઃખસંયુતામ્ ।
ઉવાચ દયયા યુક્તો વિશ્વસહઃ પ્રતાપવાન્ ॥ ૭॥

વિશ્વસહ ઉવાચ ।
કાઽસિ ત્વં વદ પાપિષ્ઠે કર્મ કિં પાપરૂપકમ્ ।
કૃતં ત્વયા મહાઘોરે કિં રોદિષિ સુદુઃખિતા ॥ ૮॥

રાક્ષસ્યુવાચ ।
પૂર્વજન્મનિ વિપ્રેશ બ્રાહ્મણ્યહં સુરૂપિણી ।

પાતિવ્રત્યં પરિત્યજ્ય દેહભોગયુતાઽભવમ્ ॥ ૯॥

યથેષ્ટં વિષયે સક્તાઽઽચરં પાપપરાયણા ।
મૃતા યામૈર્હૃતા તત્ર યાતનાયાં સ્થિતાઽભવમ્ ॥ ૧૦॥

ભુક્ત્વા દુઃખમપારં તુ કૃતા રાક્ષસ્યહં પુનઃ ।
સદા ક્ષુધા સમાવિષ્ટા અભ્રમં યત્ર તત્ર હ ॥ ૧૧॥

નીચોચ્ચમાંસમત્યન્તમભક્ષં નિત્યમેવ ચ ।
તથાપિ માં પિપીડાસૌ જઠરાગ્નિઃ સમુત્થિતઃ ॥ ૧૨॥

અપારં ભક્ષયામ્યેવ તથાપિ ક્ષુધયા યુતા ।
વિપ્રજન્મન આરભ્ય ન તૃપ્તાહં કદાઽભવમ્ ॥ ૧૩॥

અધુના ત્વાં સમાલોક્ય ભક્ષિતું સહસાઽઽગતા ।
જલસ્પર્શેન તે તાત જાતિસ્મરા ભવામ્યહમ્ ॥ ૧૪॥

તારયસ્વ મહાભાગ ત્વં સમર્થો ન સંશયઃ ।
નોચેદ્દેહપરિત્યાગં કરિષ્યામિ ત્વદગ્રતઃ ॥ ૧૫॥

તસ્યાસ્તદ્વચનં શ્રુત્વા વિશ્વસહો મહામતિઃ ।
વિચાર્ય દયયા યુક્તઃ તાં જગાદ પ્રહર્ષિતઃ ॥ ૧૬॥

વિશ્વસહ ઉવાચ ।
ગણેશનામમાહાત્મ્યં કથયિતું ન શક્યતે ।
મયા શ્રુતં પુરાણેષુ સત્યમેવ તદઞ્જસા ॥ ૧૭॥

દૂર્વાયુક્તજલેન ત્વં કૃતા જાતિસ્મરાઽધુના ।
અધુના તારણાર્થં તે દદામિ પુણ્યમુત્તમમ્ ॥ ૧૮॥

માઘસ્નાનભવં પુણ્યમેકાહેન સમુદ્ભવમ્ ।
દદામિ ત્વાં મહાભાગે ગચ્છ ત્વં નગરં નિજમ્ ॥ ૧૯॥

એવમુક્ત્વા દદૌ તસ્યૈ પુણ્યં હસ્તજલેન સઃ ।
એકસ્નાનભવં પૂર્ણં માઘમાસે સ મૌદ્ગલઃ ॥ ૨૦॥

તતો ગણેશ્વરસ્યૈવ દૂતાસ્તત્ર સમાયયુઃ ।
તાં વિમાને વિનિક્ષિપ્ય યયુઃ સ્વાનન્દકં પુરમ્ ॥ ૨૧॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં વિશ્વસહો મહામુનિઃ ।
સ્નાનં કૃત્વા યયૌ સ્નાનમભજદ્ગણનાયકમ્ ॥ ૨૨॥

સમાપ્તે તદ્વ્રતે તત્રાઽઽયયૌ વિનાયકઃ પ્રભુઃ ।
વરં દાતું દ્વિજાયૈવ મૌદ્ગલાય વિશેષતઃ ॥ ૨૩॥

સમાગતં ગણાધ્યક્ષં દૃષ્ટ્વોત્થાય નમામ તમ્ ।
સમ્ભ્રમેણ સમાયુક્તો નનર્ત પ્રેમવિહ્વલઃ ॥ ૨૪॥

તં તાદૃશં સમાલોક્ય જગાદ દ્વિરદાનનઃ ।
વરાન્ વૃણુ મહાભાગ દાસ્યામિ મનસીપ્સિતાન્ ॥ ૨૫॥

ગણેશવચનં શ્રુત્વા પ્રતિબુદ્ધો મહામુનિઃ ।
જગાદ તં પ્રપૂજ્યૈવ હર્ષં સંયમ્ય શૌનક ॥ ૨૬॥

વિશ્વસહ ઉવાચ ।
ધન્યં મે જન્મકર્માદિ જનકૌ શ્રુતમેવ ચ ।
ધન્યં માઘવ્રતં મુખ્યં યેન દૃષ્ટો ગજાનનઃ ॥ ૨૭॥

ત્વાં વેદાઃ સોપનિષદો ન જાનન્તિ ગણેશ્વર ।
યોગિનઃ શઙ્કરાદ્યાઃ સ કથં ત્વં સ્વયમાગતઃ ॥ ૨૮॥

કૃતકૃત્યોઽહમત્યન્તં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
કિં વૃણોમિ ગણેશાન ભક્તિં દેહિ દૃઢાં ત્વયિ ॥ ૨૯॥

વિઘ્નેશાય નમસ્તુભ્યં પરાત્પરતમાય ચ ।
હેરમ્બાય ગણેશાય ગણાનાં પતયે નમઃ ॥ ૩૦॥

માયાકારશરીરાય માયિકશિરસે નમઃ ।
તયોર્યોગે સુદેહાય ગજાનન નમોઽસ્તુ તે ॥ ૩૧॥

(Page ખં. ૮ અ. ૨૬ પાન ૫૯)
રાજસાય નમસ્તુભ્યં સૃષ્ટિકર્ત્રે કૃપાલવે ।
સાત્ત્વિકાય સદા સર્વપાલકાય નમો નમઃ ॥ ૩૨॥

તામસાય જનાનાં તુ સંહર્ત્રે કાલરૂપિણે ।
કર્મણે ત્રિસ્વરૂપાય નમોઽહઙ્કૃતિધારિણે ॥ ૩૩॥

ચાલકાય મહામોહદાયિને શક્તિરૂપિણે ।
ગુણેશાય ગુણાનાં વૈ સત્તાધારાય તે નમઃ ॥ ૩૪॥

બિન્દુમાત્રશરીરાય સોઽહઙ્કારાય દેહિને ।

બોધાય પ્રકૃતિસ્થાય ખેલકાય નમો નમઃ ॥ ૩૫॥

વિદેહાય પરેશાય સ્વાનન્દાય નમોઽસ્તુ તે ।
અયોગાય સુશાન્તાય યોગેશાય નમો નમઃ ॥ ૩૬॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યોગશાન્તિસ્વરૂપિણમ્ ।
તવ દર્શનજેનૈવ બોધેન સ્તુતવાનહમ્ ॥ ૩૭॥

એવમુક્ત્વા વિશ્વસહો નનામૈવ ગજાનનમ્ ।
તમુત્થાપ્ય ગણાધીશસ્તં જગાદ હિતં વચઃ ॥ ૩૮॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતં મદીયં તુ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં નિત્યં ભક્તિવર્ધનમુત્તમમ્ ॥ ૩૯॥

યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
ભુક્તિમુક્તિપ્રદં બ્રહ્મદાયકં શ્રવણાદ્ભવેત્ ॥ ૪૦॥

મયિ ભક્તિર્દૃઢા તે વૈ ભવિષ્યતિ સુખપ્રદા ।
યદ્યદિચ્છસિ તત્તત્તે સફલં હ્યસ્તુ સર્વદા ॥ ૪૧॥

એવમુક્ત્વા ગણાધીશોઽન્તર્દધે તસ્ય પશ્યતઃ ।
વિશ્વસહો ગણેશસ્ય ભજને તત્પરોઽભવત્ ॥ ૪૨॥

ગાણપત્યાગ્રણીઃ સોઽપિ બભૂવ મુદ્ગલોપમઃ ।
સદા માઘવ્રતે સંસ્થો ગાણેશપઞ્ચકે રતઃ ॥ ૪૩॥

અન્યચ્છૃણુ મહચ્ચિત્રં ચરિત્રં માસસમ્ભવમ્ ।
સર્વપાપહરં વિપ્ર શ્રવણાત્ સુખદં ભવેત્ ॥ ૪૪॥

ચાણ્ડાલઃ કોઽપિ નીલાખ્યઃ શ્રુત્વા ગણપતેઃ કથામ્ ।
માઘસ્નાનપરો ભૂત્વા વ્યવસાયં ચકાર હ ॥ ૪૫॥

સ્નાત્વા પ્રાતસ્તતઃ સોઽપિ વ્યવસાયપરોઽભવત્ ।
રાત્રૌ ગીતં ગણેશસ્ય ગાયતિ સ્મ નિરન્તરમ્ ॥ ૪૬॥

એવં ગીતં માઘમાસે ગણેશં દેવમન્દિરે ।
ગત્વા ગાયન્ પુનઃ સોઽપિ કુટુમ્બભરણે રતઃ ॥ ૪૭॥

એકદા કાર્યસંસ્થઃ સ માઘમાસે બભૂવ હ ।
યામમાત્રગતાયાં તુ યયૌ રાત્રૌ ગણેશ્વરમ્ ॥ ૪૮॥

પ્રણમ્ય વિઘ્નહર્તારં ગીતં ગીત્વા સ્વમન્દિરમ્ ।
જગામ માર્ગમધ્યસ્થં પિશાચાઃ પઞ્ચ તં યયુઃ ॥ ૪૯॥

દૃષ્ટ્વા ક્રૂરતરાંસ્તાન્ સ સસ્માર ગણનાયકમ્ ।
ગણેશસ્મૃતિમાત્રેણ પિશાચાઃ સ્તમ્ભિતા બભુઃ ॥ ૫૦॥

તતોઽતિવિસ્મિતાઃ સર્વે પિશાચાસ્તમલોકયન્ ।
અવલોકનપુણ્યેન શુદ્ધાન્તરા બભૂવિરે ॥ ૫૧॥

જગુસ્તં નીલકં વાક્યં પિશાચા દુઃખસંયુતાઃ ।
તારયસ્વ મહાભાગ સંસારાન્નઃ પિશાચકાન્ ॥ ૫૨॥

તવ દર્શનમાત્રેણ શુદ્ધા જાતા વયં કિલ ।
તવ ગાનફલં દેહિ તેન મુક્તા ભવામહે ॥ ૫૩॥

તેષાં તદ્વચનં શ્રુત્વા હર્ષયુક્તો જગાદ તાન્ ।
નીલઃ પરમભાવજ્ઞઃ પિશાચાન્ પાપનિશ્ચયાન્ ॥ ૫૪॥

નીલ ઉવાચ ।
ગણેશગીતસમ્ભૂતં ફલં વો ન દદામ્યહમ્ ।
એકગીતફલેનૈવોદ્ધરિષ્યતિ ચરાચરમ્ ॥ ૫૫॥

અત એકસ્ય પાદસ્ય ફલં દાસ્યામિ શાશ્વતમ્ ।
તેન મુક્તા ભવન્તોઽપિ ભવિષ્યન્તિ ન સંશયઃ ॥ ૫૬॥

એવમુક્ત્વા દદૌ તેભ્ય એકગીતસ્ય પાદજમ્ ।
(Page ખં. ૮ અ. ૨૭ પાન ૬૦)
ફલં તેનાઽભવન્ સર્વે દિવ્યદેહધરા મુને ॥ ૫૭॥

વિમાનેષુ સમારુહ્ય ગતાઃ સ્વાનન્દકે પુરે ।
ચાણ્ડાલો વિસ્મિતો નીલઃ સ્વગૃહં પ્રયયૌ તતઃ ॥ ૫૮॥

તતોઽધિકાં ગણેશસ્ય ભક્તિં ચક્રે મહામુને ।
અન્તે ગણેશ્વરં સોઽપિ યયૌ કોટિકુલૈઃ સહ ॥ ૫૯॥

એવમેકાત્મકેનૈવ નિયમેન વિશેષતઃ ।
માઘમાસે ગણેશાનં પ્રાપુશ્ચાનન્તજન્તવઃ ॥ ૬૦॥

માઘમાસભવં ચિત્રં વ્રતજં કથિતં મયા ।

માહાત્મ્યં શ્રવણાન્નૃભ્યઃ પઠનાદ્ભુક્તિમુક્તિદમ્ ॥ ૬૧॥

ધનધાન્યપ્રદં પુત્રપૌત્રસૌભાગ્યવર્ધનમ્ ।
નાનારોગહરં સદ્યઃ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે માઘમાસમાહાત્મ્યે નાનાજનોદ્ધરણં નામ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૮.૨૬

## ૮.૨૭ વૈશાખમાસમાહાત્મ્યે શિવદત્તબોધો નામ સપ્તવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
વૈશાખસ્યૈવ માહાત્મ્યં શ્રાવણસ્ય વદ પ્રભો ।
મલમાસસ્ય ચિત્રં ત્વં સૂત સર્વાર્થકોવિદ ॥ ૧॥

સૂત ઉવાચ ।
વૃત્રાસુરો મહાદૈત્યો જિત્વા ત્રૈલોક્યમોજસા ।
કર્મખણ્ડનમાર્ગેણ દેવાન્ હન્તું સમુદ્યતઃ ॥ ૨॥

તતો દેવગણાઃ સર્વે ભયભીતા બભૂવિરે ।
શરણં સ્વગુરું જગ્મુરુપોષણપરાયણાઃ ॥ ૩॥

તાનુવાચ મહાતેજા બૃહસ્પતિરુદારધીઃ ।
સેન્દ્રાન્ વૈશાખજં દેવાઃ કુરુધ્વં વ્રતમુત્તમમ્ ॥ ૪॥

તેન વ્રતપ્રભાવેણ સમર્થઃ સુરનાયકઃ ।
દધીચ્યસ્થિજવજ્રેણ હનિષ્યતિ મહાસુરમ્ ॥ ૫॥

સુરર્ષયસ્તતસ્તે તં નમસ્કૃત્ય યયુર્વનમ્ ।
ગુપ્તરૂપેણ વૈશાખવ્રતં ચક્રુઃ પ્રહર્ષિતાઃ ॥ ૬॥

ગાણેશપઞ્ચકં નિત્યં સિષેવિરે સુરર્ષયઃ ।
ગણેશસ્મરણં ધ્યાનં ચક્રુઃ પરમભાવિકાઃ ॥ ૭॥

વૈશાખી પૂર્ણિમાયાં તે સ્વપ્ને સર્વસુખાવહમ્ ।
દદૃશુર્ગણરાજં વૈ મૂર્તિસ્થં પૂજને રતાઃ ॥ ૮॥

મૂર્તિસ્તાન્ પ્રત્યુવાચેદં વાક્યં વાક્યવિશારદા ।
ઇન્દ્રદેહં સમાશ્રિત્ય હનિષ્યામિ મહાસુરમ્ ॥ ૯॥

અમરા મુનયઃ સર્વે પ્રબુદ્ધા વિસ્મિતા જગુઃ ।
પરસ્પરં વિચાર્યૈવં સર્વૈકસ્વપ્રભાવતઃ ॥ ૧૦॥

તતઃ ક્રોધસમાયુક્તો બભૂવ દેવનાયકઃ ।
દેવાન્ ગૃહ્ય યયૌ તત્ર દધીચિં મુનિભિઃ પુરા ॥ ૧૧॥

તં પ્રાર્થ્ય વજ્રમાદાય તદસ્થિજં મહાબલઃ ।
દેવૈઃ સમાવૃતો યુદ્ધં વજ્રેણૈવ ચકાર સઃ ॥ ૧૨॥

વૃત્રેન્દ્રયોર્મહદ્યુદ્ધં દેવાનાં દૈત્યપૈઃ સહ ।
બભૂવ દારુણં વિપ્ર મયા વક્તું ન શક્યતે ॥ ૧૩॥

ઇન્દ્રો ગણપતિં સ્મૃત્વા તં વજ્રેણ મહાસુરમ્ ।
જઘાન તં મૃતં દૃષ્ટ્વા દૈત્યાઃ પાતાલમાવિશન્ ॥ ૧૪॥

દેવા હર્ષસમાયુક્તા બ્રહ્મણા ગણપં પુનઃ ।
(Page ખં. ૮ અ. ૨૭ પાન ૬૧)
બદરારણ્યદેશસ્થં સમાજગ્મુઃ પ્રતુષ્ટુવુઃ ॥ ૧૫॥

દેવર્ષય ઊચુઃ ।
નમો નમસ્તે પરમાત્મને વૈ સદા ગણાનાં પતયે ગણાત્મને ।
અનન્તમાયામયખેલકારિણે પરેશ બ્રહ્મેશ નમો નમસ્તે ॥ ૧૬॥

નમસ્તુભ્યં મહાવિઘ્નનાશનાય મહાત્મને ।
વિઘ્નેશાય સુભક્તાનાં પાલકાય નમો નમઃ ॥ ૧૭॥

હેરમ્બાય મહાદીનપાલકાય ચ ઢુણ્ઢયે ।
લમ્બોદરાય દેવાય દેવદેવેશ તે નમઃ ॥ ૧૮॥

અનાથાનાં પ્રણાથાય નાથહીનાય તે નમઃ ।
નાથાનાં નાથરૂપાય વક્રતુણ્ડાય વૈ નમઃ ॥ ૧૯॥

પરાત્પરતમાયૈવ યોગશાન્તિપ્રદાય તે ।
યોગાનાં પતયે તુભ્યં નમો યોગાય તે નમઃ ॥ ૨૦॥

સગુણાય નમસ્તુભ્યં નિર્ગુણાય નમો નમઃ ।
સગુણનિર્ગુણાભ્યાં ચ વર્જિતાય નમો નમઃ ॥ ૨૧॥

અનન્તમાયયા દેવ ચારિણે તે નમો નમઃ ।
માયાહીનાય માયાયૈ માયિનાં મોહકારિણે ॥ ૨૨॥

મૂષકોપરિ સંસ્થાય મૂષકધ્વજધારિણે ।
સિદ્ધિબુદ્ધિપતે તુભ્યં સ્વાનન્દસ્થાય તે નમઃ ॥ ૨૩॥

કિં સ્તુમસ્ત્વાં ગણાધ્યક્ષ શાન્તિરૂપં પરાત્પરમ્ ।
વેદાદયઃ સમર્થા ન યોગિનઃ શાસ્ત્રસંયુતાઃ ॥ ૨૪॥

એવમુક્ત્વા પ્રણેમુસ્તં દેવર્ષયો મહામુને ।
સ્વસ્વસ્થાનં યયુઃ સર્વે હર્ષયુક્તેન ચેતસા ॥ ૨૫॥

વર્ણાશ્રમયુતા લોકા બભૂવુર્વિગતજ્વરાઃ ।
સર્વે દેવર્ષયસ્તત્ર ભાગયુક્તા બભૂવિરે ॥ ૨૬॥

એવં વૈશાખમાસસ્ય વ્રતેન દેવનાયકઃ ।
હત્વા વૃત્રાસુરં વિપ્ર દેવૈઃ સુખયુતોઽભવત્ ॥ ૨૭॥

અન્યચ્ચ શ ृણુ માહાત્મ્યં વૈશાખવ્રતસમ્ભવમ્ ।
સર્વપાપહરં દુઃખનાશનં શ્રવણાન્નૃણામ્ ॥ ૨૮॥

ગાર્ગ્યઃ કોઽપિ દ્વિજો નામ્ના શિવદત્તો બભૂવ હ ।
સ ગણેશપરો નિત્યમભજદ્ગણનાયકમ્ ॥ ૨૯॥

સ્વધર્મસંયુતો નિત્યં ભાર્યાપુત્રસમન્વિતઃ ।
અગ્નિહોત્રપરો ભૂત્વાઽતિષ્ઠત્ સ્વતેજસા યુતઃ ॥ ૩૦॥

તત્રાગતં સ યોગીન્દ્રં ગર્ગં સર્વાર્થકોવિદમ્ ।
તં પ્રણમ્ય મહાભાગં શિવદત્તઃ પુપૂજ હ ॥ ૩૧॥

નિત્યં સેવાપરં દૃષ્ટ્વા સુતં વિનયસંયુતમ્ ।
મુક્તિમિચ્છન્તમત્યન્તં ગર્ગઃ સંહર્ષિતોઽભવત્ ॥ ૩૨॥

ઉવાચ શિવદત્તં સ પુત્ર વાઞ્છસિ કિં વદ ।
તત્કરિષ્યામિ તે શીલસન્તુષ્ટોઽહં ન સંશયઃ ॥ ૩૩॥

તસ્ય તદ્વચનં શ્રુત્વા શિવદત્તઃ કૃતાઞ્જલિઃ ।
તં પ્રણમ્ય મહાત્માનં જગાદ સુખદં વચઃ ॥ ૩૪॥

શિવદત્ત ઉવાચ ।
ગુહ્યં વેદરહસ્યં મે વદ યોગીન્દ્રસત્તમ ।
યેનાહં કૃતકૃત્યશ્ચ ભવિષ્યામિ સુસેવનાત્ ॥ ૩૫॥

ગર્ગ ઉવાચ ।

લક્ષચતુરશીતિષુ યોનિષુ માનવાત્મિકા ।
યોનિઃ શ્રેષ્ઠા મહાભાગ સુજ્ઞો યદુદ્ભવો ભવેત્ ॥ ૩૬॥

ધર્માર્થકામમોક્ષાણાં બ્રહ્મભૂયસ્ય સર્વદા ।
પાત્રતા તસ્ય સમ્ભૂતા તસ્માચ્છ્રેષ્ઠં ન વિદ્યતે ॥ ૩૭॥

તેષુ બ્રાહ્મણવર્ણસ્થઃ શ્રેષ્ઠઃ શાસ્ત્રેષુ સમ્મતઃ ।
સર્વકર્માધિકારિત્વાત્તેષુ શાસ્ત્રજ્ઞ એવ ચ ॥ ૩૮॥

તેષુ સ્વધર્મસંયુક્તોઽધિકસ્તેષુ તપોયુતઃ ।
તેષુ જ્ઞાની મહાશ્રેષ્ઠઃ સર્વત્રાત્મપ્રદર્શનાત્ ॥ ૩૯॥

તેષુ યોગી વિશેષેણાધિકસ્તેષુ મહામતે ।
ગાણપત્યોઽધિકો યોગી પરસ્તસ્માન્ન વિદ્યતે ॥ ૪૦॥

યત્ર તત્રાઽપિ વર્ણસ્થો ગાણપત્યોઽધિકો મતઃ ।
(Page ખં. ૮ અ. ૨૮ પાન ૬૨)
યોગી વેદાદિષુ પ્રોક્તં પશ્ય સંશયનાશનમ્ ॥ ૪૧॥

ઇદં વેદાન્તસમ્ભૂતં સારં તે સમ્પ્રકાશિતમ્ ।
તસ્માદ્ભજ ગણેશાનં કૃતકૃત્યો ભવિષ્યસિ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે વૈશાખમાસમાહાત્મ્યે શિવદત્તબોધો નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૮.૨૭

## ૮.૨૮ શુકગીતાકથનં નામાષ્ટાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવદત્ત ઉવાચ ।
વદ તાત મહાયોગિન્ સર્વસંશયનાશકૃત્ ।
યોગિનઃ પ્રવદન્તીહ નાનામતયુતં વચઃ ॥ ૧॥

કેચિચ્છિવં તથા વિષ્ણું રવિં શક્તિં ગણેશ્વરમ્ ।
કર્મજ્ઞાનં વિદેહં ચાત્માનં શ્રેષ્ઠં વદન્તિ ચ ॥ ૨॥

યોગં સાઙ્ખ્યમથાઽનન્દમવ્યક્તં બોધસંજ્ઞિતમ્ ।
અન્નં પ્રાણં મનો યોગિન્નિત્યાદિબહવો મતાઃ ॥ ૩॥

શ્રેષ્ઠં ગણેશ્વરં ત્વં તુ વદસે સર્વભાવતઃ ।

સર્વમાન્યં વદ સ્વામિંસ્ત્વમસ્માકં પરા ગતિઃ ॥ ૪॥

ગર્ગ ઉવાચ ।
અત્ર તે વર્ણયિષ્યામિ ચેતિહાસં પુરા ભવમ્ ।
શ઼ૃણુષ્વૈકમના વત્સ સર્વમાન્યં વચો મહત્ ॥ ૫॥

એકદા નૈમિષારણ્યે યજ્ઞં ચકાર હર્ષતઃ ।
વસિષ્ઠસ્તત્ર વિપ્રેન્દ્રા દેવેન્દ્રાશ્ચ સમાયયુઃ ॥ ૬॥

નાનાવર્ણાશ્રમપ્રજ્ઞાઃ શ્રેષ્ઠાઃ ત્રૈલોક્યવાસિનઃ ।
આયયુર્હર્ષસંયુક્તા વસિષ્ઠસ્ય મહોત્સવે ॥ ૭॥

યોગિનઃ શુકમુખ્યાશ્ચ નાગાઃ શેષાદયોઽપરે ।
સર્વે સમ્મિલિતાસ્તત્ર કથાં ચક્રુઃ પરસ્પરમ્ ॥ ૮॥

તત્ર વેદાન્તવાદેષુ કુશલા અવદન્ મિથઃ ।
નાનામતસમાયુક્તાઃ શ્રેષ્ઠં સ્વસ્વમતે સ્થિરમ્ ॥ ૯॥

નાનાવાદપરાઃ સર્વે નિશ્ચયં નૈવ લેભિરે ।
તતઃ શુકં નમસ્કૃત્યોચુઃ સર્વે શાન્તિધારકમ્ ॥ ૧૦॥

સર્વશ્રેષ્ઠા ઊચુઃ ।
ભગવન્ સર્વસારજ્ઞ યોગીન્દ્રેષુ મહામતે ।
શ્રેષ્ઠસ્ત્વં શાસ્ત્રવાદેષુ વદ સારં હિતાય નઃ ॥ ૧૧॥

યોગીન્દ્રેષુ શુકશ્રેષ્ઠો વિભૂતિપદગો ભવાન્ ।
ત્વયોક્તં નિશ્ચયં સર્વે ભજિષ્યામો વિશેષતઃ ॥ ૧૨॥

તેષાં તદ્વચનં શ્રુત્વા શુકો ગણપતિં સ્મરન્ ।
જગાદ સર્વસારજ્ઞઃ સભાયાં સર્વસન્નિધૌ ॥ ૧૩॥

શ્રીશુક ઉવાચ ।
અન્નકોશમયં બ્રહ્માન્નસંજ્ઞં રાજસમ્મતમ્ ।
જાગૃત્ સ્થૂલસ્વરૂપસ્થં જ્ઞાતવ્યં વેદવાદતઃ ॥ ૧૪॥

પ્રાણો બ્રહ્મ તથા પ્રાણકોશાનાં તત્ પ્રકાશકમ્ ।
મનઃ કોશમયં બ્રહ્મ મનોમયં પ્રકીર્તિતમ્ ॥ ૧૫॥

વિજ્ઞાનકોશગં બ્રહ્મ વિજ્ઞાનપદવાચકમ્ ।
ત્રિકોશસ્થં ક્રમાત્ સૂક્ષ્મં સ્વાપ્નમન્તરગં મતમ્ ॥ ૧૬॥

આનન્દકોશસંસ્થં યદ્બ્રહ્માનન્દમયં બુધૈઃ ।
સૌષુપ્તમુભયત્રસ્થં સમં વેદવિચારતઃ ॥ ૧૭॥

(Page ખં. ૮ અ. ૨૮ પાન ૬૩)
ચૈતન્યં ચેતનાસંસ્થં બ્રહ્માત્મપ્રત્યયાત્મકમ્ ।
તુરીયમસ્મિતાખ્યં તન્નાદદેહપ્રકાશકમ્ ॥ ૧૮॥

બિન્દુમયં સમાખ્યાતં બ્રહ્મદેહાત્મધારકમ્ ।
ચતુર્ણાં દેહભૂતાનાં સંયોગે ત્વમ્પદાશ્રિતમ્ ॥ ૧૯॥

ઉત્પત્તિસ્થિતિનાશૈર્યુક્તં બ્રહ્મ ચતુર્વિધં મતમ્ ।
પ્રચુરાખ્યં ચતુર્દેહૈઃ તસ્માત્ ત્વમ્પદસંજ્ઞિતમ્ ॥ ૨૦॥

ચતુર્વિધેષુ દેહેષુ સ્મૃતો દેહી સદાત્મકઃ ।
ઉત્પત્તિસ્થિતિનાશેભ્યો હીનઃ સોઽહમ્પદાશ્રયઃ ॥ ૨૧॥

બિન્દુમોહયુતો નિત્યં ભ્રાન્ત્યા નાનાઽવભાસતે ।
એક એવ સ્વયં વેદે કથિતસ્તત્પદાશ્રયઃ ॥ ૨૨॥

દેહાભિમાનયુક્તઃ સ જીવઃ સર્વૈઃ પ્રકથ્યતે ।
દેહાભિમાનહીનશ્ચેત્ પરમાત્મા સ એવ તુ ॥ ૨૩॥

દેહદેહિસમાયોગે યોગોઽસિ પદસંજ્ઞકઃ ।
મનોવાણીવિહીનત્વાત્ બોધરૂપોઽયમુચ્યતે ॥ ૨૪॥

ન બાહ્યો નાન્તરસ્થો યન્ન સમો નાસ્મિતાત્મકઃ ।
ન ચતુર્ણાં હિ સંયોગે બિન્દુમાત્રાત્મકઃ સ્મૃતઃ ॥ ૨૫॥

ન સોઽહઙ્કારરૂપસ્થઃ સદા ભેદવિવર્જિતઃ ।
અતઃ કિં કથનીયં સ્યાત્તત્રૈવં બોધરૂપિણિ ॥ ૨૬॥

બોધેન જ્ઞાયતે સર્વં બોધસ્ય બોધકં ચ ન ।
અતો બોધમયં બ્રહ્માસિપદાખ્યં પ્રકીર્તિતમ્ ॥ ૨૭॥

પ્રકૃતિસઙ્ગતો બોધો બોધઃ પુરુષધારકઃ ।
પ્રકૃતિપુમ્ભવં સૌખ્યં બોધો જાનાતિ સર્વદા ॥ ૨૮॥

પ્રકૃતિપુમ્ભવં સૌખ્યં જ્ઞાત્વા સૃષ્ટ્વા સ્વયં પ્રભુઃ ।
દ્વૈધં તત્ર વિશેષેણ ખેલત્યસિપદાત્મકમ્ ॥ ૨૯॥

તેનાયં સ્વત ઉત્થાનવાચકઃ પરિકીર્તિતઃ ।

બોધાદુત્થાનભાવશ્ચ જાયતે સુવિચક્ષણાઃ ॥ ૩૦॥

તતઃ પરં વિબોધાખ્યં બ્રહ્મ ખેલવિવર્જિતમ્ ।
બોધનાશેન યોગેન લભ્યતે યોગિભિર્મુદા ॥ ૩૧॥

બોધનાશે પ્રસઙ્ખ્યાતું કઃ સમર્થો ભવેન્નરઃ ।
અતઃ સાઙ્ખ્યપરં બ્રહ્મ સઙ્ખ્યાનાશાત્ પ્રકથ્યતે ॥ ૩૨॥

દેહદેહિમયે નિત્યં બ્રહ્મણિ દ્વૈતમાસ્થિતમ્ ।
સ્વસ્વભાવવિહીનેન તસ્માત્ પરં વિબોધકમ્ ॥ ૩૩॥

વિષયાદિષુ બોધેનોત્થાનં સઞ્જાયતે નૃણામ્ ।
બોધનાશાદ્વિબોધાખ્યમુત્થાનવર્જિતં મતમ્ ॥ ૩૪॥

બ્રહ્મણિ બ્રહ્મભૂતસ્યોત્થાનં નૈવ પ્રવર્તતે ।
ઉત્થાનવર્જિતં સાઙ્ખ્યં યોગિભિર્બ્રહ્મ વર્ણ્યતે ॥ ૩૫॥

યદોત્થાનયુતં બ્રહ્મ વર્તતે સર્વવિત્તમાઃ ।
તદોત્થાનવિહીનત્વં મતે ભવતિ યોગિનામ્ ॥ ૩૬॥

અતઃ પરત ઉત્થાનસંયુતં સાઙ્ખ્યસંજ્ઞિતમ્ ।
બ્રહ્મોત્થાનવિહીનત્વાદુત્થાનં જાયતેઽન્યતઃ ॥ ૩૭॥

તયોઃ પરં સ્વસંવેદ્યં બ્રહ્મ સંયોગધારકમ્ ।
સર્વેષાં બ્રહ્મણાં વિપ્રાઃ સંયોગસ્તત્ર તન્મયઃ ॥ ૩૮॥

સ્વસ્વરૂપાત્ પરં બ્રહ્મ સંયોગાખ્યં ન વર્તતે ।
તદેવોત્થાનહીનં ન નૈવોત્થાનવિવર્જિતમ્ ॥ ૩૯॥

તદેવ પઞ્ચધા જાતં બ્રહ્મ સ્વાનન્દવાચકમ્ ।
અસત્ સત્ સમાનેતિસ્વાનન્દભેદૈઃ પ્રકથ્યતે ॥ ૪૦॥

અન્નં બ્રહ્મેતિ યત્ પ્રોક્તં તત્રાન્નમયમુચ્યતે ।
નામ તસ્ય ન સન્દેહોન્નોપાધિત્વાદ્વિચક્ષણાઃ ॥ ૪૧॥

તસ્યાનુભવરૂપં યદ્યોગિનાં હૃદિ જાયતે ।
તદેવ રૂપકં તસ્ય નામરૂપાત્મકં તતઃ ॥ ૪૨॥

સમાધિના મહાયોગી તત્ત્યક્ત્વા પ્રાણબ્રહ્મણિ ।
(Page ખં. ૮ અ. ૨૮ પાન ૬૪)
ગચ્છતિ ચેત્તદાન્નસ્ય લયસ્તત્ર ભવત્ સ્વયમ્ ॥ ૪૩॥

તદ્વત્ ક્રમેણ યોગીન્દ્રાઃ સ્વાનન્દસ્થા ભવન્તિ હિ ।
ત્યક્ત્વા બ્રહ્માણિ સર્વાણિ પ્રાણાદ્યાનિ સમાધિના ॥ ૪૪॥

તદા તેષાં લયસ્તત્ર જાયતે બ્રહ્મણાં કિલ ।
અત ઉત્પત્તિનાશાભ્યાં તાનિ યુક્તાનિ યોગિનઃ ॥ ૪૫॥

ઉત્પત્તિનાશસંયુક્તમસદ્રૂપં પ્રકથ્યતે ।
અતો સન્મૂલકાનિ સ્યુર્બ્રહ્માણિ સ્વસ્વમોહતઃ ॥ ૪૬॥

બોધસાઙ્ખ્યાત્મકે યસ્માજ્જાયતે સ્વસ્વરૂપતઃ ।
તત્રાન્તે યોગભાવેન ગચ્છતો લયમઞ્જસા ॥ ૪૭॥

અતોઽસદ્રૂપસ્વાનન્દો નાનાબ્રહ્મસુ સંસ્થિતઃ ।
સા શક્તિર્વેદવાદેષુ શાક્તં બ્રહ્મ તદુચ્યતે ॥ ૪૮॥

અસતિ જીવનં યચ્ચ સદા ખણ્ડમયં પરમ્ ।
સદ્રૂપં સ્વસ્વરૂપં તદાત્મા ભાનુઃ પ્રકથ્યતે ॥ ૪૯॥

તયોઃ સ્રષ્ટા સમઃ સાક્ષાત્ સ્વાનન્દઃ પરિકીર્તિતઃ ।
વિષ્ણુઃ સ તત્ પ્રવેશાત્તુ બ્રહ્મ વેદે પ્રકથ્યતે ॥ ૫૦॥

ત્રયાણાં નેતિ કર્તા સ્વસ્વાધીનોઽવ્યક્તકઃ શિવઃ ।
ચતુર્ણાં મન્ત્રસંયોગે સ્વાનન્દઃ પૂર્ણ ઉચ્યતે ॥ ૫૧॥

ચતુર્વિધં પ્રસૃષ્ટં તુ સ્થાપિતં સંહૃતં પુરા ।
સ્વાનન્દેન સદા બ્રહ્મ તસ્માત્તન્ માયયા યુતમ્ ॥ ૫૨॥

બ્રહ્મણાં જગતાં તસ્માદ્ભાવસ્તેન પ્રકથ્યતે ।
ભવપ્રત્યયસઞ્જ્ઞં તદ્બ્રહ્મ યત્ સ્વસ્વરૂપકમ્ ॥ ૫૩॥

સમાધિસંજ્ઞિતં બ્રહ્માન્વયાત્ સર્વત્ર કીર્તિતમ્ ।
ભવપ્રત્યયયોગસ્થં સ્વસ્વરૂપં મહૌજસઃ ॥ ૫૪॥

તતઃ પરમયોગાખ્યં બ્રહ્મ માયાવિવર્જિતમ્ ।
માયયા વર્ણનં સર્વં જાયતે તદ્વિવર્જિતમ્ ॥ ૫૫॥

માયયા જગતામત્ર બ્રહ્મણાં ખેલ ઉચ્યતે ।
તેષાં સંયોગભાવશ્ચાયોગે કિં તૈઃ પ્રકથ્યતે ॥ ૫૬॥

યદ્યુત્થાનયુતં બ્રહ્મ તદા બોધમયં ભવેત્ ।

ઉત્થાનવર્જિતં ચૈતદ્ભવેત્ સાઙ્ખ્યવિબોધગમ્ ॥ ૫૭॥

સમાધિસંજ્ઞં યદિ તત્તદા સ્વાનન્દ ઉચ્યતે ।
સ્વસ્ય પ્રવેશનાશાદ્ વૈ ક્રિમયોગે વદત્યયમ્ ॥ ૫૮॥

બ્રહ્મ બ્રહ્મણિ સંસ્થં તન્નાગતં ન ગતં ભવેત્ ।
વ્યતિરેકાત્મયોગેન ગતિર્બ્રહ્મણિ યોગિનામ્ ॥ ૫૯॥

સદા નિવૃત્તિસંજ્ઞં તદ્બ્રહ્મ માયાવિવર્જિતમ્ ।
સ્વસ્વરૂપેણ હીનત્વાન્નિવૃત્તિર્લભ્યતે તતઃ ॥ ૬૦॥

માયાનાશાર્થમત્યન્તમુપાયો હ્યયમેકલઃ ।
ઉપાયપ્રત્યયાખ્યં તદ્બ્રહ્માયોગાત્મકં પરમ્ ॥ ૬૧॥

અયોગાત્ પરમં બ્રહ્મ યોગાખ્યં શાન્તિદાયકમ્ ।
સંયોગાયોગયોર્યોગે લભ્યતે યોગિનાયકૈઃ ॥ ૬૨॥

તદેવ ગણરાજશ્ચ બ્રહ્મણસ્પતિવાચકઃ ।
બ્રહ્મણાં બ્રહ્મરૂપઃ સ શાન્ત્યા યોગેન લભ્યતે ॥ ૬૩॥

સંયોગે ગણરાજસ્તુ ગકારાક્ષરગો મતઃ ।
અયોગે સ ણકારાખ્યસ્તયોઃ પતિઃ પ્રકથ્યતે ॥ ૬૪॥

ઇદં વેદાન્તસારં યત્ કથિતં યોગમાર્ગતઃ ।
તં ભજધ્વં મહાભાગા યદિ શાન્તિં સમિચ્છથ ॥ ૬૫॥

ગર્ગ ઉવાચ ।
એવમુક્ત્વા શુકો યોગી તૂષ્ણીં ભાવેન સંસ્થિતઃ ।
સર્વે વિસ્મિતચિત્તાસ્તં સાધુ સાધ્વિતિ ચાબ્રુવન્ ॥ ૬૬॥

નિઃસંશયાઃ કૃતાસ્તેન ત્યક્ત્વા સ્વસ્વમતં તતઃ ।
ગણેશભજને સક્તા વયં પુત્ર મહામતે ॥ ૬૭॥

ક્રમેણ શાન્તિમાપન્ના ગાણપા અભવંશ્ચ તે ।
ગતા ગણેશ્વરં યોગશાન્તિદં ત્વાં વદામ્યહમ્ ॥ ૬૮॥

(Page ખં. ૮ અ. ૨૯ પાન ૬૫)
શુકગીતા મયા તુભ્યં કથિતા બ્રહ્મદાયિની ।
શૃણુયાદ્યઃ પઠેત્ સોઽપિ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૬૯॥

નાનેન સદૃશં જ્ઞાનં યોગદં કુત્ર વર્તતે ।

શ્રવણાત્ સર્વસિદ્ધિદં ભવિષ્યતિ ક્રમાદિદમ્ ॥ ૭૦॥

યં યમિચ્છતિ તં તં સ લભતે માનવો ધ્રુવમ્ ।
અન્તે સ્વાનન્દવાસી સ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૭૧॥

શુકગીતાસમં કિઞ્ચિત્ વિદ્યતે નૈવ નિશ્ચિતમ્ ।
વેદોપનિષદાદ્યેષુ સારભૂતા હિ કથ્યતે ॥ ૭૨॥

ન શ્રાવ્યા દુર્જનાયેયં વેદગુહ્યમયી પરા ।
યોગિભિઃ શુદ્ધચિત્તેભ્યઃ સુત શ્રાવ્યા પ્રયત્નતઃ ॥ ૭૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે શુકગીતાકથનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૮.૨૮

## ૮.૨૯ વૈશાખમાસમાહાત્મ્યે શિવભક્તિપ્રદાનં નામ એકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવદત્ત ઉવાચ ।
શ્રુત્વા ત્વદ્વદનામ્ભોજાચ્છુકગીતાં સુતોષિતઃ ।
જાતોઽધુના ગણેશસ્ય પ્રાપ્ત્યર્થં વદ માં પિતઃ ॥ ૧॥

ગર્ગ ઉવાચ ।
સમીપે વ્રતમુખ્યં યત્ સમાગતં સુસિદ્ધિદમ્ ।
વૈશાખમાસજં કૃત્વા ગાણપત્યો ભવિષ્યસિ ॥ ૨॥

એવમુક્ત્વા મહાયોગી ગર્ગસ્તસ્મૈ દદૌ પરમ્ ।
ગાણેશપઞ્ચકેનૈકાક્ષરં વિધિસમન્વિતમ્ ॥ ૩॥

તતસ્તેનાભ્યનુજ્ઞાતો ગર્ગઃ સ્વેચ્છાચરો યયૌ ।
શિવદત્તો વ્રતં ચક્રે ગણેશપ્રીતયે પરમ્ ॥ ૪॥

વૈશાખે ધ્યાનસંયુક્તસ્તોષયામાસ શૌનક ।
ગાણેશપઞ્ચકેનૈવ ગણેશં સર્વસિદ્ધિદમ્ ॥ ૫॥

ચતુર્થ્યાં ગણરાજસ્તુ શુક્લાયાં પ્રયયૌ મુનિમ્ ।
બ્રાહ્મણસ્ય સ્વરૂપેણ ભિક્ષાર્થં ક્ષુધિતો ભૃશમ્ ॥ ૬॥

તમાગતં સમાલોક્ય પ્રણનામ કૃતાઞ્જલિઃ ।
જગાદ તં દ્વિજં વિપ્રઃ શિવદત્તો મહાયશાઃ ॥ ૭॥

શિવદત્ત ઉવાચ ।
આસ્યતાં કિં વદ મુને કારણાર્થં સમાગતઃ ।
શક્યં ચેત્તત્ કરિષ્યામિ પ્રીતયે વિઘ્નપસ્ય ચ ॥ ૮॥

દ્વિજ ઉવાચ ।
પારાશર્યં મહાભાગ માં જાનીહિ ન સંશયઃ ।
ક્ષુધિતં વૈ સમાયાતં ત્વદ્ગેહે ભોજનાય તુ ॥ ૯॥

તસ્ય તત્ વચનં શ્રુત્વા હર્ષયુક્ત ઉવાચ તમ્ ।
તાત શુક્લચતુર્થીજં વ્રતં વદસિ કિં મુને ॥ ૧૦॥

ઉપોષણસમાયુક્તા દેવર્ષયો ગજાનનમ્ ।
સેવન્તે ત્વં મહાભાગ વિસ્મૃતોઽસિ વદસ્વ મામ્ ॥ ૧૧॥

તસ્ય તદ્વચનં શ્રુત્વા પારાશર્યસ્તમબ્રવીત્ ।
ન જાનામિ વ્રતાદ્યં તુ સદા ભક્ષણલાલસઃ ॥ ૧૨॥

શ્રુત્વા પ્રણમ્ય ગાર્ગ્યઃ સ નૈવેદ્યં ગણપસ્ય ચ ।
દદૌ તસ્મૈ સ ભુક્ત્વા તં તૃપ્ત્વા જગાદ હર્ષિતઃ ॥ ૧૩॥

પારાશર્ય ઉવાચ ।
તવ ભાવેન સન્તુષ્ટો જાતોઽહં દ્વિજસત્તમ ।
(Page ખં. ૮ અ. ૨૯ પાન ૬૬)
વરં બ્રૂહિ પ્રદાસ્યામિ યત્તે ચિત્તે ભવેન્ મુને ॥ ૧૪॥

ગાર્ગ્ય ઉવાચ ।
કિં વૃણોમિ મહાવિપ્ર સર્વં માયામયં જગત્ ।
ગણેશતત્પરશ્ચાહં ગચ્છ ત્વં નિજમન્દિરમ્ ॥ ૧૫॥

એવં તસ્ય વચઃ શ્રુત્વા પુનસ્તં સ દ્વિજોઽબ્રવીત્ ।
નયામિ સ્વગૃહં વિપ્ર વરદોઽહં સમાગતઃ ॥ ૧૬॥

તતસ્તં હઠસંયુક્તં દૃષ્ટ્વા ગાર્ગ્ય ઉવાચ હ ।
ગણેશં દર્શય સ્વામિન્નાન્યં યાચે વરં પરમ્ ॥ ૧૭॥

એવમુક્તો દ્વિજસ્તં સઞ્જગાદ મોહદં વચઃ ।
ત્યક્ત્વા નાનાવિધૈશ્વર્યં કિં વૃણોષિ ગજાનનમ્ ॥ ૧૮॥

અહં યોગીન્દ્રમુખ્યશ્ચ દાસ્યામિ સકલં સુખમ્ ।

એવમુક્ત્વા સ ગાર્ગ્યાય દર્શયામાસ ચૈન્દ્રકમ્ ॥ ૧૯॥

નાનાદેવયુતો વિપ્રમિન્દ્રસ્તં પ્રણનામ હ ।
દાસોઽહં તે મહાભાગ ભુઙ્ક્ષ્વ ત્વં સુખમૈન્દ્રજમ્ ॥ ૨૦॥

એવમુક્ત્વા ચકારાઽસૌ માયયા વૈભવં પરમ્ ।
ગાર્ગ્યસ્તં નશ્વરં મત્વા ન દધ્રે ગણપે રતઃ ॥ ૨૧॥

તતોંઽતર્ધાનમકરોદિન્દ્રઃ સ્વનગરં યયૌ ।
સત્યલોકસમાયુક્તસ્તત્ર બ્રહ્મા સમાયયૌ ॥ ૨૨॥

જગાદ સત્યલોકસ્ય ગાર્ગ્યં બ્રહ્મા મુદાન્વિતઃ ।
રાજ્યં કુરુ મહાભાગ ભજ પશ્ચાદ્ગણેશ્વરમ્ ॥ ૨૩॥

અનૌપમ્યં સુખં દૃષ્ટ્વા ગાર્ગ્યો વિઘ્નેશ્વરે રતઃ ।
ન મુમોહ જગાદૈવ ભોગં નેચ્છામિ ભો વિધે ॥ ૨૪॥

તતોંઽતર્ધાનમકરોદ્બ્રહ્મા લોકપિતામહઃ ।
આયયૌ કેશવસ્તત્ર વિકુણ્ઠેન સમન્વિતઃ ॥ ૨૫॥

વિકુણ્ઠવિભવં દૃષ્ટ્વા ગાર્ગ્યો ગણપતિં ભજન્ ।
પ્રાર્થયન્તં મહાવિષ્ણું ત્યક્ત્વા યોગપરોઽભવત્ ॥ ૨૬॥

તતઃ સોઽપિ યયૌ સ્થાનમાયયૌ તત્ર શઙ્કરઃ ।
કૈલાસેન સમાયુક્તો નાનાવિભવમોહદઃ ॥ ૨૭॥

શિવેન પ્રાર્થિતો ગાર્ગ્યઃ કૈલાસે રાજ્યકારણાત્ ।
ન ચકાર સ વૈ તત્ર મતિં ગણપતૌ રતઃ ॥ ૨૮॥

શિવોંઽતર્ધાનમકરોત્તતસ્તં પુનરબ્રવીત્ ।
પારાશર્યો મહાયોગી ગાર્ગ્યં નિન્દાપરાયણઃ ॥ ૨૯॥

પારાશર્ય ઉવાચ ।
મૂર્ખોઽસિ હતભાગ્યોઽસિ ગણેશં કિં કરિષ્યસિ ।
બ્રહ્માકારમતો ભુઙ્ક્ષ્વ ભોગાન્નાનાવિધાન્ પરાન્ ॥ ૩૦॥

સત્યસઙ્કલ્પજાન્ ભોગાન્ ભુક્ત્વા ચાન્તે ગણેશ્વરમ્ ।
ભજિષ્યસિ ન સન્દેહો બ્રહ્માણ્ડાધિપતિર્ભવ ॥ ૩૧॥

ગાર્ગ્ય ઉવાચ ।
અસત્યં દીનજં સૌખ્યં પરાધીનાત્મકં મુને ।

સત્યસઙ્કલ્પજં સૌખ્યં સત્યમનુપમં પરમ્ ॥ ૩૨॥

સત્યાસત્યાદિભેદાશ્ચ માયાયુક્તા ન સંશયઃ ।
ક્ષણભઙ્ગુરદેહસ્થો નેચ્છામિ યોગિસત્તમ ॥ ૩૩॥

અથ વેશ્વરભાવેનામૃતરૂપં કરોષિ મામ્ ।
તથાપિ યોગનિપુણઃ સુખં નેચ્છામિ ચૈશ્વરમ્ ॥ ૩૪॥

ત્વં કિમર્થમિહાયાતશ્છલયિતું મહાખલ ।
ગચ્છ સ્વ ભવનં વિપ્ર ગણેશે ભક્તિખણ્ડક ॥ ૩૫॥

એવં તિરસ્કૃતસ્તેન પારાશર્યો મહામુનિઃ ।
પ્રહસ્ય ગણપાકારો બભૂવે તત્ક્ષણાન્ મુને ॥ ૩૬॥

જગાદ તં મહાભાગં શિવદત્તં ગજાનનઃ ।
પશ્ય માં ગણનાથં ત્વં પરાશરસુતં મુને ॥ ૩૭॥

સ દૃષ્ટ્વા ગણરાજં તં પ્રણનામ કૃતાઞ્જલિઃ ।
સાશ્રુનેત્રોઽભવત્ સદ્યો નનર્ત પ્રેમવિહ્વલઃ ॥ ૩૮॥

દેહભાવં સમાસાદ્ય તં પુપૂજ ગજાનનમ્ ।
(Page ખં. ૮ અ. ૨૯ પાન ૬૭)
મુદા યુતઃ પ્રતુષ્ટાવ શિવદત્તઃ કૃતાઞ્જલિઃ ॥ ૩૯॥

શિવદત્ત ઉવાચ ।
ગણેશાય નમસ્તુભ્યં પરાશરાત્મજાય તે ।
શિવપુત્રાય શેષસ્ય પુત્રાય વૈ નમો નમઃ ॥ ૪૦॥

સર્વપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
ભ્રાત્રે સુહૃદ્ગણાયૈવ સ્નુષાદિવેષધારિણે ॥ ૪૧॥

અનન્તરૂપિણે તુભ્યં નાનાભોગવિહારિણે ।
ભોગહીનાય દેવાય સુરાય તે નમો નમઃ ॥ ૪૨॥

અપારગુણધારાય ગુણાનાં પતયે નમઃ ।
ગણેશાય પરેશાય પૂર્ણાનન્દાય તે નમઃ ॥ ૪૩॥

આદિમધ્યાન્તરૂપૈશ્ચ સ્રષ્ટ્રે પાત્રે પ્રહારિણે ।
આદિમધ્યાન્તહીનાય સાક્ષિણે તે નમો નમઃ ॥ ૪૪॥

સ્વાનન્દપતયે તુભ્યં મૂષકવાહનાય ચ ।

સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૪૫॥

યોગાનાં પતયે તુભ્યં યોગશાન્તિસ્વરૂપિણે ।
ગજાનનાય શાન્તિભ્યઃ શાન્તિદાત્રે નમો નમઃ ॥ ૪૬॥

પરેશાય મહાદીનપાલકાય નમો નમઃ ।
સર્વેભ્યઃ સુખદાત્રે તે વિઘ્નેશાય નમો નમઃ ॥ ૪૭॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ વેદાઃ શાન્તિં ગતાસ્ત્વયિ ।
અતો નમો નમો નાથ તુષ્ટો ભવ મહોદર ॥ ૪૮॥

રજાંસિ સ્વસ્થિતાસ્તારા મેઘબિન્દૂંશ્ચ માનવઃ ।
ગણયેત્ કોઽપિ તે નાથ ન ગુણાન્ વર્ણિતું ક્ષમઃ ॥ ૪૯॥

ધન્યોઽહં સર્વભાવૈશ્ચ યેન દૃષ્ટો ગજાનનઃ ।
વેદાન્તાગોચરે ગમ્યો યોગિભિશ્ચ શિવાદિભિઃ ॥ ૫૦॥

એવં સ્તુત્વા ગણેશાનં નનામ મુનિપુઙ્ગવઃ ।
તમુવાચ ગણાધીશઃ સ્વભક્તં ભક્તલોલુપઃ ॥ ૫૧॥

શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ યે તે ચિત્તે દદામિ તાન્ ।
પ્રસન્નોઽહં ચ તે ભક્ત્યા સ્તોત્રેણ મુનિસત્તમ ॥ ૫૨॥

શિવદત્ત ઉવાચ ।
ભક્તિં દેહિ ત્વદીયાં મે દૃઢામવ્યભિચારિણીમ્ ।
નાન્યં યાચે ગણાધીશ ત્વત્પાદપ્રવણો હ્યહમ્ ॥ ૫૩॥

શ્રીગણેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામતે ।
સ્મૃતિમાત્રેણ તે કાર્યં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૫૪॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં પઠનાન્નૃણામ્ ।
શ્રવણાત્ સિદ્ધિદં સર્વં ભવિષ્યતિ નિરન્તરમ્ ॥ ૫૫॥

યદ્યદિચ્છતિ તત્તત્તુ સફલં પ્રભવિષ્યતિ ।
સ્તોત્રપાઠેન વિપ્રર્ષે મયિ ભક્તિપ્રદં તથા ॥ ૫૬॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
શિવદત્તો ગણેશાનં સઞ્ચિન્ત્ય સ્વાશ્રમે સ્થિતઃ ॥ ૫૭॥

સદા યોગીન્દ્રવન્દ્યઃ સ બભૂવે ગાણપાગ્રણીઃ ।
અન્તે વિઘ્નેશ્વરે યોગી લીનો બભૂવ શૌનક ॥ ૫૮॥

એવં વૈશાખજં મુખ્યં વ્રતં સર્વાર્થદં પરમ્ ।
કથિતં તે મહાભાગ શ્રવણાત્ સર્વસિદ્ધિદમ્ ॥ ૫૯॥

વૈશાખવ્રતસંયુક્તં શિવદત્તચરિત્રકમ્ ।
યઃ પઠેચ્છૃણુયાદ્ વાઽપિ સ સર્વફલભાગ્ભવેત્ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે વૈશાખમાસમાહાત્મ્યે શિવભક્તિપ્રદાનં નામ એકોનત્રિંશોઽધ્યાયઃ ॥ ૮.૨૯
(Page ખં. ૮ અ. ૨૦ પાન ૬૮)

## ૮.૩૦ વૈશાખમાસમાહાત્મ્યે નાનાજનોદ્ધારવર્ણનં નામ ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
વિશ્વાવસુશ્ચ નામ્ના કો દ્રાવિડે વૈશ્યયોનિજઃ ।
શ્રુત્વા વૈશાખમાહાત્મ્યં ગાણેશં મુદિતોઽભવત્ ॥ ૧॥

સ કુટુમ્બપરો નિત્યં વ્યવસાયં ચકાર હ ।
સ્નાત્વા વૈશાખમાસે તુ દીપદાનપરોઽભવત્ ॥ ૨॥

પૂર્ણિમાયાં નિશાયાં સ સ્વગૃહં ગન્તુમુદ્યતઃ ।
વ્યવસાયં પરિત્યજ્ય માર્ગસંસ્થો બભૂવ હ ॥ ૩॥

તત્ર તં ભક્ષિતું કોઽપિ રાક્ષસઃ ક્રૂરરૂપધૃક્ ।
આયયૌ નગરસ્યૈવ વીથ્યાં વિશ્વાવસું મુને ॥ ૪॥

તમાગતં સમાલોક્ય વિશ્વાવસુઃ સુવિહ્વલઃ ।
સસ્માર ગણપં ચિત્તે પપાત ભૂતલે ભયાત્ ॥ ૫॥

તમાલોક્ય ધરાસંસ્થં રાક્ષસઃ સહસા મુને ।
જાતિસ્મરો બભૂવાઽપિ રુરોદ તં પ્રમાર્જયન્ ॥ ૬॥

તતો વિશ્વાવસું વૈશ્યં સાવધાનં ક્ષણાર્ધતઃ ।
તં પ્રણમ્ય મહાભાગં રાક્ષસસ્તુ વચોઽબ્રવીત્ ॥ ૭॥

ધૂમ્ર ઉવાચ ।

ધૂમ્રનામાનમેવં માં વિદ્ધિ વૈશ્યકુલોદ્ભવ ।
તવ દર્શનમાત્રેણ સ્મરન્ જાતિં ન સંશયઃ ॥ ૮॥

પૂર્વજન્મનિ વિપ્રોઽહં સુરુચિર્નામતોઽભવમ્ ।
વિશ્વામિત્રકુલે સંસ્થઃ પાપકર્મપરાયણઃ ॥ ૯॥

મયા શૂદ્રાય દીક્ષા વૈ દત્તા પૌરાણિકી પરા ।
માત્સ્યી સ નિત્યમેવેદં પુરાણમપઠન્ મુદા ॥ ૧૦॥

બ્રાહ્મણૈર્નિન્દિતં તત્ર સ્વધર્મદૂષકં પરમ્ ।
મૃતં માં યમદૂતા વૈ ગૃહ્ય જગ્મુઃ સ્વમાલયમ્ ॥ ૧૧॥

ચિત્રગુપ્ત ઉવાચાઽથ યમં નીતિવિશારદમ્ ।
સ્વધર્મનિરતશ્ચાયં સદાચારયુતોઽભવત્ ॥ ૧૨॥

માત્સ્યં સ વિપ્રઃ શૂદ્રાયાઽશિક્ષાપયત્ સુમન્દધીઃ ।
બ્રહ્મણૈર્વારિતઃ પાપી પાપકર્મપરોઽભવત્ ॥ ૧૩॥

તચ્છ્રુત્વા ધર્મરાજસ્તમુવાચ ક્રોધસંયુતઃ ।
માં વીક્ષ્ય તાડ્યતાં દૂતસ્તથેતિ સ ચકાર હ ॥ ૧૪॥

ભુક્તભોગોઽહમત્યન્તં રાક્ષસો વૈશ્યસત્તમ ।
જાતોઽત્ર ક્ષુધયાઽઽવિષ્ટો ભ્રમામિ તુ દિવાનિશમ્ ॥ ૧૫॥

ત્વાં દૃષ્ટ્વા પૂર્વપુણ્યેન જાતિસ્મર ઇહાઽભવમ્ ।
અધુના તારયસ્વ ત્વં માં સંસારાન્ મહામતે ॥ ૧૬॥

નોચેદ્દેહપરિત્યાગં કરિષ્યામિ ત્વદગ્રતઃ ।
એવમુક્ત્વા પ્રણમ્યાદૌ રુરોદ રાક્ષસો મહાન્ ॥ ૧૭॥

તતો દયાયુતો વૈશ્યસ્તમુવાચ સુવિસ્મિતઃ ।
કિં કરોમિ વદ પ્રાજ્ઞ ધૂમ્ર તે તારણાય મામ્ ॥ ૧૮॥

ધૂમ્ર ઉવાચ ।
વૈશાખે દીપદાનં ત્વં કરોષિ ઢુણ્ઢિસન્નિધૌ ।
તદ્ભવં દેહિ મે પુણ્યં તેન મુક્તો ભવામ્યહમ્ ॥ ૧૯॥

વિશ્વાવસુરુવાચ ।
દીપદાનં ગણેશાગ્રે ચેત્ કરોતિ નરોત્તમઃ ।
અપારં તદ્ભવં પુણ્યં ન દાસ્યામિ કદાચન ॥ ૨૦॥

તથાપિ શ‌ૃણુ મે વાક્યમેકવર્તિજદીપતઃ ।
યજ્જાતં તદ્ગૃહાણ ત્વં તેન મુક્તો ભવિષ્યસિ ॥ ૨૧॥

એવમુક્ત્વા દદૌ તસ્મૈ પુણ્યં દીપસમુદ્ભવમ્ ।
એકવર્તિકૃતં પૂર્ણં ગણેશાગ્રે મહામુને ॥ ૨૨॥

તતસ્તત્ર સમાયાતા વિમાનવરસંસ્થિતાઃ ।
ગાણેશા રાક્ષસં ધૂમ્રં ગૃહ્ય સ્વાનન્દમાયયુઃ ॥ ૨૩॥

એવં વ્રતસ્ય માહાત્મ્યં વૈશાખે સમ્ભવસ્ય ચ ।
ગાણેશાનાં મહાભાગ તત્ર કિં વર્ણયામ્યહમ્ ॥ ૨૪॥

અન્યચ્ચ શ‌ૃણુ વિપ્રર્ષે વૈશાખમાસગં મહત્ ।
ચરિત્રં સર્વપાપઘ્નં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૨૫॥

(Page ખં. ૮ અ. ૩૧ પાન ૬૯)
કશ્ચિચ્છૂદ્રો મહાપાપી ગણેશાલયમાયયૌ ।
ચૌર્યાર્થં તત્ર રાત્રૌ સ વસ્ત્રગ્રહણલાલસઃ ॥ ૨૬॥

સમીપે ગણરાજસ્ય યયૌ વૈશાખમાસકે ।
દીપં તેજોવિહીનં સ દદર્શ ઢુણ્ઢિસન્નિધૌ ॥ ૨૭॥

સ વર્તિં ચાલયામાસ કૃત્વા દીપં સુતેજસમ્ ।
વસ્ત્રગ્રહણસંસક્તો બભૂવે જાતિદૂષકઃ ॥ ૨૮॥

તતોઽકસ્માન્નરં તત્ર રાજ્ઞઃ કં ચ સમાગતમ્ ।
દેવાલસ્ય રક્ષણાર્થં તં દૃષ્ટ્વા સ પપાલ હ ॥ ૨૯॥

તતો હાહાકૃતં તેન સદ્યો લોકૈઃ સમાગતૈઃ ।
તૈર્હતો યોજને દૂરં મૃતો યામૈર્હતોઽભવત્ ॥ ૩૦॥

ભુક્ત્વા નાનાવિધાં યામ્યાં યાતનાં યમસન્નિધૌ ।
સમાનીતં યમઃ પ્રાહ તં શૂદ્રં ક્રોધસંયુતઃ ॥ ૩૧॥

વર્તિસ્ત્વયા ગણેશાગ્રે ચાલિતા દીપસંસ્થિતા ।
તેન પ્રકાશકસ્તત્ર બભૂવ સુખદાયકઃ ॥ ૩૨॥

તસ્ય પુણ્યં ત્વયા પ્રાપ્તં તદ્ભોક્ષ્યસિ પુરાઽથ વા ।
પાપાનિ વદ પાપિષ્ઠ કરિષ્યામિ ત્વદીપ્સિતમ્ ॥ ૩૩॥

શૂદ્રો યમં જગદાથાઽઽદૌ પુણ્યં દેહિ મે પ્રભો ।

ભોક્તું પશ્ચાન્ મહત્ પાપં તથેતિ સ ચકાર હ ॥ ૩૪॥

તતઃ સ વૈશ્યજો જાતો નામ્ના ધર્મપ્રિયો મહાન્ ।
નાનાભોગયુતો નિત્યં યૌવનસ્થો બભૂવ હ ॥ ૩૫॥

ગણેશભક્તોઽસૌ તત્ર પ્રીતિયુક્તો મહામુને ।
દીપદાનં વિશેષેણ ચકાર હર્ષસંયુતઃ ॥ ૩૬॥

અન્તે પાપવિહીનઃ સ જગામ ગણનાયકમ્ ।
બ્રહ્મભૂતો બભૂવાપિ પૂર્વસંસ્કારભાવતઃ ॥ ૩૭॥

એવં કિઞ્ચિચ્ચ સંસ્કારાદુદ્ધરન્તિ જનાદયઃ ।
વૈશાખજાન્ન સન્દેહઃ કતિ તત્ર બ્રુવે મુને ॥ ૩૮॥

ઇદં વૈશાખમાસસ્ય ચરિત્રં ભુક્તિમુક્તિદમ્ ।
કથિતં તે સમાસેન નાનાભોગકરં પરમ્ ॥ ૩૯॥

યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ સર્વાર્થયુતો ભવેત્ ।
અન્તે ગણપતૌ લીનો ભવેદ્ભાવપરાયણઃ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે વૈશાખમાસમાહાત્મ્યે નાનાજનોદ્ધારવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૮.૩૦

## ૮.૩૧ જાલન્ધરવધો નામૈકત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
અધુના શ‍ૃણુ માહાત્મ્યં શ્રાવણસ્ય સુખપ્રદમ્ ।
ગણનાથપ્રિયં વિપ્ર સમાસેન વદામ્યહમ્ ॥ ૧॥

રામો દાશરથિઃ શૂરઃ સાક્ષાદ્વિષ્ણુઃ પ્રતાપવાન્ ।
સભાસનગતસ્તત્રાગતાન્ વિપ્રાન્નનામ હ ॥ ૨॥

પૂજિતાસ્તેન તં સર્વે જગુર્લવણચેષ્ટિતમ્ ।
તદ્વધાર્થં વયં રામ યાતાસ્તં જહિ રાઘવ ॥ ૩॥

તથેતિ તાનુવાચાઽસૌ દ્વિજાન્ પપ્રચ્છ રાઘવઃ ।
દુર્જયસ્ય જયઃ કેન ભવિષ્યતિ ચ મે દ્વિજાઃ ॥ ૪॥

તતસ્તં બ્રાહ્મણાઃ પ્રાહુર્ગણેશસ્યાભિષેચનમ્ ।

સૂક્તૈર્ગાણેશકૈસ્તેન વિજયી ત્વં ભવિષ્યસિ ॥ ૫॥

(Page ખં. ૮ અ. ૩૧ પાન ૭૦)
માસેષુ શ્રાવણો મુખ્યઃ સમાગતોઽધુના પ્રભો ।
વિઘ્નેશપ્રીતિદોઽત્યન્તમમાયુક્તો વ્રતં કુરુ ॥ ૬॥

એવમુક્ત્વા વિધિં તસ્મૈ કથયામાસુરાદરાત્ ।
ગણેશમભજત્તત્ર શત્રુઘ્નઃ પરવીરહા ॥ ૭॥

ઉપોષણસમાયુક્તઃ સ્વયં દુગ્ધમભક્ષયત્ ।
અભિષેકપરો ભૂત્વા તોષયામાસ વિઘ્નપમ્ ॥ ૮॥

માસમાત્રં વ્રતં કૃત્વા ગણેશં નમ્ય રાઘવઃ ।
શત્રુઘ્નો બ્રાહ્મણૈઃ સાર્ધં યયૌ લવણરાક્ષસમ્ ॥ ૯॥

ત્રિશૂલેન વિહીનં સંરુધ્ય તં લક્ષ્મણાનુજઃ ।
સ્મૃત્વા ગણેશ્વરં દુષ્ટં જઘાન શરઘાતતઃ ॥ ૧૦॥

મહોઽગ્રં પતિતં યુદ્ધં તયોઃ સર્વભયઙ્કરમ્ ।
તતઃ ખડ્ગેન શત્રુઘ્નસ્તસ્ય ચિચ્છેદ મસ્તકમ્ ॥ ૧૧॥

તતો દેવગણાઃ સર્વે પુષ્પવૃષ્ટિં પ્રચક્રિરે ।
શત્રુઘ્નોપરિ શત્રુઘ્નો જય હેરમ્બ ચાબ્રવીત્ ॥ ૧૨॥

બ્રાહ્મણૈઃ પૂજિતઃ સોઽપિ પ્રણમ્ય દ્વિજપુઙ્ગવાન્ ।
આવાસં મથુરાં તત્ર સુદેશાં તાં ચકાર હ ॥ ૧૩॥

ગતે કિયતિ કાલે સંસ્થાપ્ય પુત્રં મહામતિઃ ।
માથુરે રામચન્દ્રં તુ યયૌ ભક્તિપરાયણઃ ॥ ૧૪॥

એવં શ્રાવણમાસે વૈ ગણેશસ્ય મહાત્મનઃ ।
અનુષ્ઠાનફલં પ્રોક્તં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૫॥

અન્યત્ત્વં શ◌ૃણુ માહાત્મ્યં શ્રાવણવ્રતજં મહત્ ।
જાલન્ધરવધાર્થાય યચ્છિવેન કૃતં પુરા ॥ ૧૬॥

જાલન્ધરેણ દૈત્યેન જિતં સર્વં ચરાચરમ્ ।
ત્રૈલોક્યાધિપતિઃ સોઽપિ બભૂવ વરદાનતઃ ॥ ૧૭॥

આસુરં કર્મ સર્વત્ર કારયામાસ દૈત્યપૈઃ ।
ન સ્વાહા ન સ્વધા કુત્ર બભૂવે ભૂમિમણ્ડલે ॥ ૧૮॥

એવં બહૌ ગતે કાલે ગૃહીતું પાર્વતીં યયૌ ।
જાલન્ધરસ્તતો યુદ્ધં બભૂવે દેવદૈત્યયોઃ ॥ ૧૯॥

દેવૈઃ પરાજિતા દૈત્યાઃ પપલુસ્તે દિશો દશ ।
તતો જાલન્ધરઃ ક્રુદ્ધો યુયુધે શસ્ત્રધારકઃ ॥ ૨૦॥

જિતઃ શમ્ભુઃ સુરેશાનૈઃ પપાલ ભયસઙ્કુલઃ ।
અન્તર્દધે મહાશક્તિઃ સ તતો વિસ્મિતોઽભવત્ ॥ ૨૧॥

સ્વગૃહં દૈત્યરાજઃ સ સમાગત્યાતિવિહ્વલઃ ।
કામબાણાભિભૂતઃ સન્ સસ્માર જગદમ્બિકામ્ ॥ ૨૨॥

ન લેભે કુત્રચિચ્છર્મ નાનાશીતલજાતિષુ ।
જજ્વાલ કામજેનૈવ વહ્નિના ભૃશદુઃખિતઃ ॥ ૨૩॥

અથ દેવગણાઃ સર્વે પર્વતદ્રોણિમાશ્રિતાઃ ।
વિચારં તસ્ય નાશાર્થં ચક્રુર્જાલન્ધરસ્ય તે ॥ ૨૪॥

તતો બૃહસ્પતિઃ પ્રાહ શઙ્કરાદીન્ સુરેન્દ્રકાન્ ।
શ્રાવણે ગણનાથસ્યાનુષ્ઠાનં કુરુત પ્રિયાઃ ॥ ૨૫॥

તથેતિ ગુરુણા યુક્તા દેવાઃ શમ્ભ્વાદયોઽપરે ।
મુનયો ગણનાથં વૈ દૂર્વાભિરન્વતોષયન્ ॥ ૨૬॥

દિવા રાત્રૌ ગણાધીશમભજન્નૈકચેતસઃ ।
સમાપ્તે શ્રાવણે માસે ભાદ્રિં યાત્રાં પ્રચક્રિરે ॥ ૨૭॥

પઞ્ચમ્યાં પારણં કૃત્વા પ્રણિપત્ય ગજાનનમ્ ।
પ્રેરિતા આકાશગિરા તં મહાદૈત્યમાયયુઃ ॥ ૨૮॥

યુદ્ધં કૃત્વા મહાઘોરં જલન્ધરેણ શઙ્કરઃ ।
સ્મૃત્વા ગજાનનં ચિત્તે ત્રિશૂલેન જઘાન તમ્ ॥ ૨૯॥

સ સ્મૃતઃ શિવદેહે તુ લયં યયૌ મહાસુરઃ ।
દેવા મુનિયુતાઃ શમ્ભું તુષ્ટુવુઃ પૂજ્ય ભક્તિતઃ ॥ ૩૦॥

જાલન્ધરં મહાદૈત્યમેવં જિત્વા સદાશિવઃ ।
સ્થાપયામાસ દેવાદીન્ સ્વસ્થાનેષુ યથા પુરા ॥ ૩૧॥

વર્ણાશ્રમયુતાંલ્લોકાન્ ચકાર શઙ્કરઃ પ્રભુઃ ।

(Page ખં. ૮ અ. ૩૨ પાન ૭૧)
નિત્યવચ્છ્રાવણે માસેઽનુષ્ઠાનસંયુતોઽભવત્ ॥ ૩૨॥

એકનિષ્ઠતયા શમ્ભુઃ સિષેવે ગણનાયકમ્ ।
નિત્યં ધ્યાનપરો ભૂત્વા તમેવાચિન્તયત્ પ્રભુમ્ ॥ ૩૩॥

એવં શ્રાવણમાસસ્ય વ્રતં તે કથિતં મયા ।
યેન વ્રતપ્રભાવેણ શમ્ભુર્જિગ્યે જલન્ધરમ્ ॥ ૩૪॥

ઇદં યઃ શૃણુયાન્નિત્યં શ્રાવયેદ્વા પઠેત્ સ્વયમ્ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાપ્નુયાત્ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે શ્રાવણમાસમાહાત્મ્યે જાલન્ધરવધો નામૈકત્રિંશોઽધ્યાયઃ ॥ ૮.૩૧

## ૮.૩૨ શ્રાવણમાસમાહાત્મ્યે ગાલવસંશયનાશનં નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
અવન્તીનગરીમધ્યે બભૂવ બ્રાહ્મણોત્તમઃ ।
ગાલવઃ સર્વધર્મજ્ઞઃ સર્વશાસ્ત્રવિશારદઃ ॥ ૧॥

શાપાનુગ્રહયોઃ શક્તસ્તપસ્તેજોયુતો મુનિઃ ।
ચચાર પૃથિવીં સર્વાં મુને યાત્રાપરઃ કદા ॥ ૨॥

સ્વગુરું સ સમાગમ્ય વિશ્વામિત્રં મહામુનિમ્ ।
યાત્રાં સમાપ્ય તત્રૈવ સંસ્થિતોઽભૂત્ સુશીલગઃ ॥ ૩॥

ગણેશભજને સક્તં વિશ્વામિત્રં તપોનિધિમ્ ।
એકનિષ્ઠતયા દૃષ્ટ્વા તમુવાચ કૃતાઞ્જલિઃ ॥ ૪॥

ગાલવ ઉવાચ ।
પઞ્ચભૂતાત્મકો દેહો નશ્વરઃ સર્વસમ્મતમ્ ।
દેહસંસ્થં ગણેશાનં તં કથં ભજસે પ્રભો ॥ ૫॥

યોગીન્દ્રાણાં ગુરુઃ સાક્ષાત્ત્વં બ્રહ્મપદધારકઃ ।
બ્રહ્મભૂતસ્વભાવં કિં ત્યક્ત્વા ભજસિ વિઘ્નપમ્ ॥ ૬॥

અયં બ્રહ્મપતિઃ સાક્ષાદ્વેદેષુ કથિતોઽભવત્ ।

કથં દેહધરઃ સોઽપિ બભૂવ ચ ગજાનનઃ ॥ ૭॥

રુચ્યર્થં બ્રહ્મપ્રાપ્ત્યર્થં સેવનં ચાસ્ય મુખ્યકમ્ ।
તદર્થં કથિતં સ્વામિન્ વેદૈઃ કિં યોગિનાં મતમ્ ॥ ૮॥

ગણેશપૂજનેનૈવ શુદ્ધચિત્તો નરો ભવેત્ ।
સ્વલ્પકાલેન યોગજ્ઞો યોગનિષ્ઠો ન સંશયઃ ॥ ૯॥

સર્વત્રાત્મસ્વભાવેનૈકાગ્રવૃત્તિપરો યદા ।
ત્યક્ત્વા ગજાનનં તાત જડોન્મત્તાદિવચ્ચરેત્ ॥ ૧૦॥

ત્વં શાન્તિયોગયુક્તઃ સન્નધુનાઽપિ ગજાનનમ્ ।
ભજસે કિં મહાયોગિન્ લોકાનાં સઙ્ગ્રહાય વા ॥ ૧૧॥

સૂત ઉવાચ ।
એવં વદન્તમત્યન્તં મુનિર્નિર્ભર્ત્સ્ય ગાલવમ્ ।
વિશ્વામિત્રઃ સ્વશિષ્યં તમુવાચ જ્ઞાનદાયકઃ ॥ ૧૨॥

વિશ્વામિત્ર ઉવાચ ।
મૂર્ખોઽસિ નૈવ જાનાસિ ગણેશં બ્રહ્મનાયકમ્ ।
સર્વવત્તં વિશેષેણ ત્વં મા જાનીહિ ગાલવ ॥ ૧૩॥

પઞ્ચચિત્તમયી બુદ્ધિઃ સ્વેચ્છયા દેહધારિણી ।
નાનાભ્રાન્તિકરી સિદ્ધિર્બભૂવે સર્વદા તથા ॥ ૧૪॥

તયોઃ સ્વામી ગણેશાનો દેહધારી બભૂવ હ ।
સ્વેચ્છયા ક્રીડનાર્થાય માયાભ્યાં માયિકો યથા ॥ ૧૫॥

દેહો જગન્મયો યસ્ય ગજાકારં શિરઃ પ્રભોઃ ।
બ્રહ્મમયં તયોર્યોગે દેહધારી ગજાનનઃ ॥ ૧૬॥

(Page  ખં. ૮ અ. ૩૨ પાન ૭૨)
યોગિનાં હૃદયે ઢુણ્ઢિર્વર્તતે કથિતો મયા ।
અજ્ઞાનિનાં નિરાકારઃ પઞ્ચભૂતાત્મકસ્તથા ॥ ૧૭॥

સગુણં નિર્ગુણં ભિન્નં ગણેશસ્ય ન વિદ્યતે ।
નોત્પત્તિનાશભાવશ્ચ સર્વવન્મૂર્ખસત્તમ ॥ ૧૮॥

અયં દેહયુતઃ પ્રોક્તઃ સ્વેચ્છયા દેહવર્જિતઃ ।
અન્તર્ધાય સ્વમાત્માનં તિષ્ઠતિ યોગનાયકઃ ॥ ૧૯॥

વિશ્વં બ્રહ્મયુતં સર્વં લયં ગતં યદા મુને ।
બ્રહ્મણસ્પતિસંજ્ઞે ચ યોગે તન્મયભાવતઃ ॥ ૨૦॥

નરકુઞ્જરરૂપં તદભેદેન સમાસ્થિતમ્ ।
તત્પ્રાપ્ત્યર્થં વિભિન્નં ચ ભવતિ ભક્તિલાલસમ્ ॥ ૨૧॥

યોગી યોગબલેનૈવ ભવતિ બ્રહ્મરૂપગઃ ।
તથાપિ બ્રહ્મસામર્થ્યં તસ્ય દેહે ન વિદ્યતે ॥ ૨૨॥

બ્રહ્મણસ્પતિશબ્દાર્થા સત્તા ગાણેશદેહકે ।
વર્તતે સર્વદા તસ્માત્તં ભજન્તે તુ યોગિનઃ ॥ ૨૩॥

એવમુક્ત્વા મહાયોગી વિશ્વામિત્રઃ પ્રતાપવાન્ ।
ગાલવં તૂષ્ણીમ્ભાવેનાભજત્તં ગણનાયકમ્ ॥ ૨૪॥

તમુવાચ પુનઃ શિષ્યો ગાલવઃ પ્રણિપત્ય ચ ।
નિન્દયસ્વાત્મનાત્માનં સંશયસ્યાપનુત્તયે ॥ ૨૫॥

ગાલવ ઉવાચ ।
અજ્ઞાનેનાવૃતોઽહં ત્વાં પૃચ્છામિ મુનિસત્તમ ।
શિષ્યં તારય યોગેન યોગયુક્તં તથા કુરુ ॥ ૨૬॥

ગણેશો યોગશાન્તિસ્થો સદા યોગીન્દ્રસત્તમ ।
કથં દેવ ઇતિ ખ્યાતઃ કથિતો વેદવાદિભિઃ ॥ ૨૭॥

દેવાઃ સત્ત્વયુતા નાથ નરા રાજસતાં ગતાઃ ।
તામસા અસુરાઃ પ્રોક્તાસ્ત્રિલોકે વાસકારિણઃ ॥ ૨૮॥

એવં મે સંશયં સ્વામિન્નુદ સર્વજ્ઞ તે નમઃ ।
યેન સંશયહીનોઽહં ભજિષ્યામિ ગજાનનમ્ ॥ ૨૯॥

વિશ્વામિત્ર ઉવાચ ।
દેવાઃ સત્ત્વગુણેનૈવ યુક્તાઃ સ્વર્ગનિવાસિનઃ ।
ઇન્દ્રાદયો ન સન્દેહસ્તેષ્વિન્દ્રઃ પરમા ગતિઃ ॥ ૩૦॥

બ્રહ્મણો દિવસાન્તે તે લયં ગચ્છન્તિ નિત્યદા ।
અન્યે કર્મકરા દેવા ભવન્તિ માનવાઃ પુનઃ ॥ ૩૧॥

કર્મણા લભતે સ્થાનં બ્રહ્મણઃ સૃષ્ટિકારિણઃ ।
કર્મરૂપઃ સ વૈ પ્રોક્તો ન દેવસમતાં વ્રજેત્ ॥ ૩૨॥

પરમેષ્ઠી સમાખ્યાતઃ પરા સેષ્ઠિસ્તદાત્મિકા ।
ઇષ્ટ્યાસ્તસ્માન્ પરં કિઞ્ચિલ્લભ્યતે નૈવ માનવૈઃ ॥ ૩૩॥

શિવો વિષ્ણુસ્તથા ભાનુઃ શક્તિશ્ચત્વાર ઈશ્વરાઃ ।
અભવન્ સત્યસઙ્કલ્પાઃ સગુણા નિર્ગુણા મુદા ॥ ૩૪॥

ગણેશો બ્રહ્મભૂતો વૈ સ્વેચ્છાચારો મહામતે ।
એવં ભેદપ્રકારેણ જ્ઞાતવ્યો નિશ્ચયાર્થિભિઃ ॥ ૩૫॥

દિવુ ક્રીડાત્મકો ધાતુઃ પઠ્યતે મુનિભિર્મુદા ।
સર્વત્ર ક્રીડનાદ્દેવાઃ કથિતાઃ સર્વપૂજિતાઃ ॥ ૩૬॥

સ્વધર્મનિષ્ઠજે સ્વસ્વકર્મણિ ક્રીડને રતાઃ ।
દેવા ઇન્દ્રમુખાસ્તેન કથિતાઃ શાસ્ત્રવાદિભિઃ ॥ ૩૭॥

સૃષ્ટ્વા ચરાચરં સર્વં તત્ર ક્રીડતિ નિત્યદા ।
બ્રહ્મા તેન મુનીન્દ્રૈઃ સ દેવ ઇત્યભિધીયતે ॥ ૩૮॥

અનન્તકોટિબ્રહ્માણ્ડાનિ રચિત્વા સ્વમાયયા ।
શિવાદયશ્ચ ચત્વારસ્તેષુ ક્રીડન્તિ દેવકાઃ ॥ ૩૯॥

સત્યસઙ્કલ્પકત્વાદ્વૈ ઈશ્વરાસ્તે પ્રકીર્તિતાઃ ।
દેવાઃ ક્રીડનભાવાચ્ચ સગુણનિર્ગુણાદિષુ ॥ ૪૦॥

અસત્ સત્ સ મનેતીતિ પરં સૃષ્ટ્વા ચતુર્વિધમ્ ।
વિશ્વં વિશ્વાત્મસંયુક્તં તત્ર ક્રીડતિ વિઘ્નપઃ ॥ ૪૧॥

જગત્સુ બ્રહ્મસુ પ્રાજ્ઞૈઃ ક્રીડનાદ્ગણજાતિષુ ।
દેવો ગણેશ્વરઃ પ્રોક્તઃ પશ્ય વેદેષુ વર્ણિતમ્ ॥ ૪૨॥

(Page ખં. ૮ અ. ૩૨ પાન ૭૩)
અતો દેવસમાનાસ્તે ન ભવન્તિ કદાચન ।
બ્રહ્માદયો મહાભાગા દેવશબ્દપ્રધારકાઃ ॥ ૪૩॥

સૂત ઉવાચ ।
વિશ્વામિત્રવચઃ શ્રુત્વા ગાલવોઽત્યન્તવિસ્મિતઃ ।
જગાદ તં મહાભાગં સંશયેન સમન્વિતઃ ॥ ૪૪॥

ગાલવ ઉવાચ ।
દેવા હવિર્ભુજઃ સર્વે તદ્વદિમે મહામતે ।

હવિર્ભુજો મહેશાદ્યા અભવન્ ભાગમિશ્રિતાઃ ॥ ૪૫॥

દૈત્યાદ્યૈઃ કર્મનાશેન પીડિતા અમરા યદિ ।
તદા શમ્ભ્વાદયસ્તદ્વદુપોષણયુતાઃ કૃતાઃ ॥ ૪૬॥

તેન દેવસમાનાસ્તે દૃશ્યન્તે નાઽત્ર સંશયઃ ।
વદ સંશયનાશાર્થં શિષ્યં યોગીન્દ્રસત્તમ ॥ ૪૭॥

વિશ્વામિત્ર ઉવાચ ।
અજ્ઞાનાસુરભાવાર્થૈર્દેવા બ્રહ્માદયઃ કિલ ।
ઉપોષણયુતાઃ સર્વે કૃતા દૈત્યૈર્ભવન્ત્યતઃ ॥ ૪૮॥

અથાઽન્યચ્છૃણુ તત્ત્વં ત્વં સર્વસંશયનાશનમ્ ।
ખણ્ડૈશ્વર્યયુતા ઇન્દ્રાદયો દેવાઃ પ્રકીર્તિતાઃ ॥ ૪૯॥

મન્વન્તરે ગતે દેવા ઇન્દ્રાદ્યા ભાગવર્જિતાઃ ।
દેહત્યાગં પ્રકુર્વન્તિ તપસા ધ્યાનશાલિના ॥ ૫૦॥

અન્યે દેવા ભવન્તિ સ્માન્યસ્મિન્ મન્વન્તરે મુદા ।
ઇન્દ્રાદ્યાસ્તેન તે પ્રોક્તાઃ ખણ્ડૈશ્વર્યાત્મકા મુને ॥ ૫૧॥

સ્વસ્વમન્વન્તરેષ્વેવ તે ભવન્તિ હવિર્ભુજઃ ।
નષ્ટે મન્વન્તરે દેવા હવિર્ભાગવિવર્જિતાઃ ॥ ૫૨॥

તથા બ્રહ્મા સ્વયં સાક્ષાદ્ધવિર્ભાગધરો ન ચ ।
દ્વિપરાર્ધમયં કાલં ભુનક્તિ સ હવિઃ પ્રભુઃ ॥ ૫૩॥

અત ઐશ્વર્યસંયુક્તઃ કલ્પમાત્રં ન સંશયઃ ।
કથમિન્દ્રાદિકૈરસ્ય સમતા ભવતીત્યહો ॥ ૫૪॥

બુધૈઃ સ પરમેષ્ઠીતિ કથિતશ્ચેષ્ટિભક્ષણામ્ ।
અખણ્ડૈશ્વર્યસંયુક્તેષ્ટિશ્ચ સર્વત્ર સમ્મતા ॥ ૫૫॥

શિવાદયઃ સમાખ્યાતા હવિર્ભુજસ્તતોઽધિકઃ ।
અત ઐશ્વર્યસંયુક્તા અખણ્ડં હિ હવિર્ભુજઃ ॥ ૫૬॥

ગાલવ ઉવાચ ।
હવિર્ભુજઃ સમાખ્યાતા દેવાઃ શાસ્ત્રેષુ માનદ ।
યજ્ઞભાગવિહીનત્વાત્ કથં દેવો ગજાનનઃ ॥ ૫૭॥

વિશ્વામિત્ર ઉવાચ ।

યજ્ઞેષુ વિવિધેષ્વેવ ગણેશ આદિરુચ્યતે ।
પૂજ્યસ્તથા હવિર્ભોક્તા સર્વસિદ્ધિપ્રદાયકઃ ॥ ૫૮॥

એકભાગાશ્રિતા ભાવાદ્ગણેશ ઇતિ કથ્યતે ।
સમૂહાનાં સમાયોગસ્તત્ર કિં સંશયો મુને ॥ ૫૯॥

વેદેષુ ગણરાજસ્ય યજ્ઞો ભિન્નો નિરૂપિતઃ ।
બ્રાહ્મણસ્પત્યસંજ્ઞસ્તુ હવિર્ભુક્ તત્ર વિઘ્નપઃ ॥ ૬૦॥

એકભાગાશ્રિતા દેવા વિષ્ણુશઙ્કરમુખ્યકાઃ ।
અતઃ સ્વસ્વપદેષ્વેવ પૂજનીયાઃ પ્રયત્નતઃ ॥ ૬૧॥

સર્વકર્મસુ વિઘ્નેશ આદિપૂજ્યઃ પ્રકીર્તિતઃ ।
સર્વપૂજ્યો મહાવિઘ્નસમૂહાનાં પ્રપાલનાત્ ॥ ૬૨॥

ગાલવ ઉવાચ ।
પઞ્ચ દેવાઃ સમાનાશ્ચ સગુણા નિર્ગુણા મતાઃ ।
ગણેશઃ સર્વપૂજ્યાદિપૂજ્યઃ કથં બભૂવ હ ॥ ૬૩॥

વિશ્વામિત્ર ઉવાચ ।
સગુણા નિર્ગુણાઃ પ્રોક્તા ઈશ્વરાઃ શમ્ભુમુખ્યકાઃ ।
સત્યસઙ્કલ્પભાવેન યોગરૂપા ન તેઽભવન્ ॥ ૬૪॥

એકગુણાશ્રિતાઃ સર્વે સગુણાઃ પરિકીર્તિતાઃ ।
મહાલયે લયં તે વૈ ગચ્છન્તિ ગુણધારણાત્ ॥ ૬૫॥

સગુણા નાશવન્તસ્તે નિર્ગુણા નાશવર્જિતાઃ ।
યોગરૂપાસ્તયોર્યોગે શિવાદ્યાઃ સમ્મતા બુધૈઃ ॥ ૬૬॥

નરકુઞ્જરયોગત્વાત્ ગણેશો યોગવાચકઃ ।
(Page ખં. ૮ અ. ૩૩ પાન ૭૪)
સગુણો નિર્ગુણઃ સોઽપિ તાદૃશસ્તન્મયોઽભવત્ ॥ ૬૭॥

યોગરૂપઃ સદા દેવો સગુણો નિર્ગુણોઽપિ વા ।
સ્વેચ્છયા દ્વિવિધં સૃષ્ટ્વા ખેલતે ભાવવર્જિતઃ ॥ ૬૮॥

સ્વાનન્દનગરે સંસ્થો દેહધારી ગજાનનઃ ।
સ્વાનન્દસ્ય લયો નાસ્તિ વેદાદિષુ વિચારય ॥ ૬૯॥

અતોઽયં નાશહીનોઽપિ દેહભૃચ્છોભતે સ્વયમ્ ।

સગુણે યોગનાથશ્ચાન્તર્ધાય નિર્ગુણે રતઃ ॥ ૭૦॥

અન્તર્ધાય ગણેશાનો નિર્ગુણં યોગશાન્તિદઃ ।
યોગરૂપે રતઃ સદ્યઃ સ્વેચ્છયા નાત્ર સંશયઃ ॥ ૭૧॥

અતોઽયં જ્યેષ્ઠરાજશ્ચ કથિતો વેદવાદિભિઃ ।
જ્યેષ્ઠાનાં જ્યેષ્ઠભાવાદ્વૈ ગતઃ સર્વાદિપૂજ્યતામ્ ॥ ૭૨॥

પઞ્ચચિત્તમયી બુદ્ધિઃ સિદ્ધિર્ભ્રાન્તિપ્રદા મતા ।
તયોઃ સ્વામી ગણેશાનઃ સેવ્યતે મે હૃદિ સ્થિતઃ ॥ ૭૩॥

એવમુક્ત્વા મહાયોગી વિરરામ મહામુને ।
ગાલવઃ સંશયં ત્યક્ત્વા પ્રણનામ કૃતાઞ્જલિઃ ॥ ૭૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે શ્રાવણમાસમાહાત્મ્યે ગાલવસંશયનાશનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૮.૩૨

## ૮.૩૩ શ્રાવણમાસમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ગણેશપ્રાપ્તિકામાર્થં ગાલવો મુનિસત્તમમ્ ।
પુનઃ પપ્રચ્છ સદ્બુદ્ધિર્વિનયેન દ્વિજોત્તમઃ ॥ ૧॥

ગાલવ ઉવાચ ।
દ્રષ્ટુમિચ્છામિ વિઘ્નેશં તદુપાયં વદ પ્રભો ।
તવાજ્ઞાવશગો ભૂત્વાઽઽચરિષ્યામિ તદેવ ચ ॥ ૨॥

વિશ્વામિત્ર ઉવાચ ।
પ્રાપ્તં શ્રાવણમાસં ત્વં વિદ્ધિ ગાલવ સૌખ્યદમ્ ।
તત્રાનુષ્ઠાનભાવેન ગણેશં પશ્ય સિદ્ધિજ ॥ ૩॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં મુનિઃ ।
તં પ્રણમ્ય મહાવિપ્રં ગાલવસ્તાદૃશે રતઃ ॥ ૪॥

શ્રાવણે ગણપં ધ્યાત્વા પુરશ્ચરણતત્પરઃ ।
જજાપ મન્ત્રરાજં સ વિધિયુક્તં વિધાનવિત્ ॥ ૫॥

પયો ભુક્ત્વા ગણેશાનં તોષયામાસ ગાલવઃ ।

સદા ધ્યાનપરો ભૂત્વા ચિન્તયત્તં મહામતિઃ ॥ ૬॥

અમાયાં ગણરાજસ્તુ યયૌ ભક્તિનિયન્ત્રિતઃ ।
સિદ્ધિબુદ્ધિયુતો વિપ્રં સિંહગઃ સર્વભાવવિત્ ॥ ૭॥

તમાગતં સમાલોક્ય ગાલવઃ પ્રેમસંયુતઃ ।
સમુત્થાય પ્રણમ્યાદૌ પુપૂજ વિઘ્નનાયકમ્ ॥ ૮॥

પુનઃ પ્રણમ્ય સર્વેશં તુષ્ટાવ સ કૃતાઞ્જલિઃ ।
સાશ્રુનેત્રો ગણાધ્યક્ષં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૯॥

ગાલવ ઉવાચ ।
અમેયમાયામયરૂપધારિણે માયાવિહીનાય પરાત્પરાત્મને ।
યોગાય યોગેશ સુયોગદાયિને વિઘ્નેશ્વરાયૈવ નમો નમઃ પ્રિય ॥ ૧૦॥

અચિન્ત્યરૂપધારાય વિઘ્નેશાય નમો નમઃ ।
સિંહગાય ચતુર્બાહુધારકાય સુરૂપિણે ॥ ૧૧॥

સ્વાનન્દનગરસ્થાયિન્ સદા સ્વાનન્દરૂપિણે ।
અનન્તવિભવાયૈવ હેરમ્બાય નમો નમઃ ॥ ૧૨॥

લમ્બોદરાય દેવાય દેવદેવેશરૂપિણે ।
(Page  ખં. ૮ અ. ૩૩ પાન ૭૫)
અસુરાણાં નિહન્ત્રે ચ અસુરાય નમો નમઃ ॥ ૧૩॥

સિદ્ધિબુદ્ધિવિલાસસ્ય કારિણે બ્રહ્મરૂપિણે ।
બ્રહ્માકારશરીરાયૈકદન્તાય નમો નમઃ ॥ ૧૪॥

સગુણાય નમસ્તુભ્યં નિર્ગુણાય ગુણાત્મને ।
સદા શાન્તિપ્રદાત્રે તે ધૂમ્રવર્ણાય તે નમઃ ॥ ૧૫॥

પાશાઙ્કુશધરાયૈકદન્તાભયપ્રધારિણે ।
નાભિશેષાય સર્વાદૌ પૂજ્યાય તે નમો નમઃ ॥ ૧૬॥

કિં સ્તૌમિ ત્વં ગણાધ્યક્ષ યત્ર વેદા વિસિસ્મિરે ।
અતો નમનમાત્રેણ પ્રસન્નો ભવ વિઘ્નપ ॥ ૧૭॥

સૂત ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં નનર્ત પ્રેમવિહ્વલઃ ।
ધન્યોઽહં કૃતકૃત્યોઽહમુચ્ચરંશ્ચ પુનઃ પુનઃ ॥ ૧૮॥

તમુવાચ ગણાધીશો વરાન્ વરય ગાલવ ।
દાસ્યામિ શ્રાવણસ્યૈવ વ્રતેન તુષ્ટિમાગતઃ ॥ ૧૯॥

ત્વયા કૃતમિદં સ્તોત્રં ભવેત્ સર્વાર્થદાયકમ્ ।
પઠતાં શ‍ૃણ્વતાં વિપ્ર મદ્ભક્તિવૃદ્ધિકારકમ્ ॥ ૨૦॥

ધનધાન્યપ્રદં પૂર્ણં ભુક્તિમુક્તિપ્રદાયકમ્ ।
આરોગ્યાદિકરં ચાસ્તુ બ્રહ્મશ્રદ્ધા પ્રવર્ધનમ્ ॥ ૨૧॥

એવમુક્ત્વા ગણેશાનો વિરરામ મહામતે ।
ગાલવસ્તં પ્રણમ્યાદૌ જગાદ કરસમ્પુટઃ ॥ ૨૨॥

ગાલવ ઉવાચ ।
ભક્તિં દેહિ ત્વદીયાં મે ગાણપત્યં કુરુ પ્રભો ।
યોગં શાન્તિપ્રદં પૂર્ણં નાન્યં યાચે ગજાનન ॥ ૨૩॥

તથેતિ તમથોક્ત્વાઽસૌ ગણેશોઽન્તરધીયત ।
ગાલવઃ ખેદસંયુક્તો વિયોગાદ્ગણપસ્ય તુ ॥ ૨૪॥

તતો જગામ વિપ્રેન્દ્રં વિશ્વામિત્રં નનામ સઃ ।
વૃત્તાન્તં કથયામાસ સોઽપિ સંહર્ષિતોઽવદત્ ॥ ૨૫॥

વિશ્વામિત્ર ઉવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ માન્યોઽસિ મે મહામુને ।
સચ્છિષ્યેણ ત્વયા પુત્ર તારિતોઽહં ન સંશયઃ ॥ ૨૬॥

એવં પ્રશંસિતો વિપ્રો વિશ્વામિત્રેણ ગાલવઃ ।
તં પ્રણમ્ય યયૌ સોઽપિ સ્વેચ્છાચારી યથા તથા ॥ ૨૭॥

સદા ગણપતિં ભક્ત્યાઽભજદનન્યચેતસા ।
ગાલવો યોગિવન્દ્યશ્ચ બભૂવ પરમાર્થવિત્ ॥ ૨૮॥

ગાણેશાનિ જગામાસૌ ક્ષેત્રાણિ ગણપે રતઃ ।
અન્તે મયૂરક્ષેત્રે તુ વાસં ચકાર હર્ષિતઃ ॥ ૨૯॥

તત્રૈવ ગણનાથં સોઽભજદ્ભાવસમન્વિતઃ ।
ક્ષેત્રસંન્યાસવિપ્રૈશ્ચ પૂજિતોઽકથયત્ કથાઃ ॥ ૩૦॥

ઇદં ગાલવમાહાત્મ્યં કથિતં પાપનાશનમ્ ।
પઠનાચ્છ્રવણાત્ સર્વસિદ્ધિદં જન્તવે ભવેત્ ॥ ૩૧॥

અન્યચ્છૃણુ ચરિત્રં યત્ સર્વસૌખ્યકરં મુને ।
મહારાષ્ટ્રેંऽન્ત્યજઃ કશ્ચિચ્છુશ્રાવ શ્રાવણસ્ય ચ ॥ ૩૨॥

માહાત્મ્યં ગણનાથસ્ય ભક્ત્યાશ્રિતં દ્વિજાત્ પુરા ।
તત્ર ચિત્તં સમાનીય ગણરાજપરોऽભવત્ ॥ ૩૩॥

આગતે શ્રાવણે માસે સ્નાત્વા દેવાલયે સ્થિતમ્ ।
નનામ નિયમેનૈવ નિત્યં ભક્તિસમન્વિતઃ ॥ ૩૪॥

તતઃ સ્વવ્યવાસાયેષુ કુટુમ્બપોષણે રતઃ ।
ચકાર વિવિધાન્ કામાંલ્લોકાનાં દ્રવ્યકારણાત્ ॥ ૩૫॥

સમાપ્તે શ્રાવણે માસે મૃતં તં દૈવયોગતઃ ।
પ્રગૃહ્ય ગાણપા જગ્મુઃ સ્વાલયં હર્ષસંયુતાઃ ॥ ૩૬॥

માર્ગે સઙ્ગચ્છતસ્તસ્યાઙ્ગાદ્વાયુઃ સહસાऽऽયયૌ ।
પઞ્ચચૌરશરીરાઙ્ગે પસ્પર્શ દૈવયોગતઃ ॥ ૩૭॥

ચૌરાણાં બુદ્ધિભેદોऽથ બભૂવે તેન તે પુનઃ ।
ઊચુઃ પરસ્પરં ચૌરાઃ પાપકર્મપરાયણાઃ ॥ ૩૮॥

(Page ખં. ૮ અ. ૨૨ પાન ૭૬)
ચૌરા ઊચુઃ ।
નિત્યં પાપસમાચારા વયં ચૌર્યપરાયણાઃ ।
લોકેભ્યો દુઃખદાઃ પૂર્ણા કા ગતિર્વો ભવિષ્યતિ ॥ ૩૯॥

પાપિનાં નરકેષ્વેવ ગતિર્દુઃખતરા ભવેત્ ।
યમસ્ય યાતના તત્ર દુઃસહા નાત્ર સંશયઃ ॥ ૪૦॥

નરકે વાસિનો નિત્યં ભવિષ્યામો વયં યતઃ ।
અતઃ પરં ન કર્તવ્યં ચૌર્યં ચૌરાઃ કદાચન ॥ ૪૧॥

એવં નિશ્ચત્ય માર્ગે તે વનસ્થે સંસ્થિતા મુધા ।
તત્રાऽકસ્માત્ સમાયાતા બ્રાહ્મણા દશ તાપસાઃ ॥ ૪૨॥

તાન્ દૃષ્ટ્વા ગોભિરાનન્દસંયુક્તાન્ પાપનિશ્ચયાઃ ।
ચૌરાઃ ખડ્ગધરા યાતા હન્તું તાંસ્તે દ્વિજા જગુઃ ॥ ૪૩॥

દ્વિજા ઊચુઃ ।
કિમર્થં શસ્ત્રસંયુક્તાશ્ચૌરા યૂયં સમાગતાઃ ।

ગાવો ગ્રાહ્યાઃ સુખેનૈવ વયં ગચ્છામહે પુનઃ ॥ ૪૪॥

મા હિંસાં કુરુત પ્રાજ્ઞા બ્રાહ્મણવધસંશ્રિતામ્ ।
બ્રહ્મહત્યાભવં પાપં વજ્રલેપસમં ભવેત્ ॥ ૪૫॥

તેષાં તદ્વચનં શ્રુત્વા ચૌરાસ્તાન્ ખડ્ગધારકાઃ ।
ઊચુર્નિયમ્ય સ્વાત્માનં પાપત્રાસભયાતુરાઃ ॥ ૪૬॥

ચૌરા ઊચુઃ ।
બ્રહ્મહત્યાભવં પાપં તત્ કીદૃક્ યાતનાપ્રદમ્ ।
કનોપાયેન પાપાનિ લયં ગચ્છન્તિ ભો દ્વિજાઃ ॥ ૪૭॥

વયં પાપસમાચારા જન્માદારભ્ય નિત્યદા ।
નાનાવિધાનિ પાપાનિ કુર્મહે ચાધુનાવધિમ્ ॥ ૪૮॥

ચરામ કિં વયં ચૌરાસ્તદર્થં પાપનાશકમ્ ।
ઉપાયં તદ્વદધ્વં નો દયયા બ્રાહ્મણોત્તમાઃ ॥ ૪૯॥

ચૌરાણાં વચનં શ્રુત્વા બ્રાહ્મણાસ્તાનથાબ્રુવન્ ।
વિસ્મિતા ભયસંયુક્તા લોકોદ્ધારપરાયણાઃ ॥ ૫૦॥

બ્રાહ્મણા ઊચુઃ ।
અનુતાપેન પાપાનિ નશ્યન્તિ ચૌરનાયકાઃ ।
અતઃ પરં ચ પાપાનિ મા ચરધ્વં તદા કિલ ॥ ૫૧॥

શ્રાવણે ગણનાથં તે સેવધ્વં બ્રહ્મનાયકમ્ ।
તેન પાપવિહીનાશ્ચ ગમિષ્યથ પરાં ગતિમ્ ॥ ૫૨॥

એવમુક્ત્વા મહાભાગાસ્તાનનુજ્ઞાપ્ય તે યયુઃ ।
બ્રાહ્મણાઃ સ્વાશ્રમં ગોભિર્યુક્તા હર્ષસમન્વિતાઃ ॥ ૫૩॥

સમીપે શ્રાવણં માસં સમાગતં વિલોક્ય તે ।
ચૌરાઃ સ્વગૃહમાગત્ય ગણેશમભજન્ પરમ્ ॥ ૫૪॥

સ્નાત્વા પ્રાતર્ગણેશાનં પ્રણમ્ય ભાવસંયુતાઃ ।
પ્રદક્ષિણપરાઃ સર્વે પ્રહરં હ્યભવન્ મુને ॥ ૫૫॥

તે ચ એકભુજઃ સર્વે બ્રહ્મચર્યપરાયણાઃ ।
માસમાત્રં વ્રતં ચક્રુઃ સાધવસ્તે બભૂવિરે ॥ ૫૬॥

ઇહ ભુક્ત્વાઽખિલાન્ ભાગાનન્તે સ્વાનન્દમાયયુઃ ।

એવં નાના જના વિપ્ર શ્રાવણે લેભિરે ગતિમ્ ॥ ૫૭॥

તેષાં ચરિત્રકં પૂર્ણં કથને નૈવ શક્યતે ।
કિઞ્ચિન્નિયમયુક્તાનાં કા કથા વ્રતકારિણામ્ ॥ ૫૮॥

એવં શ્રાવણમાહાત્યં ગાણપત્યપદપ્રદમ્ ।
કથિતં મુનિશાર્દૂલ સમાસેન સુખપ્રદમ્ ॥ ૫૯॥

શ‍ૃણુયાચ્છ્રાવયેદ્વાઽપિ પઠેદ્યો સ લભેત્ પદમ્ ।
ગાણેશં વિવિધાન્ ભોગાન્ ભુક્ત્વાંઽતે મુનિસત્તમ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે શ્રાવણમાસમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૮.૩૩
(Page  ખં. ૮ અ. ૩૪ પાન ૭૭)

## ૮.૩૪ મલમાસમાહાત્મ્યે દધીચિધૌમ્યસંવાદો નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
મલમાસભવં ચિત્રં ચરિત્રં કથયામ્યહમ્ ।
સઙ્ક્ષેપેણ મુનિશ્રેષ્ઠ શ‍ૃણુ સર્વાર્થદાયકમ્ ॥ ૧॥

કલિકલ્મષરૂપેણ મલેન પીડિતાઃ સુરાઃ ।
શરણં કેશવસ્યૈવ યયુર્વિપ્રેન્દ્રમુખ્યકૈઃ ॥ ૨॥

સ્તુત્વા નાનાવિધૈસ્તોત્રૈર્વિષ્ણું ધર્મપ્રપાલકમ્ ।
ઘોરં કલિભવં પાપં તદર્થમબ્રુવન્ વચઃ ॥ ૩॥

દેવર્ષય ઊચુઃ ।
લેશમાત્રેણ ધર્મસ્તુ સંસ્થિતોઽધર્મસંહતઃ ।
તેનોપોષણસંયુક્તાન્ રક્ષસ્વ શરણાર્થિનઃ ॥ ૪॥

કલિના પાપરૂપેણ જનાર્દન જિતા વયમ્ ।
પૃથિવીં ત્વમપિ ત્યક્ત્વા કિં સ્થિતોઽસિ મહાપ્રભો ॥ ૫॥

તેષાં તદ્વચનં શ્રુત્વા તાનુવાચ સ્વયં હરિઃ ।
મેઘગમ્ભીરયા વાચા સર્વેષાં પાલકઃ પ્રભુઃ ॥ ૬॥

હરિરુવાચ ।

મા ભયં દેવવિપ્રાદ્યાઃ કુરુતાહં ન સંશયઃ ।
કરિષ્યામિ ભવત્ કાર્યં કલિં જિત્વા સુદુર્જયમ્ ॥ ૭॥

એવમુક્ત્વા મહાવિષ્ણુર્દેવર્ષીન્ વિસસર્જ હ ।
વિચારમકરોચ્ચિત્તે દૃષ્ટ્વા ઘોરં કલેર્બલમ્ ॥ ૮॥

કલિમલપ્રણાશાર્થં સમર્થં ચિન્ત્ય માધવઃ ।
આયયૌ મયૂરક્ષેત્રે તપોર્થં ગણપે રતઃ ॥ ૯॥

મલમાસં સમાસાદ્ય નાનામલનિકૃન્તનમ્ ।
ગાણેશપઞ્ચકં પૂજ્યં વ્રતં ચકાર માસજમ્ ॥ ૧૦॥

ઘૃતભુક્ ગણનાથં સોઽસેવયદ્યત્નસંયુતઃ ।
ઉષઃસ્નાત્વા યથાન્યાયં ચકાર ઢુણ્ઢિચિન્તનમ્ ॥ ૧૧॥

ઢૌણ્ઢં માસવ્રતં કૃત્વા પરિપૂર્ણં જનાર્દનઃ ।
પારણં બ્રાહ્મણૈઃ સાર્ધં નિશિ નિદ્રાયુતોઽભવત્ ॥ ૧૨॥

સ્વપ્ને દદર્શ વિઘ્નેશં ધૂમ્રવર્ણં ગજાનનમ્ ।
અશ્વવાહં દ્વિહસ્તાભ્યાં ખડ્ગચર્મધરં હરિઃ ॥ ૧૩॥

સ ઉવાચ મહાવિષ્ણું સ્વભક્તં ભક્તપાલકઃ ।
મેઘગમ્ભીરનાદેન હર્ષયન્ હર્ષવર્ધનઃ ॥ ૧૪॥

શ્રીગણેશ ઉવાચ ।
નાનામલપ્રણાશાર્થં મલમાસવ્રતં ચરેત્ ।
તદેવ સુકૃતં વિષ્ણો ત્વયા મદ્ભક્તિકારિણા ॥ ૧૫॥

મલમાસસ્ય દેવોઽહં ઢુણ્ઢયિત્વા વિશેષતઃ ।
હરામિ મલસમ્ભૂતં દુઃખં પાપમયં પરમ્ ॥ ૧૬॥

અતસ્ત્વમીદૃશો ભૂત્વા માં સ્મૃત્વા હૃદિ ભક્તિતઃ ।
કલિં જેષ્યસિ દેવેશ ધર્મં સંસ્થાપયિષ્યસિ ॥ ૧૭॥

એવમુક્ત્વા ગણેશાનસ્તતોઽર્ધાનમાકરોત્ ।
પ્રબુદ્ધઃ કેશવોઽત્યન્તં સ્મૃત્વા હર્ષયુતોઽભવત્ ॥ ૧૮॥

પ્રણમ્ય સ મયૂરેશં ધૃત્વા વેષં નરાધિકમ્ ।
અશ્વગઃ શ્યામવર્ણસ્થો બભૂવ ખડ્ગધારકઃ ॥ ૧૯॥

કલ્કિર્નામ્ના મહાબાહુઃ સ્મૃત્વા વિઘ્નેશ્વરં હૃદિ ।

સ્વાઙ્ગાન્નાનાવિધાં સેના કલ્પ્ય દુષ્ટવધે રતઃ ॥ ૨૦॥

નાના જનહૃદિસ્થઃ સ કલિઃ પ્રયત્નસંયુતઃ ।
તં જેતું યયતે સ્માઽપિ હીનવીર્યો બભૂવ હ ॥ ૨૧॥

તતો ધર્મયુતાંલ્લોકાંશ્ચકાર સ જનાર્દનઃ ।
હત્વા દુષ્ટાન્ મહાઘોરાનાનાય્ય બ્રાહ્મણોત્તમાન્ ॥ ૨૨॥

એવં કૃત્વાંઽતર્દધેઽસૌ સ્તુતો દેવર્ષિભિર્હરિઃ ।
વિકુણ્ઠમગમત્ સદ્યો હર્ષનિર્ભરમાનસઃ ॥ ૨૩॥

શૌનક ઉવાચ ।
ધૂમ્રવર્ણાવતારાખ્યો ગણેશઃ કલિના પુરા ।
યુયુધે તં વિજિત્વા સ કલિં કૃતમધારયત્ ॥ ૨૪॥

કલ્કિર્વિષ્ણુસ્તથા દુષ્ટં કલિં જિગ્યે તથાઽધુના ।
વર્ણિતં તત્ર કિં મુખ્યં દ્વિવિધં સંશયપ્રદમ્ ॥ ૨૫॥

સૂત ઉવાચ ।
મહાઘોરસ્વરૂપોઽયં કલિઃ સૃષ્ટઃ સ્વયમ્ભુવા ।
પાપસેનાસમાયુક્તો જિગ્યે ધર્મં ક્ષણે ક્ષણે ॥ ૨૬॥

તન્નાશાર્થં વિશેષેણ દેવા મુનિગણાસ્તસ્થા ।
નાનાવતારરૂપૈસ્તં જયન્તિ સ્મ પ્રયત્નતઃ ॥ ૨૭॥

ગણરાજસ્ય તદપિ વરેણ મૂલવર્જિતઃ ।
કલિર્ન જાયતે વિપ્ર પુનર્વૃદ્ધિં પ્રયાતિ સઃ ॥ ૨૮॥

દશવર્ષવયોયુક્તા નારી ગર્ભવતી ભવેત્ ।
ગૃહે ગૃહે તથા ત્રિંશત્ પરમાયુર્ભવેન્નૃણામ્ ॥ ૨૯॥

વર્ણસઙ્કરરૂપાશ્ચ જનાઃ સર્વે ધરાતલે ।
સાર્ધૈકભાગો વિશ્વસ્થો ભવેદ્ધર્મો મહામુને ॥ ૩૦॥

તદા વિષ્ણુઃ સુરાદ્યૈઃ સમ્પ્રાર્થિતઃ કલ્કિરૂપધૃક્ ।
જિત્વા કલિં પુનઃ સોઽપિ ધર્મં સંસ્થાપયેત્ પરમ્ ॥ ૩૧॥

યદા પઞ્ચ વયો વર્ષા નારી ગર્ભવતી ભવેત્ ।
ષોડશાબ્દપરં ચાયુર્માનવાનાં ગૃહે ગૃહે ॥ ૩૨॥

મહાઘોરં કલિં વીક્ષ્ય કસ્મિન્ કલ્પે શિવાદયઃ ।

તં જેતું ન સમર્થાશ્ચ બભૂવુર્વિષ્ણુમુખ્યકાઃ ॥ ૩૩॥

વિશ્વાધર્માત્ર રૂપેણ ધર્મસ્તિષ્ઠેદ્ધરાતલે ।
હાહાકારરવૈર્યુક્તા જનાસ્તત્ર સુદુઃખિનઃ ॥ ૩૪॥

તદા વિઘ્નેશ્વરં સર્વે ગચ્છન્તિ સ્મ શરણ્યકમ્ ।
ધૂમ્રવર્ણો ગણાધ્યક્ષો કલિં જિગ્યે સુદુર્જયમ્ ॥ ૩૫॥

પુનર્ધર્મં સમાસ્થાપ્ય કૃતં તથા મહામુને ।
એવં કલિબલં દૃષ્ટ્વાઽવતારં કુરુતે સ્મ ચ ॥ ૩૬॥

એવં મલભવે માસે વ્રતં કૃત્વા જનાર્દનઃ ।
જિગ્યે કલિમલં પૂર્ણં મહાપાપૌઘરૂપિણમ્ ॥ ૩૭॥

અન્યચ્છૃણુ મહાવિપ્ર માહાત્મ્યં મલસમ્ભવમ્ ।
ધૌમ્યઃ સૌમ્યતપોયુક્તો બભૂવ પરમદ્યુતિઃ ॥ ૩૮॥

સ યયૌ યોગપ્રાપ્ત્યર્થં દધીચિં યોગપારગમ્ ।
તં પ્રણમ્ય વિનીતાત્મા સંસ્થિતસ્તેન પૂજિતઃ ॥ ૩૯॥

ઉવાચ તં મહાભાગં દધીચિં મુનિવન્દિતમ્ ।
કૃતાઞ્જલિર્નતો ભૂત્વા ધૌમ્યશ્ચ તપતાં વરમ્ ॥ ૪૦॥

ધૌમ્ય ઉવાચ ।
તપસા સ્વર્ગભોગશ્ચ લભ્યતે સર્વજન્તુભિઃ ।
બ્રહ્મભૂયપ્રદં વિપ્ર તપો નૈવ પ્રકીર્તિતમ્ ॥ ૪૧॥

અતો માં શાધિ તં યોગિન્ યોગં શાન્તિપદપ્રદમ્ ।
સંસાધ્ય કૃતકૃત્યોઽહં ભવિષ્યામિ વિશેષતઃ ॥ ૪૨॥

બ્રહ્મણિ તન્મયા વિપ્ર કથ્યન્તે બ્રાહ્મણા બુધૈઃ ।
અતો માં બ્રાહ્મણં પૂર્ણં કુરુષ્વ કૃપયા વિભો ॥ ૪૩॥

ધૌમ્યસ્ય વચનં શ્રુત્વા હર્ષયુક્તો મહામુને ।
દધીચિસ્તં મહાભાગં જગાદ હર્ષસંયુતઃ ॥ ૪૪॥

દધીચિરુવાચ ।
બ્રહ્મ નાના વિધં પ્રોક્તં વેદાદિષુ વિશેષતઃ ।
ગાણેશં તેષુ મુખ્યં ચ બ્રહ્મણાં બ્રહ્મદાયકમ્ ॥ ૪૫॥

અહં પુરા તપોનિષ્ઠઃ ક્ષુપં રાજશિરોમણિમ્ ।

સ્પર્ધયિત્વા મહાભાગાઽભવં શૈવો નિરન્તરમ્ ॥ ૪૬॥

ક્ષુપાર્થમાગતં વિષ્ણું જિત્વા યોગપરાયણઃ ।
બ્રહ્મણિ સહજે વિપ્ર સંસ્થિતોઽહં સુસૌખ્યદે ॥ ૪૭॥

તત્ર સ્વાધીનભાવં ચ દૃષ્ટ્વા શ્રાન્તોઽભવં પુરા ।
સ્વાધીનત્વં પરાધીનત્વં બ્રહ્મણિ ન દૃશ્યતે ॥ ૪૮॥

તતોઽહં શાન્તિપ્રાપ્ત્યર્થં શઙ્કરં ચાગમં પ્રભુમ્ ।
તં પ્રણમ્ય મહાદેવમસ્તવં વિવિધૈઃ સ્તવૈઃ ॥ ૪૯॥

તતો મામબ્રવીચ્છમ્ભુઃ સ્મયમાન ઇદં વચઃ ।
કિમર્થમાગતો વિપ્ર દધીચે વદ સામ્પ્રતમ્ ॥ ૫૦॥

શિવસ્ય વચનં શ્રુત્વા હર્ષયુક્તો મહાદરાત્ ।
પુનઃ પ્રણમ્ય વિશ્વેશં કૃતાઞ્જલિપુટોઽવદમ્ ॥ ૫૧॥

(Page ખં. ૮ અ. ૩૪ પાન ૭૯)
દધીચિરુવાચ ।
નમસ્તે શઙ્કરાયૈવ શિવાય સુખવાદિને ।
બ્રહ્મણે સહજાયૈવ નેતિરૂપપ્રધારિણે ॥ ૫૨॥

સ્વામિન્નવ્યક્તગોઽહં તુ બ્રહ્મપ્રાપ્ત્યર્થમાદરાત્ ।
ઘોરં સહજજં તત્ર ભાવં દૃષ્ટ્વાઽતિવિસ્મિતઃ ॥ ૫૩॥

સ્વાધીનત્વં કથં તત્ર સહજે બ્રહ્મણિ પ્રભો ।
સ્વાધીનાન્ન પરં બ્રહ્મ લભ્યતે યોગસેવયા ॥ ૫૪॥

સ્વાધીનત્વં પરાધીનત્વં બ્રહ્મણિ ન દૃશ્યતે ।
કથં સ્વાધીનજં મોહં દધતે સહજાત્મકમ્ ॥ ૫૫॥

અહં શૈવઃ સદા નાથં ત્વાં જાનામિ પરાત્પરમ્ ।
અતસ્ત્વાં શરણં યાતઃ શાન્તિયોગં વદસ્વ મામ્ ॥ ૫૬॥

શ્રીશિવ ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વિપ્ર સર્વેભ્યઃ સુખદાયકમ્ ।
કથયામિ મહાયોગં બ્રહ્મ તન્મયતાકરમ્ ॥ ૫૭॥

સ્વાધીનં ત્રિવિધં તાત વર્તતે ન કદાચન ।
તુરીયં સહજં બ્રહ્મ સ્વાધીનં નાત્ર સંશયઃ ॥ ૫૮॥

ચતુર્ણામત્ર સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
સ્વસંવેદ્યેન યોગેન લભ્યતે યોગિભિઃ પરઃ ॥ ૫૯॥

પઞ્ચભિર્વર્જિતો યોગો હ્યયોગ ઇતિ કથ્યતે ।
ન તત્ર બ્રહ્મણાં યોગો જગતાં જાયતે કદા ॥ ૬૦॥

તયોર્યોગે મહાયોગિન્ શાન્તિયોગઃ પ્રકીર્તિતઃ ।
પઞ્ચચિત્તભવં ભાવં ત્યક્ત્વા શાન્તિમવાપ્સ્યસિ ॥ ૬૧॥

અહં ગણેશરૂપશ્ચ ભિન્નત્વં મે ન વર્તતે ।
સદા સંયોગતા કુત્રાઽયોગતા ભ્રાન્તિદા ભવેત્ ॥ ૬૨॥

પઞ્ચચિત્તમયી બુદ્ધિઃ સિદ્ધિર્ભ્રાન્તિકરી મતા ।
માયે ત્યક્ત્વા સ્વયં ચિન્તામણિઃ સાક્ષાદ્ભવિષ્યસિ ॥ ૬૩॥

એવમુક્ત્વા સ્વયં મહ્યં દદૌ શમ્ભુર્મહામનુમ્ ।
એકાક્ષરં ગણેશસ્ય તેનાહં ભ્રામિતોઽવદમ્ ॥ ૬૪॥

શૈવોઽહં સતતં નાથ કિં માં વદસિ માનદ ।
ગણેશોપાસનં કેન માર્ગેણ તં ભજામ્યહમ્ ॥ ૬૫॥

શિવ ઉવાચ ।
ગણાઃ સમૂહરૂપાસ્તાંસ્તદ્રૂપાન્ ભાવયાધુના ।
સહજાનાં સમાયોગે ગણોઽહં ગણપસ્ય વૈ ॥ ૬૬॥

ગણેશાકારભાવેન ગણાઃ સર્વે વિચારય ।
તત્ર કિં વ્યભિચારસ્તે ભવતે વદ સામ્પ્રતમ્ ॥ ૬૭॥

એવમુક્ત્વા સ્વયં શમ્ભુર્વિરરામ મહામતે ।
અહં સંશયહીનસ્ત્વં પ્રણમ્ય વનગોઽભવમ્ ॥ ૬૮॥

શમ્ભુના કથિતં યોગં સાધયિત્વા પરાત્ પરમ્ ।
યોગશાન્તિયુતોઽહં તુ જાતઃ શમ્ભુપ્રસાદતઃ ॥ ૬૯॥

સદા શાન્તિસમાયુક્તો ભજામિ દ્વિરદાનનમ્ ।
ગુરુરૂપધરં શમ્ભું ગાણપત્યોઽહમાદરાત્ ॥ ૭૦॥

એતત્તે કથિતં સર્વં બ્રહ્મભૂયકરં પરમ્ ।
ત્વમપિ ગણરાજં તં ભજસ્વ ભાવસંયુતઃ ॥ ૭૧॥

એવમુક્ત્વા દદૌ તસ્મૈ ગાણેશં ષોડશાક્ષરમ્ ।

મન્ત્રં દધીચિઃ પ્રેમ્ણા સંયુતઃ સકલસિદ્ધિદમ્ ॥ ૭૨॥

પુનશ્ચોવાચ યોગજ્ઞો દધીચિસ્તં વિશેષવિત્ ।
દધીચિર્ગણનાથં તમભજદ્ભાવસંયુતઃ ॥ ૭૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે મલમાસમાહાત્મ્યે દધીચિધૌમ્યસંવાદો નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૮.૩૪
(Page ખં. ૮ અ. ૩૫ પાન ૮૦)

## ૮.૩૫ મલમાસમાહાત્મ્યવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ધૌમ્યો જજાપ મન્ત્રં તં ધ્યાત્વા હૃદિ ગજાનનમ્ ।
ક્રમેણ યોગભૂમિસ્થઃ શમદમપરોઽભવત્ ॥ ૧॥

તતઃ સમાગતં વીક્ષ્ય મલમાસં વિશેષતઃ ।
અજ્ઞાનમલનાશાર્થં ચકાર તદ્ભવં વ્રતમ્ ॥ ૨॥

ઉષઃ સ્નાત્વા વિધાનેન ગાણેશે પઞ્ચકે રતઃ ।
સદા ગણપતિં ધૌમ્યઃ સસ્માર શુદ્ધચેતસા ॥ ૩॥

આગતં ગણરાજં તં તતો ભક્તો મુનીશ્વર ।
અમાયાં સ સમાલોક્ય હર્ષિતોઽભૂન્ મહામુનિઃ ॥ ૪॥

ઉત્થાય તં પ્રણમ્યાઽઽદૌ પુપૂજ ભક્તિસંયુતઃ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટાવ કૃતસમ્પુટઃ ॥ ૫॥

ધૌમ્ય ઉવાચ ।
નમામ્યહં ગણેશાનં સર્વસિદ્ધિપ્રદાયિનમ્ ।
ભક્તાનાં ભવયુક્તાનામન્યેષાં વિપરીતગમ્ ॥ ૬॥

ધન્યોઽહં સર્વભાવેષ્વધુના દૃષ્ટ્વા ગજાનનમ્ ।
કિં સ્તૌમિ ત્વાં મહાભાગ યોગેશં યોગરૂપિણમ્ ॥ ૭॥

તવ દર્શનમાત્રેણ જ્ઞાનયુક્તો વદામ્યહમ્ ।
સ્તોત્રં તે પ્રીતિદં પૂર્ણં શ‍ૃણુ સર્વજ્ઞસત્તમ ॥ ૮॥

ગણેશાય નમસ્તુભ્યં યોગશાન્તિપ્રદાયિને ।

શાન્તીનાં શાન્તિરૂપાય હેરમ્બાય નમો નમઃ ॥ ૯॥

અનામયાય જ્યેષ્ઠાય જ્યેષ્ઠપદપ્રદાયિને ।
જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપાય વિઘ્નેશાય નમો નમઃ ॥ ૧૦॥

નામરૂપાત્મકેષ્વેવ શક્તિરૂપાય તે નમઃ ।
આત્મસુ રવયે તુભ્યં સમેષુ વિષ્ણવે નમઃ ॥ ૧૧॥

અવ્યક્તેષુ મહેશાય સંયોગેષુ નિજાત્મને ।
નિવૃત્તિષુ હ્યયોગાય કલાંશેન નમો નમઃ ॥ ૧૨॥

યોગેષુ શાન્તિરૂપાય બ્રહ્મણસ્પતયે નમઃ ।
આદિમધ્યાન્તભેદૈસ્તુ ખેલકાય નમો નમઃ ॥ ૧૩॥

નાનામાયાપ્રચાલાય સિદ્ધિબુદ્ધિપતે નમઃ ।
સ્વાનન્દવાસિને તુભ્યં ભક્તરક્ષણતત્પર ॥ ૧૪॥

કિં સ્તૌમિ ત્વાં ગણાધીશ વેદા યોગિન એવ ચ ।
ન સમર્થા અતો નાથ પ્રણમામિ ગજાનનમ્ ॥ ૧૫॥

એવમુક્ત્વા ગણાધીશં પપાતાઽસૌ ધરાતલે ।
દણ્ડવદ્ગણનાથસ્ય પાદૌ ગૃહ્ય મહામુનિઃ ॥ ૧૬॥

તમુત્થાપ્ય સ્વયં પ્રાહ ગણેશો બ્રહ્મણાં પતિઃ ।
વરાન્ વરય ધૌમ્ય ત્વં દાસ્યામિ સ્તોત્રતોષિતઃ ॥ ૧૭॥

સ્તોત્રં ત્વયા કૃતં મે યત્ પઠતે શૃણ્વતે સદા ।
સર્વસિદ્ધિપ્રદં ચાસ્તુ નાનાભાવાર્થદાયકમ્ ॥ ૧૮॥

યોગશાન્તિપ્રદં પૂર્ણં મયિ ભક્તિવિવર્ધનમ્ ।
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રતોષિતઃ ॥ ૧૯॥

સૂત ઉવાચ ।
ગણેશવચનં શ્રુત્વા ધૌમ્યો હર્ષસમાયુતઃ ।
તં જગાદ ગણાધીશં ભક્તેશં ભક્તવત્સલમ્ ॥ ૨૦॥

ધૌમ્ય ઉવાચ ।
પ્રસન્નોઽસિ યદા નાથ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ મે યોગશાન્તિં તુ યત્ર ત્વં મોદસે સદા ॥ ૨૧॥

તથેતિ ગણનાથસ્તમુક્ત્વા ચાન્તર્હિતોઽભવત્ ।

ધૌમ્યઃ ખિન્ન ઇવાત્યન્તં તત્રૈવ સંસ્થિતોઽભવત્ ॥ ૨૨॥

તત્ર સંસ્થાપયામાસ બ્રાહ્મણૈર્મન્ત્રકોવિદૈઃ ।
ગણેશં તં સદા ધ્યાત્વા પૂજ્ય ભક્તિં ચકાર હ ॥ ૨૩॥

શૌનક ઉવાચ ।
અકર્મકારિણઃ પ્રોક્તા સાત્ત્વિકાઃ શાસ્ત્રસમ્મતમ્ ।
કર્મકર્તાર એવં તુ રાજસાઃ પરિકીર્તિતાઃ ॥ ૨૪॥

વિકર્મકારિણઃ સર્વે તામસાઃ સૂત નિશ્ચિતમ્ ।
ત્રિધા ભેદયુતાઃ સર્વે ભવન્તિ ભુવિ માનવાઃ ॥ ૨૫॥

(Page ખં. ૮ અ. ૩૫ પાન ૮૧)
બ્રહ્માર્પણતયા મુક્તિં ગચ્છન્તિ દ્વિજ સાત્ત્વિકાઃ ।
સકામાદ્રાજસા જન્મમૃત્યુયુક્તા ભ્રમન્તિ તે ॥ ૨૬॥

તામસા નરકેષ્વેવ શિશ્નોદરપરાઃ કિલ ।
ગચ્છન્તિ ત્રિગુણે ભાવે સંસ્થા જનાસ્ત્રિધા ગતિમ્ ॥ ૨૭॥

તત્ર તામસભાવાખ્યઃ શઙ્કરઃ પરિકીર્તિતઃ ।
તં ભજન્તિ મહાભાગાશ્ચતુર્વર્ગફલાર્થિનઃ ॥ ૨૮॥

તામસસ્ય તુ યે ભક્તા નારકાઃ સમ્મતાઃ પુરા ।
શિવભક્તાઃ કથં સર્વે ભવન્તિ બ્રહ્મભૂતકાઃ ॥ ૨૯॥

સૂત ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વિપ્ર સર્વેષામુપકારકમ્ ।
કથયામિ યથા વ્યાસાચ્છ્રુતં સર્વજ્ઞસત્તમાત્ ॥ ૩૦॥

તમ અજ્ઞાનરૂપં યત્ સૌષુપ્તં શાસ્ત્રસમ્મતમ્ ।
અજ્ઞાનાત્ દ્વિવિધં સર્વં સમુત્પન્નં વિચારય ॥ ૩૧॥

સાત્ત્વિકમાન્તરં સ્વાપ્નં જાગૃદ્બાહ્યં તુ રાજસમ્ ।
તયોર્મૂલસ્વરૂપત્વાત્તામસઃ શઙ્કરઃ સ્મૃતઃ ॥ ૩૨॥

તત્રાધિકારકં વક્ષ્યે ત્રિગુણરૂપધારિણામ્ ।
ક્ષણે ક્ષણે રજઃ સંસ્થા હ્યવસ્થા વિવિધાત્મિકાઃ ॥ ૩૩॥

સૃજતિ સાત્ત્વિકસ્તદ્વદવસ્થાઃ પાલકો મતઃ ।
તામસસ્તાઃ સમાહૃત્ય લીનાઃ કરોતિ સર્વદા ॥ ૩૪॥

અતઃ સર્વમિદં વિપ્ર ત્રિભિર્વ્યાપ્તં સમન્તતઃ ।
ગર્ભાધાનાદિપ્રારભ્ય મરણાન્તં સુશોભતે ॥ ૩૫॥

કર્માકર્મવિકર્માણિ ત્રિગુણૈઃ સંયુતાનિ ચ ।
કર્મયોગસ્ય વિપ્રેશ ગુણા ઇમે પ્રકીર્તિતાઃ ॥ ૩૬॥

ન તત્ર શમ્ભુમુખ્યાસ્તે સુરા ગ્રાહ્યા બુધૈઃ કદા ।
અતઃ શઙ્કરભક્તાશ્ચ લભન્તે સર્વમઞ્જસા ॥ ૩૭॥

અધુના શ◌ૃણુ માહાત્મ્યં મલમાસભવં પરમ્ ।
વૈશ્યઃ કશ્ચિચ્છમો નામ બભૂવે માલવે મુને ॥ ૩૮॥

સ શ્રુત્વા મલમાસસ્ય માહાત્મ્યં મલનાશનમ્ ।
ગણેશભક્તિસંયુક્તશ્ચકાર વ્રતમુત્તમમ્ ॥ ૩૯॥

મલમાસં સમાસાદ્ય સ્નાત્વા પ્રાતર્ગણાધિપમ્ ।
સસ્માર સ્મરણેનૈવ તતઃ કાર્યપરોઽભવત્ ॥ ૪૦॥

એકદા માર્ગસંસ્થં ચ વૈશ્યં નિદ્રાયુતં નિશિ ।
તત્ર તં ભક્ષિતું પ્રેતા દશ યાતા મહાબલાઃ ॥ ૪૧॥

તસ્મિન્ કાલે શમો દૈવાદભૂજ્જાગૃન્ મહામુને ।
દદર્શ તાન્ મહાપ્રેતાન્ સસ્માર ગણનાયકમ્ ॥ ૪૨॥

જગાદ સ્વાન્તરે સોઽપિ ગણેશ કરુણાનિધે ।
રક્ષ માં પ્રેતષેભ્યસ્ત્વં ત્વત્પાદે ભક્તિસંયુતમ્ ॥ ૪૩॥

મલમાસસ્ય દેવેશ દિવસાઃ સપ્ત એવ ચ ।
ઉર્વરિતા વ્રતં મેઽત્ર ભગ્નં નોચેદ્ભવિષ્યતિ ॥ ૪૪॥

સમાપ્તે મલમાસે માં મારયસ્વ ગજાનન ।
નાધુના વ્રતસંસ્થં તુ રક્ષ રક્ષ દયાનિધે ॥ ૪૫॥

મલમાસવ્રતે સંસ્થં દૃષ્ટ્વા પ્રેતા ભયાતુરાઃ ।
જાતિસ્મરા બભૂવુસ્તે રુરુદુસ્તં પ્રણમ્ય વૈ ॥ ૪૬॥

તતઃ સ વિસ્મિતો ભૂત્વા તાન્ પપ્રચ્છ મહાબલાન્ ।
કિમર્થં દુઃખસંયુક્તા ભવન્તો માં બ્રુવન્તુ ચ ॥ ૪૭॥

પ્રેતા ઊચુઃ ।
પૂર્વજન્મનિ ભો વૈશ્ય વયં બ્રાહ્મણસમ્ભવાઃ ।

અનાચારરતાઃ સર્વે મૃતા યમગૃહે ગતાઃ ॥ ૪૮॥

તત્ર નાનાવિધાં પૂર્ણાં યાતનાં દુઃખદાં પરામ્ ।
ભુક્ત્વા પ્રેતાઃ કૃતાસ્તેન યમેન સાધુસત્તમ ॥ ૪૯॥

અત્ર શીતોષ્ણકાદ્યેષુ નાના દ્વન્દ્વેષુ સર્વદા ।
પતિતા દુઃખસંયુક્તા ભ્રમામો યત્ર તત્ર હ ॥ ૫૦॥

(Page ખં. ૮ અ. ૩૬ પાન ૮૨)
અધુના દૈવયોગેન ભક્ષિતું ત્વાં સમાગતાઃ ।
ત્વદ્દર્શનજપુણ્યેન જાતિસ્મરા ભવામહે ॥ ૫૧॥

મલમાસવ્રતસ્થસ્ત્વં તારયાસ્માન્ દયાનિધે ।
ગણેશસ્મૃતિસંયુક્તઃ સ્નાનં કરોષિ નિત્યદા ॥ ૫૨॥

એકસ્નાનભવં પુણ્યં દેહિ વૈશ્ય વયં તદા ।
અસ્મભ્યં તેન નિઃપાપા ગમિષ્યામોઽપુનર્ભવમ્ ॥ ૫૩॥

પ્રેતાનાં વચનં શ્રુત્વા હર્ષયુક્તઃ શમોઽબ્રવીત્ ।
પ્રેતાન્ દુઃખયુતાન્ વીક્ષ્ય દયાયુક્તઃ સ્વભાવતઃ ॥ ૫૪॥

શમ ઉવાચ ।
કિં મયા ક્રિયતે પ્રેતા મલમાસભવં વ્રતમ્ ।
સ્નાનમાત્રં કૃતં નિત્યં ગણેશસ્મૃતિસંયુતમ્ ॥ ૫૫॥

ગણેશસ્મરણસ્યૈવ મહિમા કેન ગણ્યતે ।
પુરાણેષુ શ્રુતં તસ્માત્ વચઃ શ‍ૃણુત મે હિતમ્ ॥ ૫૬॥

એકનામસ્મૃતેઃ પુણ્યં દદામિ સ્નાનસમ્ભવમ્ ।
તેન બન્ધનહીનાશ્ચ ભવિષ્યથ ન સંશયઃ ॥ ૫૭॥

એવમુક્ત્વા દદૌ તેભ્ય એકસ્નાનભવં ફલમ્ ।
મલમાસે ગણેશસ્ય સ્મૃતિયુક્તં મહામુને ॥ ૫૮॥

તતસ્તત્ર સમાયાતા ગાણેશા યાનસંયુતાઃ ।
પ્રેતાન્ ગૃહ્ય યયુઃ સર્વે સ્વાનન્દં ગણપે રતાઃ ॥ ૫૯॥

તત્ર લમ્બોદરં દૃષ્ટ્વા બ્રહ્મભૂતા બભૂવિરે ।
પ્રેતાઃ પશ્ય મહાશ્ચર્યં શૌનક મલમાસગમ્ ॥ ૬૦॥

એવં નાના જના વિપ્ર સિદ્ધિં પ્રાપ્તા વિશેષતઃ ।

ઢૌણ્ઢે માસે કતિ બ્રૂયાં સઙ્ખ્યાતું ન ક્ષમો હ્યહમ્ ॥ ૬૧॥

સઙ્ક્ષેપેણ મયા તુભ્યં કથિતં ચરિતં શુભમ્ ।
મલમાસભવં ચિત્રં શ્રવણાત્ સર્વદાયકમ્ ॥ ૬૨॥

યઃ પઠેચ્છ્રાવયેદ્વાઽપિ શ‍ૃણુયાત્ સ લભેત્ પરમ્ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ સ્વજનૈઃ પરિવારિતઃ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે મલમાસમાહાત્મ્યવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૮.૩૫

## ૮.૩૬ સંવત્સરવ્રતમાહાત્મ્યવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
પ્રસઙ્ગાત્ સર્વમાસાનાં કથયામિ ચરિત્રકમ્ ।
ગણેશભક્તિદં ચિત્રં શ‍ૃણુધ્વં મુનયઃ પરમ્ ॥ ૧॥

પ્રાતઃ સ્નાનં વિધાયૈવ ગાણેશે પઞ્ચકે રતઃ ।
નિત્યં દ્વાદશમાસેષુ સ સર્વાર્થમવાપ્નુયાત્ ॥ ૨॥

અસાધ્યં સાધયેન્ મર્ત્યઃ પરં યદ્યપિ દુર્લભમ્ ।
લભેત્ દ્વાદશમાસેષુ ગણેશે પઞ્ચકે રતઃ ॥ ૩॥

અત્ર તે કથયિષ્યામીતિહાસં પૂર્વસમ્ભવમ્ ।
શ્રવણાત્ પઠનાત્ નૃણાં પાવનં સર્વસિદ્ધિદમ્ ॥ ૪॥

નલો નામ મહારાજો નિષધેષુ બભૂવ હ ।
ધર્મશીલો વદાન્યશ્ચ સ્વધર્મનિરતઃ સદા ॥ ૫॥

દમયન્ત્યા યુતઃ સોઽપિ વિચારમકરોત્ હૃદિ ।
ત્રિલોકગમને શક્તો ભવિષ્યામિ કથં નરઃ ॥ ૬॥

નરદેહધરો યસ્તુ સ્વેચ્છાગતિયુતો ભવેત્ ।
(Page ખં. ૮ અ. ૩૬ પાન ૮૩)
તદા તસ્ય યશો ધન્યમિહ સર્વાતિગં ભવેત્ ॥ ૭॥

એવં વિચાર્ય વિપ્રેશં ગૌતમં સ યયૌ નૃપઃ ।
પ્રણમ્ય તં મહાભાગં પપ્રચ્છ સ્વહિતાવહમ્ ॥ ૮॥

નલ ઉવાચ ।
નરદેહધરઃ સ્વામિંસ્ત્રિલોકગઃ કથં ભવેત્ ।
તન્મે કથય તત્ત્વજ્ઞ કરિષ્યામિ યથાતથમ્ ॥ ૯॥

ગૌતમ ઉવાચ ।
શ્રાવણે તુ પ્રતિપદિ શુદ્ધપક્ષં મહાનૃપ ।
પ્રાતઃ સ્નાત્વા સ્વશાખોક્તં કર્મ નિત્યાત્મકં ચરેત્ ॥ ૧૦॥

તતો ગાણેશકં રાજન્ પઞ્ચકં ભક્તિસંયુતઃ ।
નિયમેન સમાપૂજ્ય વ્રતયુક્તો ભવેન્નરઃ ॥ ૧૧॥

આષાઢીં સ સમાસાદ્યામાવાસ્યાં ગણપે રતઃ ।
મણ્ડપે ગણનાથં ચ પૂજયેદ્ધેમનિર્મિતમ્ ॥ ૧૨॥

દ્વાદશ બ્રાહ્મણાંસ્તત્ર વરયેદ્વેદપારગાન્ ।
હોમં કુર્યાત્ દશાંશેન જપસ્યૈતૈર્મહામતે ॥ ૧૩॥

વાયનં બ્રાહ્મણાયૈવ પ્રદદ્યાત્ સ બલિં ચરેત્ ।
તતઃ પૂર્ણાહુતિં કૃત્વા ભોજયેત્તાંસ્તુ પાયસૈઃ ॥ ૧૪॥

પ્રતિપદિ પુનઃ પૂજ્ય ગણેશં સર્વસિદ્ધિદમ્ ।
સુવાસિનીભિઃ સંયુક્તાન્ દ્વિજાન્ સ્ત્રીભિસ્તુ ભોજયેત્ ॥ ૧૫॥

એકવિંશતિસઙ્ખ્યાકાનથવા સઙ્ખ્યયાતિગાન્ ।
દક્ષિણાં વિપુલાં દત્વા તોષયેત્તાન્ વિશેષતઃ ॥ ૧૬॥

યોષિદ્ભ્યઃ કઞ્ચુકાદીંશ્ચ નાનાલઙ્કારકાંસ્તથા ।
પ્રદદ્યાઽઽનમ્ય સ સર્વાન્ ગૃહ્યાશિષં વિસર્જયેત્ ॥ ૧૭॥

સોપસ્કારં ગણાધ્યક્ષં પ્રદદ્યાત્ ગુરવે પરમ્ ।
અન્યેભ્યઃ શક્તિપ્રાયાણ્યાદદ્યાદ્દાનાનિ હર્ષતઃ ॥ ૧૮॥

એવં કુરુ મહીપાલ જ્ઞાનયુક્તો ભવિષ્યસિ ।
ત્રિલોકસ્તથા સર્વં લભસે મનસીપ્સિતમ્ ॥ ૧૯॥

એવમુક્ત્વા મહાયોગી ગૌતમો વિરરામ હ ।
નલસ્તં પ્રણિપત્યૈવ સ્વગૃહં પ્રયયૌ પુરા ॥ ૨૦॥

ચકાર સર્વધર્મજ્ઞો નલો ગણપતૌ રતઃ ।
યથાવિધિ વ્રતં મુખ્યં સંવત્સરપ્રમાણકમ્ ॥ ૨૧॥

તતઃ સ યોગિવન્દ્યશ્ચ બભૂવ જ્ઞાનસંયુતઃ ।
ત્રિલોક્યાં ગમને શક્તો ભૂપાલો નરદેહગઃ ॥ ૨૨॥

એવં નાના જના વિપ્ર વ્રતં સંવત્સરાત્મકમ્ ।
ચક્રુસ્તે યોગિવન્દ્યાશ્ચ બભૂવુર્જ્ઞાનસંયુતાઃ ॥ ૨૩॥

મનેપ્સિતાં પ્રલભ્યૈવ દુર્લભાં સિદ્ધિમુત્તમામ્ ।
અન્તે સ્વાનન્દગાઃ સર્વે બ્રહ્મભૂતા બભૂવિરે ॥ ૨૪॥

તેષાં ચરિત્રકં સર્વં મયા વક્તું ન શક્યતે ।
અનન્તત્વાત્ મહાભાગ સઙ્ક્ષેપેણ નિરૂપિતમ્ ॥ ૨૫॥

ગાણેશપઞ્ચકસ્યૈવ સેવને ન સમર્થકાઃ ।
કિઞ્ચિન્નિયમસંયુક્તા વ્રતં ચક્રુઃ પરે નરાઃ ॥ ૨૬॥

તેઽપિ સિદ્ધિં સમાસાદ્ય મનેપ્સિતાં મુદા યુતાઃ ।
અન્તે ગણપલોકે તુ ગત્વા બ્રહ્મ પ્રલેભિરે ॥ ૨૭॥

શૂદ્રઃ કશ્ચિદ્ બૃહત્કર્મા નામ્ના વન્ધ્યો બભૂવ હ ।
પુત્રાર્થં પ્રયતો ભૂત્વા નાનાકર્મપરોઽભવત્ ॥ ૨૮॥

ન લેભે સન્તતિં સોઽપિ તતોઽતિદુઃખસંયુતઃ ।
પ્રજગામ વનં ઘોરં તત્ર વિપ્રાન્ દદર્શ હ ॥ ૨૯॥

તાન્ પ્રણમ્ય મહાભાગાનપૃચ્છત્ પુત્રદાયકમ્ ।
ઉપાયં તે સમાચખ્યુર્વ્રતં સંવત્સરાત્મકમ્ ॥ ૩૦॥

શ્રુત્વા વિધિયુતં પૂર્ણં વ્રતં ગાણેશ્વરં પરમ્ ।
પ્રણમ્ય તાન્ સમાયાતઃ સ્વગૃહં હર્ષસંયુતઃ ॥ ૩૧॥

ગાણેશપઞ્ચકં પૂર્ણં સેવિતું ન બભૂવ હ ।
સમર્થઃ સ તતો વિપ્ર ચકાર સ્વલ્પભાવતઃ ॥ ૩૨॥

સ્નાત્વા ગણપતેઃ પૂજાં ચકાર પાર્થિવીં પરામ્ ।
નામમન્ત્રૈઃ સ્વયં નિત્યં બ્રહ્મચર્યયુતોઽભવત્ ॥ ૩૩॥

એકભુઙ્ નિયમે સંસ્થશ્ચકાર વ્રતમુત્તમમ્ ।
સમાપ્ય તદ્વ્રતં પૂર્ણં ગણેશમભજન્મુદા ॥ ૩૪॥

દ્વિજાતીનાં સ શુશ્રૂષાં ચકાર ધર્મસંયુતઃ ।
મિલિતેન તદન્નેન કુટુમ્બં સમપોષયત્ ॥ ૩૫॥

તતઃ સ્વલ્પેન કાલેન પુત્રં લેભે મહામુને ।
જ્ઞાનયુક્તં સરૂપં તં દૃષ્ટ્વાઽતિહર્ષિતોઽભવત્ ॥ ૩૬॥

ક્રમેણ પઞ્ચ પુત્રાશ્ચ પુત્ર્યસ્તિસ્રો બભૂવિરે ।
શૂદ્રસ્ય સ ગણેશાનં મન્યતે સ્મ સમર્થકમ્ ॥ ૩૭॥

અન્તે સ્વાનન્દલોકં સ જગામ ભાર્યયા યુતઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ બ્રહ્મભૂતો બભૂવ હ ॥ ૩૮॥

એવં નાના જના વિપ્ર કિઞ્ચિત્ કૃત્વા વ્રતાત્મકમ્ ।
નિયમં સિદ્ધિસંયુક્તા બભૂવુઃ કતિ તે બ્રુવે ॥ ૩૯॥

ઉદ્યાપનં મયા પ્રોક્તં તદેવ સર્વસમ્મતમ્ ।
સર્વમાસેષુ કર્તવ્યં માસાત્મકવ્રતેઽપિ ચ ॥ ૪૦॥

ચાતુર્માસ્યવ્રતે વિપ્ર ઉદ્યાપનમિદં સ્મૃતમ્ ।
મલમાસવ્રતે તદ્વદિદં કર્તવ્યમાદરાત્ ॥ ૪૧॥

સાંવત્સરં વ્રતં મુખ્યં કથિતં તે સમાસતઃ ।
પઠનાચ્છ્રવણાચ્ચેદં સર્વદં પ્રભવિષ્યતિ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે સંવત્સરવ્રતમાહાત્મ્યવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૮.૩૬

## ૮.૩૭ ચાતુર્માસ્યમાહાત્મ્યે વિભાણ્ડવ્રતોપદેશવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ચાતુર્માસ્ય વ્રતં બ્રૂહિ ગાણેશં સર્વદાયકમ્ ।
ન તૃપ્યામિ કથાં શ્રુત્વા નાનાશ્ચર્યવિવર્દ્ધિનીમ્ ॥ ૧॥

સૂત ઉવાચ ।
અત્ર તે કથયિષ્યામિ પુરાતનભવં પરમ્ ।
ઇતિહાસં મહાભાગ શ્રવણાત્ સર્વદાયકમ્ ॥ ૨॥

બૃહદશ્વ ઇતિ ખ્યાતો બ્રાહ્મણઃ પરમાર્થવિત્ ।
તપોયુક્તો મહાતેજાઃ શાપાનુગ્રહણે ક્ષમઃ ॥ ૩॥

નાનાતપઃપ્રભાવેણાંડતર્જ્ઞાનં સમ્બભૂવ હ ।
હૃદિ તસ્ય તતઃ સોઽપિ શમદમપરોઽભવત્ ॥ ૪॥

સોઽહમ્બ્રહ્મણિ સંસ્થોઽભૂત્ અન્તે શૂન્યમયે મુનિઃ ।
શાન્તિયુક્તઃ સ્વભાવેન સંસ્થિતો બ્રહ્મવિત્સમઃ ॥ ૫॥

તસ્યાઽઽશ્રમે મહાયોગી વિભાણ્ડઃ સહસાઽઽગતઃ ।
તં પ્રણમ્ય મહાભાગં પુપૂજ ભક્તિસંયુતઃ ॥ ૬॥

વિશ્રાન્તં મુનિમુખ્યં સ જગાદ હર્ષસંયુતઃ ।
વિભાણ્ડં વિનયેનૈવ યુક્તો વચનમુત્તમમ્ ॥ ૭॥

બૃહદશ્વ ઉવાચ ।
નિરાલમ્બમયં બ્રહ્મ સદૈકરૂપધારકમ્ ।
ધ્યાતૃધ્યાનવિહીનં યત્ તત્ત્વમેવ ન સંશયઃ ॥ ૮॥

મહાભાગ્યેન દૃષ્ટ્વા ત્વાં સાક્ષાત્ યોગીશ્વરં પરમ્ ।
અધુના કૃતકૃત્યોઽહં જાતસ્તે પાદદર્શનાત્ ॥ ૯॥

એવં તસ્ય વચઃ શ્રુત્વા વિભાણ્ડસ્તમુવાચ હ ।
યોગયુક્તં સુનૈપુણ્યં જ્ઞાત્વા શાન્તિપ્રદાયકઃ ॥ ૧૦॥

(Page  ખં. ૮ અ. ૩૭ પાન ૮૫)
વિભાણ્ડ ઉવાચ ।
અહં ગણેશરૂપશ્ચેત્તત્રૈકત્વં ન વિદ્યતે ।
નિરાલમ્બભવં સૌખ્યં મુને કુત્ર પ્રવર્તતે ॥ ૧૧॥

તસ્ય તદ્વચનં શ્રુત્વા બૃહદશ્વસ્તમબ્રવીત્ ।
સુશાન્તિદં વિસ્મિતઃ કિં તદર્થં લાલસી સદા ॥ ૧૨॥

બૃહદશ્વ ઉવાચ ।
પૂર્ણશાન્તિપ્રદં નાથ વદ માં કરુણાનિધે ।
સોહઙ્કારાત્પરં ભાવં ન જાનામિ કદાચન ॥ ૧૩॥

વિભાણ્ડ ઉવાચ ।
અહં પુરા તપોનિષ્ઠોઽભવં તત્ર સમાયયુઃ ।
ઇન્દ્રેણ પ્રેષિતા નાર્યસ્તપોભઙ્ગાર્થમાદરાત્ ॥ ૧૪॥

નૃત્યગાનાદિ ચિહ્નૈર્માં મોહનાય સમુદ્યતાઃ ।

અપ્સરસસ્તતો ધૈર્યમહં ધૃત્વા સ્થિતોઽભવમ્ ॥ ૧૫॥

તતોઽતિ હઠસંયુક્તાઃ સ્ત્રિયઃ કામસમન્વિતાઃ ।
હાવભાવકટાક્ષાદ્યૈશ્ચિહ્નૈર્માં સમપીડયન્ ॥ ૧૬॥

તતો મે વિહ્વલત્વાદ્વૈ વીર્યં પપાત ભૂતલે ।
તૃણયુક્તે સુસઙ્ખિન્નોઽગમં ત્યક્ત્વા સ્વમાશ્રમમ્ ॥ ૧૭॥

તતસ્ત્વપ્સરસઃ સર્વા જગ્મુઃ સ્વર્ગં મહામુને ।
અહં જાજલિકં વિપ્રમગમં તં નતોઽભવમ્ ॥ ૧૮॥

તેન સમ્માનિતો નિત્યમવસં તપસા યુતઃ ।
અવદં ગણનાથસ્ય પૂજને સક્તમાદરાત્ ॥ ૧૯॥

એકનિષ્ઠતયા સ્વામિન્નિત્યં ભક્તિસમન્વિતઃ ।
ત્યક્ત્વા દેવેન્દ્રકાન્ સર્વાન્ ગણેશં ભજસે કથમ્ ॥ ૨૦॥

એવં પૃષ્ટો મયા યોગી જાજલિઃ પરમાર્થવિત્ ।
મામુવાચ દયાયુક્તસ્તત્તેઽહં કથયામિ તુ ॥ ૨૧॥

જાજલિરુવાચ ।
ગણેશાન્ન પરં બ્રહ્મ વેદે પશ્ય મહામતે ।
બ્રહ્મણસ્પતિ સંજ્ઞં તં વદન્તિ વેદવાદિનઃ ॥ ૨૨॥

અહં પુરા તપોનિષ્ઠોઽભવં નિત્યં મહામુને ।
અત્યન્તતપસા મેઽભૂદ્ વ્યાપ્તં સર્વં ચરાચરમ્ ॥ ૨૩॥

તતોઽકસ્માત્ સમાયાતમાશ્રમે મે મહામુનિઃ ।
લોમશં તં પ્રણમ્યાહમપૂજં ભક્તિસંયુતઃ ॥ ૨૪॥

તતો મામબ્રવીત્ વિપ્રો લોમશઃ સર્વવિન્ મુનિઃ ।
દયાયુક્તઃ સ્વભાવેન મહાયોગીન્દ્રવન્દિતઃ ॥ ૨૫॥

લોમશ ઉવાચ ।
કિં તપોનિષ્ઠભાવેન સાધ્યં કર્તુમભીપ્સસિ ।
યોગં સાધય તત્ત્વજ્ઞ સ્વયં બ્રહ્મ ભવિષ્યસિ ॥ ૨૬॥

તપસા સર્વભોગશ્ચ લભ્યતે માનવૈઃ સદા ।
પુનઃ પતનભાવાત્તન્નમત્તં દ્વન્દ્વસંયુતઃ ॥ ૨૭॥

એવં તસ્ય વચઃ શ્રુત્વા તં પ્રણમ્ય પુનર્મુનિમ્ ।

અપૃચ્છં યોગદં માર્ગં વિનયેન સમન્વિતઃ ॥ ૨૮॥

કેન માર્ગેણ યોગજ્ઞ લભે યોગં મહામુને ।
તં વદસ્વ કરિષ્યામિ ત્વચ્છિષ્યોઽહં વિધાનતઃ ॥ ૨૯॥

લોમશ ઉવાચ ।
પુરાઽહં કર્મયોગેન મૂકસ્તપઃસમન્વિતઃ ।
પ્રણમ્ય ભક્ત્યા બ્રહ્માણમપૃચ્છં સર્વદં વદ ॥ ૩૦॥

તતસ્તેન સમાખ્યાતં સર્વસારં સુશાન્તિદમ્ ।
ગાણેશં સર્વમાન્યં તત્ પુરાણં સંશ્રુતં મયા ॥ ૩૧॥

શ્રવણસ્ય ચ માહાત્મ્યાદ્વાણીયુક્તોઽભવં પુરા ।
તતો હર્ષસમાયુક્તો મુને વિધિં નતો વિભુમ્ ॥ ૩૨॥

તતઃ સ્વમાશ્રમં ગત્વા ગણેશકથિતં પરમ્ ।
ગીતાજ્ઞાનં સમારાધ્ય યોગિવન્દ્યોઽભવં મુદા ॥ ૩૩॥

તતો ગણેશ્વરં સ્થાપ્ય સ્વાશ્રમે તં વિધાનતઃ ।
પૂજ્ય ધ્યાનપરો ભૂત્વા તોષયામિ સ્મ વિઘ્નપમ્ ॥ ૩૪॥

(Page ખં. ૮ અ. ૩૭ પાન ૮૩)
એકાક્ષરજપાસક્તં માં જ્ઞાત્વા ગણનાયકઃ ।
શતવર્ષૈઃ પ્રસન્નોઽભૂદાયયૌ વરદઃ પ્રભુઃ ॥ ૩૫॥

તમાગતં સમાલોક્યોત્થાય નત્વા ગજાનનમ્ ।
પૂજ્ય નાનાવિધૈઃ સ્તોત્રૈઃ સ્તુતોઽસૌ મામુવાચ હ ॥ ૩૬॥

શ્રીગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગેપ્સિતં મનસિ લોમશ ।
દાસ્યામિ તપસા તુષ્ટો ભક્ત્યા તે મુનિસત્તમ ॥ ૩૭॥

લોમશ ઉવાચ ।
ગાણપત્યં કુરુષ્વ ત્વં માં તે ભક્તિસમન્વિતમ્ ।
નાન્યં યાચે વરં નાથ મિથ્યા માયાભ્રમાત્મકમ્ ॥ ૩૮॥

આયુષ્યં વિપુલં દેહિ તેન યુક્તો નિરન્તરમ્ ।
ભજિષ્યામિ ગણેશાન ચરણં તે તદર્થતઃ ॥ ૩૯॥

તતો મામબ્રવીદ્દેવો ગણેશો ભક્તવત્સલઃ ।

ગાણપત્યપ્રિયોઽત્યન્તં ભવિષ્યસિ સ્વયં મુદા ॥ ૪૦॥

કલ્પે કલ્પે ચ તે રોમ લયં ગચ્છતિ નિત્યદા ।
એવં ક્રમેણ સર્વાણિ યાન્તિ લોમાનિ નાશકમ્ ॥ ૪૧॥

તદા દેહં પરિત્યજ્ય મલ્લોકે આગમિષ્યસિ ।
તત્ર માં ભક્તિભાવેન ભજિષ્યસિ ન સંશયઃ ॥ ૪૨॥

યદ્યદિચ્છસિ યોગીશ તત્તત્તે સફલં સદા ।
ભવિષ્યતિ સ્મૃતઃ કાર્યે પ્રકટોઽહં ભવામિ તે ॥ ૪૩॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
ખિન્નોઽહં તં સમાસ્થાપ્ય નિત્યપૂજાપરાયણઃ ॥ ૪૪॥

તતો બહૌ ગતે કાલે મુને મન્વન્તરાત્મકે ।
મઘવાઽન્યઃ સમુત્પન્નસ્ત્રિલોકીરાજ્યકારકઃ ॥ ૪૫॥

વિશ્વકર્માણમાહૂય જગાદ મઘવા વચઃ ।
ગૃહં મે કુરુ શોભાઢ્યં નાનાઽઽશ્ચર્યયુતં પરમ્ ॥ ૪૬॥

વાટિકાદિકમેવં મે ભોગાર્થં રચયસ્વ ચ ।
તથેતિ વિશ્વકર્માઽસૌ ચકાર દુઃખસંયુતઃ ॥ ૪૭॥

તથાપિ મઘવા શાન્તો ન બભૂવ મહામુને ।
તેનાશ્ચર્યયુતોનિત્યમિદં કુરુ મહામતે ॥ ૪૮॥

વિશ્વકર્મા તતઃ ખિન્નઃ સસ્માર ગણનાયકમ્ ।
ઇન્દ્રં ત્યક્ત્વાઽન્યદેવાનાં ગૃહાર્થં વ્યાકુલોઽભવત્ ॥ ૪૯॥

કદાઽયં ગૃહકાર્યં તુ ગજાનનઃ સમાપ્ય મામ્ ।
મોચયિષ્યતિ દેવેશોઽન્યદેવકાર્યસિદ્ધયે ॥ ૫૦॥

તતોઽહં દૈવયોગેનાગમં દેવેન્દ્રસત્તમમ્ ।
મઘવા પૂજ્ય માં વાક્યં જગાદ હર્ષસંયુતઃ ॥ ૫૧॥

ઇન્દ્ર ઉવાચ ।
ધન્યં મે જન્મકર્માદિ ત્વત્પાદયુગદર્શનાત્ ।
કિં પત્રં મસ્તકે વિપ્ર પલાશસ્ય ધૃતં વદ ॥ ૫૨॥

લોમશ ઉવાચ ।
દેહો નશ્વરરૂપોઽયં પતિષ્યતિ ન સંશયઃ ।

તદર્થં ગૃહસમ્ભૂતં શ્રમં કઃ પ્રસમાચરેત્ ॥ ૫૩॥

વૃષ્ટિસંવારણાર્થાયોષ્ણભાવાર્થનિવારણાત્ ।
પત્રં ગૃહસ્વરૂપં તુ પુરન્દર ધૃતં મયા ॥ ૫૪॥

એવં મદ્વિરમાકર્ણ્ય મામુવાચ પુરન્દરઃ ।
કલ્પે લોમ્નઃ પ્રણાશસ્તે ભવેત્તે નૈવ લોમશઃ ॥ ૫૫॥

આજ્ઞાં કુરુ મહાભાગ ત્વદર્થં ગૃહમુત્તમમ્ ।
કારયિષ્યામિ વિપ્રેશ તત્ર નિત્યં સુખી ભવ ॥ ૫૬॥

વયં ચતુર્દશ પ્રાજ્ઞાઽભવન્ ત્વલ્લોમનાશકે ।
તદપિ ત્વં કિમર્થં તં દેહં વદસિ નશ્વરમ્ ॥ ૫૭॥

શ્રુત્વાઽહં મઘવન્તં તમવદં હર્ષસંયુતઃ ।
ઇન્દ્ર કિં માં ત્વં વદસિ ભ્રાન્તિદં યોગનાશનમ્ ॥ ૫૮॥

નષ્ટં દેહં સમાલોક્ય કઃ શ્રામ્યેત્તત્ર પણ્ડિતઃ ।
યોગામૃતેન સન્તુષ્ટોઽહં ભ્રમામિ યદૃચ્છયા ॥ ૫૯॥

પિપીલિકા ભવચ્ચેન્દ્રો નરઃ સુધુમ્નસંજ્ઞિતઃ ।
(Page ખં. ૮ અ. ૩૭ પાન ૮૭)
પૂર્વસંસ્કારયોગેનાશ્વમેધશતકારકાઃ ॥ ૬૦॥

સ ત્વં યજ્ઞફલં ભોક્તું જાતોઽસિ મઘવાઽધના ।
પતિષ્યસિ પુનર્દેવ તત્ર કા તે ગતિર્ભવેત્ ॥ ૬૧॥

એવમુક્ત્વા મહાયોગી લોમશઃ સ્વપ્રભાવતઃ ।
દદૌ જાતિસ્મરત્વં તુ મઘવતે મહાયશાઃ ॥ ૬૨॥

મઘવા સર્વમાલોક્ય ત્રાસયુક્તો બભૂવ હ ।
પ્રણમ્ય લોમશં સોઽપિ પપ્રચ્છ હિતકારકમ્ ॥ ૬૩॥

ઇન્દ્ર ઉવાચ ।
જન્મમૃત્યુહરં તાત વદ યોગં પરાત્ પરમ્ ।
યેન કામાદિકં સર્વં નાશં ગચ્છતિ તત્ક્ષણાત્ ॥ ૬૪॥

લોમશ ઉવાચ ।
ગણેશં ભજ ભાવેન તતો યોગમવાપ્સ્યસિ ।
બ્રહ્મણાં બ્રહ્મરૂપોઽયં સદા શાન્તિપરાયણઃ ॥ ૬૫॥

ઇન્દ્ર ઉવાચ ।
નામરૂપધરં દેવં વદસે કિં ગણેશ્વરમ્ ।
યોગાકારં મહાભાગ વદ તસ્ય મહો મહત્ ॥ ૬૬॥

લોમશ ઉવાચ ।
યોગરૂપો ગણેશોઽયં યોગપ્રાપ્ત્યર્થમાદરાત્ ।
નામરૂપધરો જાતો ભક્તાનાં ક્રીડનોત્સુકઃ ॥ ૬૭॥

સમ્પ્રજ્ઞાતમયો દેહો મસ્તકં ગજવાચકમ્ ।
અસમ્પ્રજ્ઞાતરૂપં તત્તયોર્યોગે ગજાનનઃ ॥ ૬૮॥

સિદ્ધિર્ભ્રાન્તિકરી માયા બુદ્ધિર્ભ્રાન્તિધરા મતા ।
તાભ્યાં ક્રીડતિ બ્રહ્મેશો જગત્સુ બ્રહ્મસુ પ્રભો ॥ ૬૯॥

સ્વસંવેદ્યેન યોગેન દર્શનં તસ્ય જાયતે ।
તેન સ્વાનન્દવાસી સ કથિતઃ શાસ્ત્રવાદિભિઃ ॥ ૭૦॥

ગણાઃ સમૂહરૂપાશ્ચ બાહ્યાન્તરાદિયોગતઃ ।
બ્રહ્માકારો ગણેશાનસ્તેષાં સ્વામી પ્રકીર્તિતઃ ॥ ૭૧॥

એવમુક્ત્વા મહાયોગી લોમશો મન્ત્રમાદિશત્ ।
ષડક્ષરં ગણેશસ્યેન્દ્રાર્થં વિધિસમન્વિતમ્ ॥ ૭૨॥

ઇન્દ્રઃ પ્રણમ્ય વિપ્રેશમુવાચ વિનયાન્વિતઃ ।
વદ શીઘ્રં ગણેશસ્ય દર્શનં મે કથં ભવેત્ ॥ ૭૩॥

લોમશ ઉવાચ ।
દક્ષિણાયનરૂપા સા રાત્રિર્દેવી દિવૌકસામ્ ।
રાત્રૌ કર્માધિકારો ન નરાણાં ભૂનિવાસિનામ્ ॥ ૭૪॥

તજ્જ્ઞાત્વા દુઃખસંયુક્તા રાત્રિર્બ્રહ્માણમાવદત્ ।
સત્કર્મસંયુતાં નાથ માં કુરુષ્વ પિતામહ ॥ ૭૫॥

તતો બ્રહ્મા દદૌ તસ્યૈ મન્ત્રં ષોડશવર્ણકમ્ ।
ગણેશસ્ય યયૌ સા તં પ્રણમ્ય વનમુત્તમમ્ ॥ ૭૬॥

ધ્યાત્વા હૃદિ ગણાધીશં તતાપ તપ ઉત્તમમ્ ।
આષાઢ્યાં પૂર્ણિમાયાં સા સમારેભે તતઃ પરમ્ ॥ ૭૭॥

કાર્તિક્યાં પૂર્ણિમાયાં તાં પ્રસન્નોઽભૂદ્ગજાનનઃ ।

આયયૌ વરદાનાર્થં રાત્રિં ભક્તિનિયન્ત્રિતઃ ॥ ૭૮॥

સમાગતં ગણાધ્યક્ષં સા વિલોક્ય નનામ તમ્ ।
તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈર્ભક્તિનમ્રાત્મકન્ધરા ॥ ૭૯॥

તતઃ પ્રસન્નતાં યાતો ગણેશસ્તામુવાચ હ ।
વરાન્ વરય રાત્રે ત્વં દાસ્યામિ હૃદિ તે સ્થિતાન્ ॥ ૮૦॥

રાત્રિરુવાચ ।
ભક્તિં તે ચરણે નાથ દેહિ મેઽનન્યધર્મિણીમ્ ।
સત્કર્મસંયુતાં માં ત્વં કુરુષ્વ રાત્ર્યપિ પ્રભો ॥ ૮૧॥

તસ્યાસ્તદ્વચનં શ્રુત્વા તાં જગાદ ગજાનનઃ ।
ભક્તિર્મદીયપાદે તે ભવિષ્યતિ મહામતે ॥ ૮૨॥

આષાઢી પૂર્ણિમાદ્યં ચ કાર્તિકી પૂર્ણિમાન્તગમ્ ।
ચાતુર્માસ્યં સિદ્ધિદં ચ ભવિષ્યતિ સુધર્મિણામ્ ॥ ૮૩॥

ગાણેશપઞ્ચકં સેવ્યં ચાતુર્માસ્યે ત્વદીયિકે ।
સર્વસિદ્ધિસમાયુક્તા ભવિષ્યસિ ન સંશયઃ ॥ ૮૪॥

(Page ખં. ૮ અ. ૩૭ પાન ૮૮)
ષણ્માસેષુ મહાભાગે ભવ સત્કર્મસંયુતા ।
નાના દેવપ્રિયાઽત્યન્તં સત્કર્મણઃ પ્રતાપતઃ ॥ ૮૫॥

વિવાહાદિકમેવં તે સમયેન ભવિષ્યતિ ।
અન્યન્નાનાવિધં કર્મ દેવતોષં તથાઽસ્તુ ચ ॥ ૮૬॥

ચાતુર્માસ્યવ્રતેનૈવ માં નરાઃ પર્યુપાસતે ।
સાંવત્સરભવં પુણ્યં લભન્તે પૂર્ણભાવતઃ ॥ ૮૭॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ભક્તવત્સલઃ ।
રાત્રિસ્તં પ્રણિપત્યૈવ હર્ષયુક્તાઽભવત્ સદા ॥ ૮૮॥

અતસ્ત્વં દેવરાજેન્દ્ર ચાતુર્માસ્યવ્રતં કુરુ ।
યોગયુક્તો મહાભાગો ભવિષ્યસિ ન સંશયઃ ॥ ૮૯॥

એવમુક્ત્વા મહેન્દ્રં તં પૂજિતસ્તેન ચાગમમ્ ।
સ્વસ્યાશ્રમં ગણેશાનમભજં મુનિસત્તમ ॥ ૯૦॥

ઇન્દ્રસ્તતઃ સમાહૂય વિશ્વકર્માણમાદરાત્ ।

જગાદ તં મહાભાગં ગચ્છ ત્વં સ્વગૃહં સુર ॥ ૯૧॥

વિશ્વકર્મા યયૌ સ્થાનં સ્વકીયં હર્ષસંયુતઃ ।
અભજદ્ગણનાથં સ વિસ્મિતઃ સન્ મહામતિઃ ॥ ૯૨॥

ઇન્દ્રો રાજ્યં વિનિક્ષિપ્ય દેવેષુ વનગોઽભવત્ ।
ધ્યાત્વા હૃદિ ગણેશાનમજપન્ મન્ત્રમુત્તમમ્ ॥ ૯૩॥

ચાતુર્માસ્યવ્રતં ચક્રે ગાણેશે પઞ્ચકે રતઃ ।
તેન વ્રતપ્રભાવેણ યોગયુક્તો બભૂવ હ ॥ ૯૪॥

ચિત્તમોહં પરિત્યજ્ય સ ચિન્તામણિતન્મયઃ ।
ભૂત્વા સ્વગૃહમાગત્ય ચકાર રાજ્યમુત્તમમ્ ॥ ૯૫॥

નિઃસ્પૃહઃ સર્વભોગેષુ સદા વિઘ્નેશતત્પરઃ ।
બભૂવ રાજ્યસંસ્થોઽપિ મહેન્દ્રઃ પરમાર્થવિત્ ॥ ૯૬॥

નિત્યવ્રતં ચકારાસૌ મહેન્દ્રો ભક્તિસંયુતઃ ।
ચાતુર્માસ્યભવં વિપ્ર સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૯૭॥

ભુક્ત્વા મન્વન્તરસ્થં સ્વરાજ્યં નિહતકણ્ટકમ્ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૯૮॥

જાજલિરુવાચ ।
દેવાઃ કર્મફલં ભુક્ત્વા પતન્તિ ભૂમિમણ્ડલે ।
સ્વર્ગેષુ યત્ કૃતં કર્મ ફલહીનં મતં બુધૈઃ ॥ ૯૯॥

ઇન્દ્રઃ કથં મહાભાગ ચાતુર્માસ્યવ્રતોદ્ભવમ્ ।
ફલં પ્રાપ્ય ગણેશાનં યયાવન્તે વદ પ્રભો ॥ ૧૦૦॥

લોમશ ઉવાચ ।
ત્વયોક્તં જાજલે વાક્યં તદેવ સર્વસમ્મતમ્ ।
સ્વર્ગભૂમૌ કૃતં કર્મ નિષ્ફલં જાયતે સદા ॥ ૧૦૧॥

પૃથિવ્યાં ભારતે ખણ્ડે સમાગત્ય મહામુને ।
દેવાઃ કુર્વન્તિ કર્માણિ તાનિ સત્ફલકાનિ તુ ॥ ૧૦૨॥

કર્મભૂમૌ કૃતં કર્મ દેવૈર્વા દાનવૈર્નરૈઃ ।
જન્તુભિર્વિવિધૈઃ સર્વૈઃ સફલં સમ્ભવેત્ સદા ॥ ૧૦૩॥

અતો વ્રતં મુખ્યતમં કુરુ વિઘ્નેશતત્પરઃ ।

ચાતુર્માસ્યભવં ચિત્રં ગાણેશપઞ્ચકે રતઃ ॥ ૧૦૪॥

ગણેશકૃપયા સર્વં જ્ઞાસ્યસિ નાત્ર સંશયઃ ।
અન્તે તલ્લીનતાં વિપ્ર ગમિષ્યસિ વિશેષતઃ ॥ ૧૦૫॥

જાજલિસ્તં પ્રણમ્યાઽઽદદૌ લોમશં ગુરુમુખ્યકમ્ ।
જગામ સ્વાશ્રમં ત્યક્ત્વા બલ્લાલેશં મહામતિઃ ॥ ૧૦૬॥

તત્ર ગત્વા વ્રતં મુખ્યં ચકાર ભક્તિસંયુતઃ ।
ચાતુર્માસ્યે યથાશાસ્ત્રયુક્તં પયઃ પ્રભક્ષયન્ ॥ ૧૦૭॥

સમાપ્તે તદ્વ્રતે સદ્યઃ પ્રસન્નો ગણનાયકઃ ।
આયયૌ જાજલિં વિપ્રં વરદો ભક્તવત્સલઃ ॥ ૧૦૮॥

તમાગતં સમાલોક્ય જાજલિઃ પ્રણનામ હ ।
પૂજ્ય નમ્ય પ્રતુષ્ટાવ કૃત્વા કરપુટં પ્રભુમ્ ॥ ૧૦૯॥

જાજલિરુવાચ ।
નમસ્તે બ્રહ્મનાથાય બલ્લાલેશસ્વરૂપિણે ।
(Page ખં. ૮ અ. ૩૭ પાન ૮૯)
બલ્લાલવરદાત્રે તે ગણેશાય નમો નમઃ ॥ ૧૧૦॥

વિઘ્નેશાય મહાવિઘ્નનાશનાય પરાત્મને ।
ભક્તાનાં ભક્તનાથાયાભક્તાનાં વિઘ્નકારિણે ॥ ૧૧૧॥

પરાત્પરતરાયૈવ સગુણાય ચતુર્ભુજ ।
નિર્ગુણાય તયોર્યોગે હેરમ્બાય નમો નમઃ ॥ ૧૧૨॥

વક્રતુણ્ડાય દેવાયૈકદન્તાય મહોદર ।
લમ્બોદરાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૧૧૩॥

સ્વાનન્દવાસિને તુભ્યં સદા સ્વાનન્દભોગિને ।
નાનામાયાપ્રચાલાય માયિકાય નમો નમઃ ॥ ૧૧૪॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિમયાય તે ।
અમેયશક્તયે ચૈવ શક્તિહીનાય તે નમઃ ॥ ૧૧૫॥

દેવાય દાનવાયૈવ દેવદાનવમર્દિને ।
સર્વાકારાય સર્વેભ્યો હીનાય તે નમો નમઃ ॥ ૧૧૬॥

યોગાનાં યોગનાથાય શાન્તીનાં શાન્તિરૂપિણે ।

બ્રહ્મણાં પતયે તુભ્યં ચિન્તામણે નમો નમઃ ॥ ૧૧૭॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યત્ર વેદા વિસિસ્મિરે ।
ધન્યોઽહં સર્વભાવૈઃ પશ્યામિ ત્વાં યોગરૂપિણમ્ ॥ ૧૧૮॥

એવમુક્ત્વા ગણેશાનં નનામ ભક્તિભાવતઃ ।
તમુત્થાપ્ય ગણેશાનો જગાદ ભક્તવત્સલઃ ॥ ૧૧૯॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
પઠતાં શ ૃણ્વતાં વિપ્ર મયિ ભક્તિવિવર્ધનમ્ ॥ ૧૨૦॥

વરાન્ બ્રૂહિ મહાભાગ દાસ્યામિ મનસીપ્સિતાન્ ।
તપસા ભક્તિભાવેન તુષ્ટો વ્રતેન નિશ્ચિતમ્ ॥ ૧૨૧॥

જાજલિરુવાચ ।
તવ ભક્તિં સ્થિરાં દેહિ ગાણપત્યપદપ્રદામ્ ।
યોગશાન્તિકરીં નાથ નાન્યં યાચે ગજાનન ॥ ૧૨૨॥

ઓમિત્યુક્ત્વા ગણાધીશોંઽતર્દધે મુનિસત્તમ ।
જાજલિસ્તં પ્રણમ્યૈવ હર્ષયુક્તો બભૂવ હ ॥ ૧૨૩॥

એવં વ્રતસ્ય માહાત્મ્યં વિભાણ્ડ કથિતં મયા ।
યેનાહં યોગિનાં વન્દ્યોઽભવં યોગપરાયણઃ ॥ ૧૨૪॥

તદાદિ વાર્ષિકં વિપ્ર ચાતુર્માસ્યભવં વ્રતમ્ ।
કરોમિ ગણપપ્રીત્યૈ બલ્લાલેશં સમાશ્રિતઃ ॥ ૧૨૫॥

ત્વમપ્યેતાદૃશં વિપ્ર વ્રતં કુરુ મહાદ્ભુતમ્ ।
ચાતુર્માસ્યે મહાયોગિવન્દ્યઃ સદ્યો ભવિષ્યસિ ॥ ૧૨૬॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમષ્ટાક્ષરં મુનિઃ ।
સવિધિં ગણરાજસ્ય વિભાણ્ડાય મહાત્મને ॥ ૧૨૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ચાતુર્માસ્યમાહાત્મ્યે વિભાણ્ડવ્રતોપદેશવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૮.૩૭
(Page ખં. ૮ અ. ૩૮ પાન ૯૦)

# ૮.૩૮ કલ્યાણદુર્ગતિવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વિભાણ્ડ ઉવાચ ।
બલ્લાલેશચરિત્રં મે બ્રૂહિ યોગીન્દ્રસત્તમ ।
બલ્લાલેશઃ કથં નામ્ના ગણેશોઽભૂચ્છુભપ્રદઃ ॥ ૧॥

કેનાસૌ સ્થાપિતો દેવઃ પલ્લીસામીપ્યગોઽભવત્ ।
ચરિત્રં વદ યોગીશ સર્વસિદ્ધિકરં પરમ્ ॥ ૨॥

જાજલિરુવાચ ।
સિન્ધુદેશે સમાખ્યાતા પલ્લી નામ્ની પુરી પુરા ।
તત્ર કલ્યાણનામ્નૈકો વૈશ્યો ધર્મયુતોઽભવત્ ॥ ૩॥

ઇન્દુમતી મહાભાગા પત્ની તસ્ય સુરૂપિણી ।
તસ્યાં પુત્રૌઽભવત્તસ્માદ્બલ્લાલો ભક્તિસંયુતઃ ॥ ૪॥

પુત્રસ્યૈકાદશે નામ દિવસે સ ચકાર હ ।
બલ્લાલો બ્રાહ્મણૈરુક્તો ભક્તિબલસમન્વિતઃ ॥ ૫॥

બલ્લાલો ગણનાથસ્ય ધ્યાનયુક્તઃ સદાઽભવત્ ।
ક્ષુધાં તૃષાં ન જાનાતિ ભક્તિભાવાત્ સ્મ નિત્યદા ॥ ૬॥

માતા પુત્રાય સ્તન્યં તુ દદૌ હર્ષસમન્વિતા ।
કૃત્વા સ્મરણમત્યન્તમતિવિસ્મિતમાનસા ॥ ૭॥

ન રુરોદ કદા બાલસ્તન્યાર્થં મુનિસત્તમ ।
તતશ્ચચાલ પદ્ભ્યાં સ જાનુના વૈશ્યનન્દનઃ ॥ ૮॥

પૃથિવ્યાં ગણપં ધૂલિમયં કૃત્વા મહામતિઃ ।
ધૂલ્યોપચારકૈસ્તં સ પૂજયામાસ ભક્તિતઃ ॥ ૯॥

તતઃ પદ્ભ્યાં ગતિં ચક્રે બલ્લાલો ગણપે રતઃ ।
અવદત્ સ્ખલિતાં વાચં જય વિઘ્નેશ આદરાત્ ॥ ૧૦॥

તતઃ કિઞ્ચિદ્ગતે કાલે સ વયસ્યૈઃ સમન્વિતઃ ।
પુપૂજ ગણનાથં તં યત્ર તત્ર મહીતલે ॥ ૧૧॥

બાલાન્ સંશિક્ષયામાસ મા ખેલં કુરુત પ્રિયાઃ ।
નાશભૂતં મહાભાગાઃ ખેલં ગાણેશચિહ્નિતમ્ ॥ ૧૨॥

ભજધ્વં ગણપં નિત્યં તેન સર્વં હિતં ભવેત્ ।
તતસ્તે તાદૃશં ચક્રુર્ગાણપત્યપરાયણાઃ ॥ ૧૩॥

તતઃ કાલે ગતે કિઞ્ચિત્તત્ર લોકભવં પરમ્ ।
વિઘ્નં ભક્તિવિઘાતાખ્યં જ્ઞાત્વા સોઽપિ સુદુઃખિતઃ ॥ ૧૪॥

વિચાર્ય હૃદિ બાલૈઃ સ મુદા ગ્રામસમીપગમ્ ।
પર્વતં વૈશ્યપુત્રોઽપિ જગામ ભક્તિકારણાત્ ॥ ૧૫॥

તત્ર સુન્દરરૂપં સ પાષાણં સ્થાપ્ય બાલકૈઃ ।
પુપૂજ વનજૈઃ પત્રૈઃ ફલૈઃ પુષ્પૈર્ગજાનનમ્ ॥ ૧૬॥

ત્રિકાલપૂજનં કૃત્વા રાત્રૌ સ્વગૃહમાયયૌ ।
ભુક્ત્વા સુષ્વાપ બલ્લાલો ગાણપત્યાગ્રણીર્મહાન્ ॥ ૧૭॥

પુનઃ પ્રાતઃ સમુત્થાય બાલકૈઃ સ જગામ હ ।
ગણેશં ભક્તિસંયુક્તસ્તૈઃ પુપૂજ મહામુને ॥ ૧૮॥

તતો લોકાઃ પુરે સંસ્થા બાલાન્ સન્તાડ્ય તાન્ જગુઃ ।
અભુક્ત્વા નિત્યમાનન્દાત્ કુત્ર ગચ્છથ બાલકાઃ ॥ ૧૯॥

નિશાયામેકભુક્તેન કથં તિષ્ઠથ નિત્યદા ।
બલ્લાલસઙ્ગસંયુક્તા મા ગચ્છથ કદાચન ॥ ૨૦॥

એવં ક્રોધસમાયુક્તા જના નગરવાસિનઃ ।
અશિક્ષયન્ સ્વપુત્રાદીંસ્તે તથાપિ વનં યયુઃ ॥ ૨૧॥

બલ્લાલસહિતાઃ સર્વે ગણેશભજને રતાઃ ।
નાનાછન્દયુતાસ્તં તે ગણેશમભજન્ પરમ્ ॥ ૨૨॥

તતોઽતિક્રોધસંયુક્તાઃ કલ્યાણં પ્રયયુઃ કિલ ।
જનાઃ શ્રેષ્ઠં મહાવૈશ્યં જગુસ્તં ભયવર્જિતાઃ ॥ ૨૩॥

નાગરા ઊચુઃ ।
બલ્લાલો બાલકાન્ ગૃહ્ય યાતિ નિત્યં વનાન્તરમ્ ।
ઉપોષણસમાયુક્તાન્ રાત્રાવાગચ્છતિ પ્રભો ॥ ૨૪॥

કૃશા નો બાલકાઃ સર્વે કૃતાસ્તેન દુરાત્મના ।
અદ્ય શ્વો વા મરિષ્યન્તિ સ્વસુતં શિક્ષયાઽધુના ॥ ૨૫॥

(Page  ખં. ૮ અ. ૩૮ પાન ૯૯)
નાનાપ્રયત્નવન્તોઽપિ વયં સર્વે મહામતે ।
તાડયામઃ સુતાન્ ગૃહ્ય તથાપિ ત્વત્સુતે રતાઃ ॥ ૨૬॥

તેષાં તદ્વચનં શ્રુત્વા કલ્યાણઃ ક્રોધસંયુતઃ ।
વિસૃજ્ય તાન્ યયૌ શીઘ્રં વને હન્તું સુતં શુભમ્ ॥ ૨૭॥

મહાન્તં દણ્ડમાદાય ક્રોધયુક્તઃ સ્વભાવતઃ ।
જગામ બાલસામીપ્યે દદર્શ બાલકાન્ મુને ॥ ૨૮॥

તૃણકાષ્ઠાદિભિશ્ચિત્રં ધાતુભી રઞ્જિતં પરમ્ ।
કૃત્વા દેવાલયં દેવં સ્થાપ્ય પૂજાપરાયણાન્ ॥ ૨૯॥

કાંશ્ચિત્ પ્રદક્ષિણપરાન્ નામકીર્તનસંયુતાન્ ।
ધ્યાનનિષ્ઠાન્ તપોનિષ્ઠાન્ પુરાણવાચકાન્ પરાન્ ॥ ૩૦॥

નાનાછન્દકરાન્ વૈશ્યો ગાણેશાન્ પરમાર્થકાન્ ।
બલ્લાલં ધ્યાનસંસ્થં તુ ગણેશસ્ય પુરઃ સુતમ્ ॥ ૩૧॥

તતો દણ્ડેન દેવસ્ય દેવાલયં બભઞ્જ હ ।
દૃષ્ટ્વા બાલા ભયોદ્વિગ્નાઃ પપલુઃ સર્વતો દિશમ્ ॥ ૩૨॥

એક એવ સ બલ્લાલો ન ચચાલ દૃઢાઽઽસનાત્ ।
નિયમસ્થો મહાભક્તસ્તં જગ્રાહ પિતા સુતમ્ ॥ ૩૩॥

દણ્ડેન તાડયામાસ બલ્લાલં યમસન્નિભઃ ।
તસ્ય દેહાત્ પ્રસુસ્રાવ રુધિરં સર્વતો દ્વિજ ॥ ૩૪॥

તથાપિ સ ગણેશાનં ન મુમોચ હૃદિ સ્થિતમ્ ।
સસ્માર દેહસન્ત્યાગે તત્પરો વૈશ્યજઃ પ્રભુમ્ ॥ ૩૫॥

તતો દેવં પ્રગૃહ્યૈવ ચિક્ષેપ ગણનાયકમ્ ।
દૂરે પર્વતભાગે સ વલ્લીપાશાનથાનયત્ ॥ ૩૬॥

તૈઃ સુતં હસ્તપાદેષુ બબન્ધ દૃઢમેવ સઃ ।
તતસ્તં ક્રોધસંયુક્તો જગાદ વૈશ્યજોઽધમઃ ॥ ૩૭॥

કલ્યાણ ઉવાચ ।
મામનાદૃત્ય નિત્યં ત્વં દેવપૂજાપરોઽસિ વૈ ।
તસ્યેદં ત્વં ફલં મુખ્યં ભુઙ્ક્ષ્વ પુત્ર મહાદ્ભુતમ્ ॥ ૩૮॥

લોકા માં લજ્જયા હીના વદન્તિ ત્વદ્વિચેષ્ટિતમ્ ।
અયશસ્કારિણં પુત્રં મારયસ્વ મહામતે ॥ ૩૯॥

ત્વયા પુત્રેણ સર્વત્ર નિન્દિતોઽહં કૃતોઽધુના ।
વન્ધ્યઃ પુરા મુદા યુક્તઃ સુયશા નગરેષુ તુ ॥ ૪૦॥

અતો દેહં પરિત્યજ્ય ગચ્છ વિઘ્નેશ્વરં સુત ।
સ તં સર્વં શુભં દેવઃ કરિષ્યતિ ન સંશયઃ ॥ ૪૧॥

એવમુક્ત્વા મહાપાપી જગામ નગરં પુનઃ ।
ગૃહે સમાગતસ્તત્ર વિઘ્નયુક્તો બભૂવ હ ॥ ૪૨॥

ગલત્કુષ્ઠયુતશ્ચાન્ધો બધિરઃ કુબ્જ એવ ચ ।
મૂકકીટસમાયુક્તો બભૂવ સહસા મુને ॥ ૪૩॥

તતોઽતિખેદસંયુક્તો બભૂવ વૈશ્યદૂષકઃ ।
પત્ની તં તાદૃશં દૃષ્ટ્વા શુશોચ દુઃખસંયુતા ॥ ૪૪॥

પપ્રચ્છ તં પતિં સા તુ ન સ શુશ્રાવ તાં ગિરમ્ ।
મૂકત્વાન્ન સ્વયં કિઞ્ચિજ્જગાદ દુઃખસંયુતઃ ॥ ૪૫॥

તતો જના જગુસ્તાં તે નાગરા ભયસંયુતાઃ ।
વૃત્તાન્તં વનસમ્ભૂતં બલ્લાલતાડનાત્મકમ્ ॥ ૪૬॥

તતોઽતિદુઃખસંયુક્તા સા જગામ વનં જનૈઃ ।
સુતં દ્રષ્ટું સતી વિપ્ર રુદતીન્દુમતી પરમ્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે કલ્યાણદુર્ગતિવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૮.૩૮
(Page ખં. ૮ અ. ૩૯ પાન ૯૨)

## ૮.૩૯ બલ્લાલેશ્વરવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વિભાણ્ડક ઉવાચ ।
બલ્લાલસ્ય ગતિં નાથ વદ લેભે સ કાં પરામ્ ।
ગાણપત્યો મહાભાગો દઃખિતો મુનિસત્તમ ॥ ૧॥

જાજલિરુવાચ ।

બલ્લાલો ગણનાથં સ સસ્માર વનસંસ્થિતઃ ।
રક્તસ્રાવયુતશ્ચૈકો બદ્ધઃ પિત્રા દુરાત્મના ॥ ૨॥

વિઘ્નારિર્નામ દેવેશ કથં તેઽભૂદ્ગજાનન ।
ભક્તવિઘ્નકરો મે કિં વિપરીતોઽસિ નિશ્ચિતમ્ ॥ ૩॥

મદ્ભક્તિખણ્ડનાર્થં માં યદા છલયસે પરમ્ ।
મયા પુરા પદે નાથ દેહોઽયં તે સમર્પિતઃ ॥ ૪॥

પતતુ મે શરીરં તુ ન મુઞ્ચામિ કદાચન ।
ત્વાં ગણેશ દયાસિન્ધો ભક્તોઽહં ભાવસંયુતઃ ॥ ૫॥

યદિ મે સુદૃઢા ભક્તિસ્તવ પાદે નિરન્તરમ્ ।
તદા કુષ્ઠયુતશ્ચાન્ધઃ પિતા ભવતુ કુબ્જકઃ ॥ ૬॥

મૂકો બધિરતાયુક્તો ભવતુ ત્વત્પ્રસાદતઃ ।
અહં બન્ધનહીનશ્ચ વિઘ્નેશ તે નમો નમઃ ॥ ૭॥

ગજાનનૈકભક્તસ્ય બલ્લાલસ્ય મુખાન્મુને ।
વચનં નિઃસૃતં યાવત્ સ તાવત્ તાદૃશોઽભવત્ ॥ ૮॥

તતો ગણેશ્વરઃ પ્રીતો બ્રાહ્મણસ્ય સ્વરૂપધૃક્ ।
તમાયયૌ મહાભક્તં ભક્તવચનયન્ત્રિતઃ ॥ ૯॥

બદ્ધં બલ્લાલભક્તં સ દદર્શ બ્રાહ્મણોત્તમઃ ।
તત્ક્ષણાચ્છિથિલાન્યેવ બન્ધનાનિ બભૂવિરે ॥ ૧૦॥

અઙ્ગાનિ ક્ષતહીનાનિ બભૂવુર્મુનિસત્તમ ।
તતઃ સ હર્ષિતો મેને ગણેશં દ્વિજરૂપિણમ્ ॥ ૧૧॥

ઉત્થાય તં સ બલ્લાલઃ પ્રણનામ પુપૂજ હ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટાવ કરસમ્પુટઃ ॥ ૧૨॥

બલ્લાલ ઉવાચ ।
ગણેશાય ધામ્ને પરેશાય તુભ્યં સદાઽઽનન્દરૂપાય સર્વાતિગાય ।
અપારસ્વરૂપાય દેવાધિદેવ નમસ્તે પ્રભો ભક્તસંરક્ષકાય ॥ ૧૩॥

હેરમ્બાય નમસ્તુભ્યં વિઘ્નેશાય પરાત્મને ।
બ્રહ્મેશાય મહાયોગદાત્રે શાન્તિમયાય તે ॥ ૧૪॥

સ્વાનન્દવાસિને તુભ્યં સ્વાનન્દે ખેલકાય તે ।

યોગેશાય મહોદારરૂપધારિન્નમો નમઃ ॥ ૧૫॥

સદા સન્મયકાયાયાવ્યક્તશીર્ષ્ણે નમો નમઃ ।
યોગરૂપેણ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૧૬॥

સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમસ્તે ગજવક્ત્રિણે ॥ ૧૭॥

લમ્બોદરાય દેવાય ચતુર્બાહુધરાય તે ।
મૂષકધ્વજિને તુભ્યં પાશાઙ્કુશપ્રધારિણે ॥ ૧૮॥

દ્વિજરૂપધરાયૈવ ભક્તવત્સલભાવતઃ ।
રક્ષિતું ભક્તવાક્યં તુ સમાગતાય તે નમઃ ॥ ૧૯॥

ત્વં માતા ત્વં પિતા નાથસ્ત્વં સુહૃત્ કુલદૈવતમ્ ।
દ્રવ્યં વિદ્યાદિકં મે ત્વં સર્વં તે વૈ નમો નમઃ ॥ ૨૦॥

દેહેન વાચા મનસા કૃતાન્ મે સાંસર્ગિકાન્ જાગૃતિસ્વપ્નજાતાન્ ।
સંસુપ્તિતો યાન્ સકલાપરાધાન્ ક્ષમસ્વ હેરમ્બ દયાનિધે ત્વમ્ ॥ ૨૧॥

એવમુક્ત્વા નનર્તાઽસૌ બલ્લાલો ભક્તિયન્ત્રિતઃ ।
સાશ્રુનેત્રઃ સરોમાઞ્ચો બ્રાહ્મણાગ્રે મહામુને ॥ ૨૨॥

તમુવાચ ગણાધીશસ્ત્યક્ત્વા બ્રાહ્મણરૂપકમ્ ।
ગજાનનસ્વરૂપેણ સંયુક્તો ભક્તમુત્તમમ્ ॥ ૨૩॥

શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂહિ મહાયોગિન્ યાંસ્તે ચિત્તગતાન્ પરાન્ ।
દાસ્યામિ ભક્તિતુષ્ટોઽહં નિયમેન મહામતે ॥ ૨૪॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
(Page  ખં. ૮ અ. ૩૯ પાન ૯૩)
ભવિષ્યતિ નરાયૈવ પઠતે શ‍ૃણ્વતે સદા ॥ ૨૫॥

યં યમિચ્છતિ તં તં તુ દાસ્યામ્યનેન સંસ્તુતઃ ।
અન્તે સાયુજ્યદં મે વૈ ભાવિ સ્તોત્રં વિશેષતઃ ॥ ૨૬॥

બલ્લાલ ઉવાચ ।
તવ ભક્તિં સ્થિરાં દેહિ સઙ્ગં મે ભાવિતાત્મનામ્ ।
ત્વયિ વિમુખભાવાનામનાદરં ગજાનન ॥ ૨૭॥

નાન્યં કિઞ્ચિદ્ વરં યાચે દાસોઽહં તે વિનાયક ।
ત્વદેકવિલયં નિત્યં માં કુરુષ્વ વિશેષતઃ ॥ ૨૮॥

તથેતિ તમથોવાચ ગણેશો ભક્તવત્સલઃ ।
ત્વન્નામપૂર્વકં નામ ભવિષ્યત્યત્ર મે પરમ્ ॥ ૨૯॥

અત્રૈવાહં સદા સર્વાન્ બલ્લાલેશો ગણેશ્વરઃ ।
સ્થાસ્યામિ ભક્તિસંયુક્તા પાલયિષ્યામિ યોગિનઃ ॥ ૩૦॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
તત્ર દેવાલયં ચિત્રં બભૂવ તત્ક્ષણાન્ મુને ॥ ૩૧॥

બલ્લાલેશયુતં રમ્યં દૃષ્ટ્વા બલ્લાલવૈશ્યકઃ ।
વિસ્મિતસ્તં પ્રણમ્યાઽઽદૌ પૂજાર્થં સન્દધે મનઃ ॥ ૩૨॥

તત્ર પૂજોપચારાશ્ચ પતિતા વૈ સમન્તતઃ ।
બલ્લાલસ્ય તતસ્તં તૈઃ પૂજયામાસ વૈશ્યજઃ ॥ ૩૩॥

નિયમં નિત્યજં પૂર્ણં કૃત્વા ધ્યાનપરોઽભવત્ ।
તત ઉત્થાય હર્ષેણ નનામ ગણનાયકમ્ ॥ ૩૪॥

દિવ્યજ્ઞાનયુતઃ સદ્યો બભૂવ પરમાદ્ભુતઃ ।
સ્વપરભ્રાન્તિહીનઃ સ બલ્લાલો ગણપપ્રિયઃ ॥ ૩૫॥

તતો માતા સમાયાતા લોકૈસ્તં સા દદર્શ હ ।
વિસ્મિતા નિર્વ્રણં દૃષ્ટ્વા મુક્તં દેવાલયે સ્થિતમ્ ॥ ૩૬॥

વૃત્તાન્તં તન્મુખાચ્છ્રુત્વા સ તાં પુનરુવાચ હ ।
ગણેશદ્વેષિણં તાતં ન પશ્યામિ કદાચન ॥ ૩૭॥

નાના જન્મસુ મે માતા પિતા નાનાવિધોઽભવત્ ।
તેષુ કેષાં ધરામ્યેવાભિમાનં તારણાત્મકમ્ ॥ ૩૮॥

ગચ્છ ત્વં સ્વગૃહં નાહં પુત્રો દુષ્ટસ્ય નિશ્ચિતમ્ ।
યેન દેવાલયં ભગ્નં સ દેવં ભક્તિખણ્ડને ॥ ૩૯॥

શ્રુત્વા સા શોકસંયુક્તા સ્વસ્થાનં તત આયયૌ ।
બલ્લાલસ્તત્ર વિઘ્નેશમભજત્ હર્ષસંયુતઃ ॥ ૪૦॥

તત્રાકસ્માત્ સમાયાતં જ્યોતીરૂપં વિમાનકમ્ ।
તેન બલ્લાલવૈશ્યસ્તુ જગામ ગણનાયકમ્ ॥ ૪૧॥

વિભાણ્ડ ઉવાચ ।
કર્મણા યન્ત્રિતા લોકાઃ શુભાશુભપરાયણાઃ ।
શુભાશુભે પ્રકુર્વન્તિ કર્મણા પ્રેરિતા પુનઃ ॥ ૪૨॥

તત્ર યોગી સ બલ્લાલઃ સ્વપરભ્રમવર્જિતઃ ।
કથં કલ્યાણવૈશ્યં તં દ્વેષિણં પ્રદદર્શ હ ॥ ૪૩॥

જાજલિરુવાચ ।
યોગિષુ ગણનાથસ્ય ભક્તાઃ શ્રેષ્ઠા મતા બુધૈઃ ।
તેષુ બલ્લાલવૈશ્યોઽયં ભક્તરાજોઽભવત્પરઃ ॥ ૪૪॥

ગણેશભજને સક્તાઃ પૂજ્યા માન્યા નિરન્તરમ્ ।
ભક્તૈસ્તદ્વિપરીતાસ્તે ત્યાજ્યા વૈરિસમાનકાઃ ॥ ૪૫॥

અતો બલ્લાલવૈશ્યસ્તુ પિતરં પૂજ્યમઞ્જસા ।
ગણેશાર્થં ગણેશસ્ય નિન્દકં સમભર્ત્સયત્ ॥ ૪૬॥

વિભાણ્ડક ઉવાચ ।
કુલે યસ્ય મહાયોગિન્ ગાણપત્યો ભવેત્ કદા ।
તસ્ય વંશભુવઃ કોટિકુલસ્યોદ્ધારકારકઃ ॥ ૪૭॥

અયં કલ્યાણવૈશ્યસ્ય પુત્રઃ સ્વાનન્દગોઽભવત્ ।
તદપિ તસ્ય જનકો માતા ભૂમૌ સ્થિતૌ કથમ્ ॥ ૪૮॥

અન્તે તયોર્ગતિશ્ચાત્ર કીદૃશી સમ્બભૂવ હ ।
કથાં શ્રુત્વા મહાચિત્રામાશ્ચર્યં મે હૃદિ સ્થિતમ્ ॥ ૪૯॥

જાજલિરુવાચ ।
ગાણપત્યઃ કુલે જાતઃ કુલોદ્ધારાર્થમાદરાત્ ।
(Page ખં. ૮ અ. ૩૯ પાન ૯૪)
યત્નં કરોતિ ચેદ્વિપ્ર તદા તસ્ય ગતિર્ભવેત્ ॥ ૫૦॥

અથવા ગણનાથં સ તદા ગચ્છેન્ મહામુને ।
ઉદ્ધારં કુલજાનાં વૈ ભવેત્ સદ્યો ન સંશયઃ ॥ ૫૧॥

બલ્લાલશાપરક્ષાર્થં ગણેશસ્તસ્ય ભાવગઃ ।
અન્યજન્મનિ ચોદ્ધારં ચકાર સ તયોઃ પુનઃ ॥ ૫૨॥

ઇદં બલ્લાલમાહાત્મ્યં કથિતં તે સમાસતઃ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં શૃણ્વતે પઠતે ભવેત્ ॥ ૫૩॥

ન બલે સદૃશો યેષાં બલ્લાલાસ્તે પ્રકીર્તિતાઃ ।
તેષાં સ્વામી ગણાધીશો બલ્લાલેશ ઇતિ સ્મૃતઃ ॥ ૫૪॥

ત્વમપિ વ્રતમુખ્યં તત્ કુરુષ્વ ભક્તિસંયુતઃ ।
ચાતુર્માસ્યભવં ચિત્રં બલ્લાલેશપરાયણઃ ॥ ૫૫॥

તેન યોગયુતઃ પૂર્ણઃ પ્રસાદેન ભવિષ્યસિ ।
બલ્લાલેશસ્ય વિપ્રેશ નાત્ર કાર્યા વિચારણા ॥ ૫૬॥

બલ્લાલેશ્વરમાહાત્મ્યં યઃ શૃણોતિ નરોત્તમઃ ।
પઠતિ સ મહાભોગાન્ ભુક્ત્વા બ્રહ્મમયો ભવેત્ ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ચાતુર્માસ્યમાહાત્મ્યે બલ્લાલેશ્વરવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૮.૩૯

## ૮.૪૦ ચાતુર્માસ્યવ્રતમાહાત્મ્યનિરુપણં નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
જાજલિસ્તં વિભાણ્ડં સ તતો દદૌ મહામનુમ્ ।
પઞ્ચાક્ષરં ગણેશસ્ય વિધિયુક્તં વિધાનવિત્ ॥ ૧॥

મન્ત્રં પ્રાપ્ય મહાભાગો જાજલેરાશ્રમે સ્થિતઃ ।
બલ્લાલેશં સમભ્યર્ચ્ય વ્રતં ચકાર ભક્તિતઃ ॥ ૨॥

ગાણેશપઞ્ચકં કૃત્વા ધ્યાનનિષ્ઠો બભૂવ હ ।
કાર્તિક્યાં પૂર્ણિમાયાં તુ યયૌ બલ્લાલનાયકઃ ॥ ૩॥

તં દૃષ્ટ્વા સહસોત્થાય વિભાણ્ડઃ પ્રણતોઽભવત્ ।
પૂજ્ય તુષ્ટાવ વિઘ્નેશં નાનાસ્તોત્રૈઃ સુહર્ષિતઃ ॥ ૪॥

તતઃ પ્રસન્નતાં યાતો બલ્લાલેશો મહામુને ।
યોગશાન્તિયુતં વિપ્રં કૃત્વાંઽતર્ધાનગોઽભવત્ ॥ ૫॥

તદાદિગાણપત્યશ્ચ વિભાણ્ડઃ પ્રબભૂવ હ ।
બલ્લાલેશપરો ભૂત્વા ચચાર મનસેરિતઃ ॥ ૬॥

વિભાણ્ડક ઉવાચ ।
કૃત્વૈવં યોગશાન્તિસ્થોઽભવં સર્વૈઃ સુવન્દિતઃ ।
બૃહદશ્વ કુરુષ્વ ત્વં વ્રતં ગાણેશ્વરં પરમ્ ॥ ૭॥

એવમુક્ત્વા દદૌ તસ્મૈ મુનિર્મન્ત્રં દશાક્ષરમ્ ।
ગણેશસ્ય મહાયોગી વિધિયુક્તં મહામુને ॥ ૮॥

તં પ્રણમ્ય યયૌ સ્થાનં સ્વકીયં બૃહદશ્વકઃ ।
ચાતુર્માસ્યવ્રતં ચક્રે ગાણેશપઞ્ચકે રતઃ ॥ ૯॥

બૃહદશ્વાય વિઘ્નેશો દદૌ યોગં સુશાન્તિદમ્ ।
ગણેશ્વરં સોઽપિ નિત્યમભજદ્ભક્તિસંયુતઃ ॥ ૧૦॥

અન્યાં ચ શ‍ृણુ વિપ્રેશ ચાતુર્માસ્યભવાં કથામ્ ।
વિભાણ્ડસ્ય ચ વીર્યં યત્ પતિતં ભૂમિમણ્ડલે ॥ ૧૧॥

તદ્ગૃહ્ય ચ વને સંસ્થા હરિણી તૃણસંયુતમ્ ।
(Page ખં. ૮ અ. ૪૦ પાન ૯૫)
અમોઘં તત્ક્ષણાત્ સાઽભૂદ્ગર્ભયુક્તા મહામુને ॥ ૧૨॥

તસ્યાં પુત્રોઽભવત્ સાક્ષાદ્બ્રહ્મતેજોયુતઃ પરઃ ।
લલાટે શ‍ृઙ્ગધારી સ ઋષ્યશ‍ृઙ્ગસ્તતઃ સ્મૃતઃ ॥ ૧૩॥

નારદેનાભ્યનુજ્ઞાતો વિભાણ્ડસ્તં સમાનયત્ ।
સ્વાશ્રમે સર્વસંસ્કારાન્ કારયામાસ વિપ્રપૈઃ ॥ ૧૪॥

કદા તમૃષ્યશ‍ृઙ્ગં સ લોમપાદો નૃપોત્તમઃ ।
અપ્સરોભિઃ સમાહૃત્ય સ્વપુરે ત્વાનયન્મુનિમ્ ॥ ૧૫॥

અનાવૃષ્ટિભવં દુઃખં જનાનાં વીક્ષ્ય ભૂમિપઃ ।
સ્વાત્મજાં પ્રદદૌ તસ્મૈ શાન્તાં ગુણયુતાં પરામ્ ॥ ૧૬॥

સદ્યો વૃષ્ટિઃ સમુત્પન્ના જનાનાં દુઃખનાશિની ।
શાન્તયા વિપ્રપો રેમે હર્ષનિર્ભરમાનસઃ ॥ ૧૭॥

કદા સ્વપિતરં વિપ્રો ભાર્યયા પ્રજગામ હ ।
નત્વા વિભાણ્ડં તત્રૈવ સંસ્થિતઃ સેવનોત્સુકઃ ॥ ૧૮॥

વિનયેન સમાયુક્તં પુત્રં દૃષ્ટ્વા તપોયુતમ્ ।
જગાદ તં મહાયોગી વિભાણ્ડઃ પ્રેમસંયુતઃ ॥ ૧૯॥

વિભાણ્ડ ઉવાચ ।
બ્રહ્મણિ બ્રહ્મભૂતો યો બ્રાહ્મણઃ પરિકીર્તિતઃ ।
અતસ્ત્વં પુત્ર ભાવેન ભવ બ્રાહ્મણ ઉત્તમઃ ॥ ૨૦॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રં ગણપતેઃ શુભમ્ ।
સવિધિં તં નમસ્કૃત્ય પુત્રત્વં સાધયત્ પરમ્ ॥ ૨૧॥

શાન્તયા ભાર્યયા સાર્ધં ચાતુર્માસ્યવ્રતે રતઃ ।
ગાણેશપઞ્ચકં સેવ્ય ધ્યાનનિષ્ઠો બભૂવ હ ॥ ૨૨॥

નિત્યં યોગપરો ભૂત્વા પ્રાર્થયદ્ગણનાયકમ્ ।
કુરુ યોગીન્દ્રવન્દ્યં માં સભાર્યં ગણનાયક ॥ ૨૩॥

વ્રતમાત્રેણ સન્તુષ્ટો ધ્યાનેન તપસા પ્રભુઃ ।
દદૌ યોગં ગણાધીશ ઋષ્યશ ृङ्ગાય ધીમતે ॥ ૨૪॥

તતઃ સ ભાર્યયા સાર્ધં ગાણપત્યો બભૂવ હ ।
શાન્તિયુક્તઃ સ્વભાવેનાઽભજદ્વિઘ્નેશ્વરં મુદા ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર લોમપાદો નૃપોત્તમઃ ।
આયયૌ પ્રાર્થયામાસ વિભાણ્ડં પ્રીતિસંયુતઃ ॥ ૨૬॥

ઋષ્યશ ृङ्ગં સુતાયુક્તં પ્રાર્થયિત્વા સમાનયત્ ।
સ્વપુરે તં સમાસ્થાપ્ય તદાજ્ઞાવશગોઽભવત્ ॥ ૨૭॥

નિત્યં સોઽપિ ગણાધીશમભજન્નૃપનાયકઃ ।
ઉપદિષ્ટઃ સ્વજામાત્રા ચાતુર્માસ્યપરાયણઃ ॥ ૨૮॥

અન્તે જગામ વિઘ્નેશં રાજા ધર્મભૃતાં વરઃ ।
એવં નાના જના વિપ્ર વ્રતેન સિદ્ધિમાયયુઃ ॥ ૨૯॥

તત્ર તેઽહં કતિ બ્રૂયાં વક્તું શક્તો ન સર્વદા ।
ચાતુર્માસ્યસમં મુખ્યં વ્રતં નૈવ વિનિશ્ચિતમ્ ॥ ૩૦॥

એકઃ કૈવર્તકઃ કોઽપિ નામ્ના નાદકરઃ સ્મૃતઃ ।
સ કદાચિત્ દ્વિજાન્ દૃષ્ટ્વા પ્રણતોઽભૂન્ મહામુને ॥ ૩૧॥

ચાતુર્માસ્યવ્રતે સંસ્થાન્ દૃષ્ટ્વા પપ્રચ્છ ભક્તિતઃ ।
કીદૃશં વ્રતમુખ્યં મે બ્રૂત વિપ્રેન્દ્રમુખ્યકાઃ ॥ ૩૨॥

તતસ્તે વિનતં દૃષ્ટ્વા કથયામાસુરાદરાત્ ।

વ્રતં ગાણેશ્વરં મુખ્યં સવિધિ મુનિસત્તમ ॥ ૩૩॥

શ્રુત્વાઽઽનમ્ય સ તાન્ વિપ્રાન્ યયૌ સ્વગૃહમાદરાત્ ।
ચાતુર્માસ્યવ્રતે સ્નાત્વા ચક્રે ગણેશદર્શનમ્ ॥ ૩૪॥

ભજનં ઘટિકામાત્રં તતઃ સ કાર્યકારકઃ ।
બભૂવ નિન્દયન્ દેહં ગણેશે ભક્તિવર્જિતમ્ ॥ ૩૫॥

તતઃ કદાચિન્ માર્ગસ્થં કાર્યાર્થં વનગોચરમ્ ।
તત્ર તં ભક્ષિતું યાતા વનસ્થા દશ રાક્ષસાઃ ॥ ૩૬॥

(Page ખં. ૮ અ. ૪૦ પાન ૯૬)
સ ગણેશં ભયોદ્વિગ્નઃ સસ્માર હૃદિ સર્વપમ્ ।
રાક્ષસાસ્તસ્ય સાન્નિધ્યમાજગ્મુર્ભક્ષણાર્થિનઃ ॥ ૩૭॥

દૃષ્ટ્વા સ જલમાદાય ગણેશાય નમો ઇતિ ।
મન્ત્રમુચ્ચાર્ય તાન્ દુષ્ટાન્ સિષેચ ભયસઙ્કુલઃ ॥ ૩૮॥

ગણેશનામમન્ત્રેણ મન્ત્રિતેન જલેન તે ।
સ્પૃષ્ટા જાતિસ્મરા જાતા રુરુદુસ્તં પ્રણમ્ય તુ ॥ ૩૯॥

ઊચુઃ પ્રાઞ્જલયો ભૂત્વા નાદકરં મહામુને ।
રાક્ષસા દુઃખસંયુક્તાસ્તં પ્રણમ્ય દયાયુતમ્ ॥ ૪૦॥

રાક્ષસા ઊચુઃ ।
વયં બ્રાહ્મણજાતિસ્થા પૂર્વજન્મનિ શૂદ્રજ ।
તત્રાચારવિહીનાશ્ચાભવામ સ્મ નિરન્તરમ્ ॥ ૪૧॥

યથેચ્છં વિષયે સક્તા મૃતા યમગૃહે ગતાઃ ।
યમેન વિવિધેષ્વેવ નિક્ષિપ્તા નરકેષુ ચ ॥ ૪૨॥

ભુક્ત્વા પાપભવં દુઃખં રાક્ષસા માનદાયક ।
જાતાઃ ક્ષુધાસમાવિષ્ટા શ્રમામો યત્ર તત્ર તુ ॥ ૪૩॥

દૈવયોગેન તે સાધો દર્શનં ભાગ્યગૌરવાત્ ।
પ્રાપ્તં તે જલપાતેન વયં જાતિસ્મરાઃ કૃતાઃ ॥ ૪૪॥

અધુના તારયાસ્માંસ્ત્વં શરણં ત્વાં સમાગતાન્ ।
દેહિ પુણ્યં મહાભાગ ગણેશકીર્તને ભવમ્ ॥ ૪૫॥

એવં તેષાં નાદકરો વચઃ શ્રુત્વા દયાયુતઃ ।

જ્ઞાત્વા માહાત્મ્યમુખ્યં તાનુવાચ નામસમ્ભવમ્ ॥ ૪૬॥

નાદકર ઉવાચ ।
ગણેશકીર્તનસ્યૈવ પુણ્યં વક્તું ન શક્યતે ।
કથિતં ગુરુભિઃ પૂર્વં બ્રાહ્મણૈસ્તત્ત્વકોવિદૈઃ ॥ ૪૭॥

અતો રાક્ષસજાતિસ્થા વચઃ શ‍ૃણુત મે હિતમ્ ।
ચાતુર્માસ્યે મયા નિત્યં કીર્તનં ક્રિયતે પરમ્ ॥ ૪૮॥

એકનામ્નો ભવં પુણ્યં દાસ્યામિ દયયા યુતઃ ।
ચાતુર્માસ્યે કૃતસ્યાપિ કીર્તનસ્ય ન સંશયઃ ॥ ૪૯॥

તેન બન્ધનહીનાશ્ચ ભવિષ્યથ વિચક્ષણાઃ ।
એવમુક્ત્વા દદૌ તેભ્યઃ પુણ્યં નામૈકસમ્ભવમ્ ॥ ૫૦॥

દત્તે પુણ્યે સમાયાતાસ્તત્ર ગાણેશદૂતકાઃ ।
તાન્ ગૃહ્ય નિજલોકં તેઽભવન્ ગતા મહામુને ॥ ૫૧॥

ગણેશ્વરં તત્ર દૃષ્ટ્વા બ્રહ્મભૂતા બભૂવિરે ।
એવં વ્રતસ્ય માહાત્મ્યં કથને નૈવ શક્યતે ॥ ૫૨॥

ચાતુર્માસ્યભવં ચિત્રં ચરિતં કથિતં મયા ।
સઙ્ક્ષેપેણ મહાવિપ્ર ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૫૩॥

શ‍ૃણુયાચ્છ્રાવયેદ્યસ્તુ પઠેદ્ભાવસમન્વિતઃ ।
સોઽપિ વ્રતફલં લબ્ધ્વા મનસેપ્સિતમાપ્નુયાત્ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ચાતુર્માસ્યવ્રતમાહાત્મ્યનિરૂપણં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૦
(Page ખં. ૮ અ. ૪૧ પાન ૯૭)

## ૮.૪૧ કૌણ્ડિણ્યબ્રહ્મસમાગમો નામૈકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ગણેશનામમાહાત્મ્યં વદ મે કરુણાનિધે ।
એકનામભવેનૈવ પુણ્યેન દશ ચોદ્ધૃતાઃ ॥ ૧॥

સૂત ઉવાચ ।

ગણેશનામમાહાત્મ્યં કથિતું કોઽર્હતિ પ્રભો ।
અપારં વેદવાદેષુ કથિતં વેદવાદિભિઃ ॥ ૨॥

અત્રેતિહાસકં વક્ષ્યે સર્વસિદ્ધિપ્રદં પરમ્ ।
શ્રવણાત્ પઠનાચ્ચાપિ નરેભ્યો નાત્ર સંશયઃ ॥ ૩॥

જરત્કારુરિતિ ખ્યાતો બ્રાહ્મણો બ્રહ્મવિત્તમઃ ।
અપારતપસા યુક્તઃ શાપાનુગ્રહકારકઃ ॥ ૪॥

તમાયયૌ મહાભાગઃ પુત્રસ્તસ્ય મહાત્મનઃ ।
આસ્તિકઃ પુણ્યશીલશ્ચ પ્રણનામ કૃતાઞ્જલિઃ ॥ ૫॥

સેવાયામુત્સુકસ્તત્રોવાસ હર્ષસમન્વિતઃ ।
યોગીન્દ્રં પિતરં સોઽપિ કદા જગાદ વિપ્રપ ॥ ૬॥

આસ્તિક ઉવાચ ।
જનમેજયયજ્ઞેઽહં રક્ષિત્વા પન્નગોત્તમાન્ ।
સમાયાતો મહાભાગ વન્દનાર્થં પદસ્ય તે ॥ ૭॥

તત્ર સર્પગણાનગ્નૌ મૃતાંશ્ચ ભૃશપીડિતાન્ ।
તાન્ દૃષ્ટ્વા ત્રાસસંયુક્તોઽભવં પરમપાવન ॥ ૮॥

સંસારં દુઃખદં વીક્ષ્ય તં નેચ્છામિ મહામુને ।
અતઃ સુશાન્તિદં માર્ગં વદ યોગપ્રદાયકમ્ ॥ ૯॥

એવં પુત્રવચઃ શ્રુત્વા હર્ષયુક્તો મહામુનિઃ ।
જરત્કારુર્જગાદેદં વચનં યોગભાવિતમ્ ॥ ૧૦॥

જરત્કારુરુવાચ ।
બ્રહ્મજ્ઞાનં વિના પુત્ર શાન્તિર્નૈવ પ્રલભ્યતે ।
નાનાબ્રહ્મસુ સંસ્થૈશ્ચાન્નપ્રાણાદિષુ માનદ ॥ ૧૧॥

શાન્તિભ્યઃ શાન્તિદં પૂર્ણં બ્રહ્મ વેદપ્રકાશકમ્ ।
બ્રહ્મણસ્પતિસંજ્ઞં તં ભજસ્વ વિધિસંયુતઃ ॥ ૧૨॥

શ્રુત્વા વિપ્રસ્તમાસ્તીકો જગાદ તપસા યુતઃ ।
કથં ગણેશ્વરં તાત શ્રેષ્ઠં વેદા બ્રુવન્તિ વૈ ॥ ૧૩॥

નામરૂપધરો ભૂત્વા બ્રહ્મણસ્પતિવાચકઃ ।
કથં બભૂવ દેવેશો વદ તસ્ય સ્વરૂપકમ્ ॥ ૧૪॥

જરત્કારુરુવાચ ।
સમૂહે ગણધાતુશ્ચ સમૂહા બ્રહ્મરૂપિણઃ ।
બાહ્યાન્તરૈકભાવાખ્યાસ્તેષાં સ્વામી ગણેશ્વરઃ ॥ ૧૫॥

સમ્પ્રજ્ઞાતમયો દેહોઽસમ્પ્રજ્ઞાતમયં શિરઃ ।
ગજરૂપં તયોર્યોગે દેહધારી ગજાનનઃ ॥ ૧૬॥

અજ્ઞાનસંયુતાન્યાદૌ ભૂતાનિ વિવિધાનિ તુ ।
તેભ્યો જ્ઞાનપ્રદાનાર્થં દેહધારી બભૂવ હ ॥ ૧૭॥

સ્વસંવેદ્યેન યોગેન દર્શનં તસ્ય જાયતે ।
યોગિનાં તેન વિઘ્નેશો નિજલોકનિવાસકૃત્ ॥ ૧૮॥

સિદ્ધિરૈશ્વર્યરૂપા સા ભ્રાન્તિદા સતતં મતા ।
બુદ્ધિર્ભ્રાન્તિધરા પ્રોક્તા પઞ્ચચિત્તસ્વરૂપિણી ॥ ૧૯॥

તયોઃ સ્વામી ગણાધીશઃ ખેલતે ચિત્તસિદ્ધિગઃ ।
માયાભ્યાં યોગરૂપોઽયં તદાકારઃ પરાત્પરઃ ॥ ૨૦॥

અત્ર તે કથયિષ્યામિ પુરાતનં મહાદ્ભુતમ્ ।
ઇતિહાસં ગણેશસ્ય નામમાહાત્મ્યસંયુતમ્ ॥ ૨૧॥

ત્વાં માતુર્જઠરે સંસ્થં પ્રત્યજ્યાહં તુ નિર્ગતઃ ।
યોગાર્થં યોગનિપુણં કૌણ્ડિણ્યં સઙ્ગતોઽભવમ્ ॥ ૨૨॥

સ્થાવરે નગરે સોઽપિ ગાણપત્યાગ્રણીર્મહાન્ ।
ચિન્તામણિં ગણેશાનમભજદ્ દૂર્વયા સદા ॥ ૨૩॥

માં દૃષ્ટ્વા હર્ષસંયુક્તો જગાદ સ્વાગતં મુને ।
જરત્કારો નિષીદ ત્વં તાપસોગ્ર મહામતે ॥ ૨૪॥

એવમાભાષ્ય માં વિપ્રઃ કૃત્વાઽઽતિથ્યં યથાવિધિ ।
પપ્રચ્છ કિં મહાવિપ્ર વદેચ્છસિ શુભપ્રદમ્ ॥ ૨૫॥

કૌણ્ડિણ્યસ્ય વચઃ શ્રુત્વા હર્ષિતોઽહં તમબ્રુવમ્ ।
તાત ભ્રમણસંયુક્તો ભ્રમામિ પૃથિવીતલે ॥ ૨૬॥

નાનાતપોયુતો નાથ ન શાન્તિમલભં કદા ।
તવાશ્રમમતો યાતો વદ શાન્તિં સુશાન્તિદ ॥ ૨૭॥

કૌડિણ્ય ઉવાચ ।

ગણેશં ભજ ભાવેન તદા શાન્તિમવાપ્સ્યસિ ।
નાન્યથા ત્વં જરત્કારો શ્રમયુક્તો ભવિષ્યસિ ॥ ૨૮॥

એવં તસ્ય વચઃ શ્રુત્વા પુનસ્તમહમબ્રુવમ્ ।
નામરૂપધરં દેવં કથં વદસિ શાન્તિદમ્ ॥ ૨૯॥

તતો મામબ્રવીત્ સોઽપિ દયાયુક્તઃ સ્વભાવતઃ ।
શ‍ૃણુ પુરા ભવં ચિત્રમિતિહાસં વદામ્યહમ્ ॥ ૩૦॥

અહં યોગાર્થમત્યન્તમક્લિશ્યં તપસા યુતઃ ।
નાવિન્દં તં તતો દેવં બ્રહ્માણં સઙ્ગતોઽભવમ્ ॥ ૩૧॥

તં પ્રણમ્ય મહાભાગં યોગશાન્તિપ્રદાયકમ્ ।
અહં યોગાર્થમત્યન્તમક્લિશ્યં તપસા યુતઃ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ગણેશં ભજ ભાવેન તતઃ શાન્તિમવાપ્સ્યસિ ।
ગચ્છ સ્થાવરસંજ્ઞે ત્વં પુરે ચિન્તામણિં ભજ ॥ ૩૩॥

ચઞ્ચલં ચિત્તમાખ્યાતં સ્થિરં યત્ર બભૂવ હ ।
તેન સ્થાવરસંજ્ઞં તત્ ક્ષેત્રં નામ્ના મયા કૃતમ્ ॥ ૩૪॥

પઞ્ચચિત્તપ્રકાશો મે તત્ર ચિન્તામણિઃ પ્રભુઃ ।
સ્થાપિતોઽભૂન્ મયા પૂર્વં સાક્ષાચ્છાન્તિપ્રદાયકઃ ॥ ૩૫॥

સૃષ્ટ્યાદૌ તપસા તત્ર મયા સંરાધિતોઽભવત્ ।
તસ્ય વરપ્રભાવેણ યોગિવન્દ્યોઽભવં મુદા ॥ ૩૬॥

એવં તસ્ય વચઃ શ્રુત્વા પુનસ્તમહમબ્રુવમ્ ।
નામરૂપધરો નાથ શાન્તિદઃ કથમઞ્જસા ॥ ૩૭॥

તતો મામબ્રવીદ્બ્રહ્મા હર્ષયુક્તેન ચેતસા ।
ગણાનાં પતિભાવેન સ્થિતોઽયં નામધારકઃ ॥ ૩૮॥

દેહો જગન્મયસ્તસ્ય ગજાખ્યં બ્રહ્મ મસ્તકમ્ ।
તયોર્યોગે સ્વરૂપસ્થો બભૂવ ભક્તકારણાત્ ॥ ૩૯॥

સ્વાનન્દો નગરં યસ્ય સિદ્ધિર્બુદ્ધિઃ પ્રિયે મતે ।
લક્ષલાભૌ સુતૌ પ્રોક્તૌ મૂષકો વાહનં તથા ॥ ૪૦॥

એવં નાનાવિધાનીહ બ્રહ્માકારાણિ તસ્ય વૈ ।

સુહૃદશ્ચ તતઃ પ્રોક્તો વેદેષુ બ્રહ્મણસ્પતિઃ ॥ ૪૧॥

માયામોહયુતાન્યાદૌ વિશ્વાનિ મુનિસત્તમ ।
બ્રહ્માણિ યોગદાનાર્થં તેભ્યો દેહધરોઽભવત્ ॥ ૪૨॥

સ્વેચ્છયા દેહધારી સ સ્વેચ્છયા માયયા યુતઃ ।
સ્વેચ્છયા યોગરૂપોઽયં વિનાયકસ્તતઃ સ્મૃતઃ ॥ ૪૩॥

નાસ્થિચર્માદિસંયુક્તો દેહસ્તસ્ય મહાત્મનઃ ।
તદ્વર્જિતો વૈ વિપ્રેશ યોગદેહધરોઽભવત્ ॥ ૪૪॥

અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
ભૃશુણ્ડિનોઽમરર્ષીણાં સંવાદસમ્ભવં મહાન્ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે કૌણ્ડિણ્યબ્રહ્મસમાગમો નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૧
(Page ખં. ૮ અ. ૪૨ પાન ૯૯)

## ૮.૪૨ ગણેશનામમાહાત્મ્યકથનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કૌણ્ડિણ્ય ઉવાચ ।
અહો ગણેશમાહાત્મ્યમદ્ભુતં સંશ્રુતં મયા ।
ભૃશુણ્ડિનો વદ ત્વત્તો દેવર્ષીણાં વચો મિથઃ ॥ ૧॥

બ્રહ્મોવાચ ।
એકદા મુનયઃ સર્વે તે વિચાર્ય પરસ્પરમ્ ।
સમાયયુર્વિધાતારં સંશયસ્યાપનુત્તયે ॥ ૨॥

પ્રણમ્ય લોકધાતારં જગુઃ સર્વે સુહર્ષિતાઃ ।
મુનયઃ કશ્યપાદ્યા માં દેવેન્દ્રૈર્મુનિમુખ્યકૈઃ ॥ ૩॥

દેવર્ષય ઊચુઃ ।
સર્વપૂજ્યો ગણેશોઽયં સર્વાદિપૂજ્ય એવ સઃ ।
નામરૂપધરો નિત્યો બ્રહ્મણસ્પતિવાચકઃ ॥ ૪॥

વેદેષુ કથિતં બ્રહ્મન્ બ્રહ્મ બ્રહ્મૈવ કેવલમ્ ।
તત્ર સાગુણ્યનૈર્ગુણ્યં વિદ્યતે ન કદાચન ॥ ૫॥

દેહધારી ગણેશાનો વેદેષુ બ્રહ્મણસ્પતિઃ ।
અતઃ સંશયસંયુક્તાઃ પ્રષ્ટું ત્વાં સમુપાગતાઃ ॥ ૬॥

ત્વં સાક્ષાદ્યોગિવન્દ્યશ્ચ સર્વેષાં પ્રપિતામહઃ ।
છિન્ધિ સંશયકં નાથાનુભવેન તદાત્મના ॥ ૭॥

બ્રહ્મોવાચ ।
તેષાં વચનમાકર્ણ્ય બ્રહ્મા ચિન્તાતુરોઽભવમ્ ।
ન કિઞ્ચિદવદં તત્ર મોહયુક્તોઽહમઞ્જસા ॥ ૮॥

સર્વૈસ્તૈઃ સંયુતો વેધા અગમં કેશવં પુરા ।
તં પ્રણમ્ય મહાભાગા હ્યપૃચ્છત્ સંશયં પરમ્ ॥ ૯॥

વિષ્ણુઃ ખેદસમાયુક્તો લેભે નૈવ તદુત્તરમ્ ।
તૈઃ સાર્ધં શઙ્કરં સોઽપિ જગામ જ્ઞાનસિદ્ધયે ॥ ૧૦॥

પ્રણમ્ય ગિરિજાનાથં જગાદ સંશયં પરમ્ ।
તચ્છ્રુત્વા શઙ્કરસ્તત્ર નિશ્ચયં કર્તુમક્ષમઃ ॥ ૧૧॥

શિવસ્તાન્ પ્રત્યુવાચેદં વચનં સુખદાયકમ્ ।
ભૃશુણ્ડિનં ચ સ્વગુરું ચિત્તે સ્મૃત્વા ગણેશ્વરમ્ ॥ ૧૨॥

શ્રીશિવ ઉવાચ ।
આદિમધ્યાવસાનેષુ ભૃશુણ્ડી મુનિપુઙ્ગવઃ ।
તિષ્ઠતિ સર્વભાવજ્ઞો ગુરુર્નો હિતકારકઃ ॥ ૧૩॥

ગણેશનામમાહાત્મ્યં સમ્પૂર્ણં કથયિષ્યતિ ।
જાનાતિ નાત્ર સન્દેહો નામ્ના સિદ્ધેશ્વરોઽભવત્ ॥ ૧૪॥

તતસ્તેન સમાયુક્તા જગ્મુર્દેવર્ષયો મુને ।
ભૃશુણ્ડિનં મહાભાગમમલાશ્રમસંસ્થિતમ્ ॥ ૧૫॥

તં પ્રણમ્ય મહાત્માનં સ્થિતાઃ સર્વે સુરર્ષયઃ ।
સ તાન્ પૂજ્ય જગાદેદં વચનં હિતકારકમ્ ॥ ૧૬॥

ભૃશુણ્ડ્યુવાચ ।
ધન્યં મે જન્મકર્માદિ યેન વો દર્શનં મહત્ ।
પ્રાપ્તં વદત વાક્યં માં કિમર્થમાગતાઃ પરાઃ ॥ ૧૭॥

સાક્ષાદ્ગણપતેઃ સર્વે વિભૂતિપદધારકાઃ ।

યૂયં ગણેશ સામાન્યાઃ પાવનાર્થં સમાગતાઃ ॥ ૧૮॥

ભૃશુણ્ડિવચનં શ્રુત્વા જગાદ શઙ્કરો વચઃ ।
પ્રણમ્ય તં મહાભાગં યોગીન્દ્રાણાં ગુરોર્ગુરુમ્ ॥ ૧૯॥

શ્રીશઙ્કર ઉવાચ ।
ગણેશસ્ય મહત્તત્ત્વં પરિપૂર્ણં મહામતે ।
ત્વં જાનાસિ ન સન્દેહઃ સાક્ષાચ્છુણ્ડાધરો ભવાન્ ॥ ૨૦॥

અતઃ સંશયસંયુક્તા વયં સર્વે સમાગતાઃ ।
તં તેઽહં શ ૃણુ વક્ષ્યામિ ભ્રાન્તિદાયકમુત્તમમ્ ॥ ૨૧॥

નામરૂપધરો નિત્યઃ કથં વિઘ્નેશ્વરોઽભવત્ ।
બ્રહ્મણસ્પતિસંજ્ઞસ્તુ વેદવાદેષુ યોગિપ ॥ ૨૨॥

તેષાં વચનમાકર્ણ્ય તાન્ જગાદ મહામુનિઃ ।
ભૃશુણ્ડી સર્વસારજ્ઞો ગાણપત્યાગ્રણીર્મહાન્ ॥ ૨૩॥

ભૃશુણ્ડ્યુવાચ ।
ગઃ શક્તિઃ સૂર્ય અઃ પ્રોક્તો ણો વિષ્ણુરઃ શિવઃ સ્મૃતઃ ।
તેષાં સ્વામી ગણેશાનસ્તેનાઽયં બ્રહ્મણસ્પતિઃ ॥ ૨૪॥

ગણાઃ સમૂહવાચ્યાશ્ચ બાહ્યાન્તરૈકભાવતઃ ।
તેષાં સ્વામી ગણેશાનસ્તેનાયં બ્રહ્મણસ્પતિઃ ॥ ૨૫॥

(Page ખં. ૮ અ. ૪૨ પાન ૧૦૦)
ગો બોધ અવિબોધસ્થો ણઃ સ્વાનન્દો નિવૃત્તિકૃત્ ।
તેષાં સ્વામી ગણેશાનસ્તેનાઽયં બ્રહ્મણસ્પતિઃ ॥ ૨૬॥

વિશ્વાનિ ગ પ્રસૂતાનિ બ્રહ્માણિ ણ ગતાનિ તુ ।
તેષાં સ્વામી ગણેશાનસ્તેનાઽયં બ્રહ્મણસ્પતિઃ ॥ ૨૭॥

એવં નાનાર્થસંયુક્તં નામ તસ્ય મહાત્મનઃ ।
તેષ્વર્થાન્ દેવવિપ્રાદ્યાઃ કતિ બ્રૂયાં ન શક્યતે ॥ ૨૮॥

ચિત્તરૂપા મહામાયા પઞ્ચધા પરિકીર્તિતા ।
સા બુદ્ધિર્ભ્રાન્તિદા તત્ર સિદ્ધિર્માયા પરા સ્મૃતા ॥ ૨૯॥

તાભ્યાં નાનાવિધાન્યાદૌ ચકાર ખેલનાર્થતઃ ।
વિશ્વાનિ મોહયુક્તાનિ બ્રહ્માણિ બ્રહ્મણસ્પતિઃ ॥ ૩૦॥

તેષાં મોહવિનાશાર્થં યોગદાનાર્થમાદરાત્ ।
નામરૂપધરો જાતો ગણેશો ગણવલ્લભઃ ॥ ૩૧॥

અર્થસત્તાસમાયુક્તં નામ તસ્ય સુરર્ષયઃ ।
કથં નાશવિનાશાદિ ભેદાસ્તત્ર ભવન્ત્યતઃ ॥ ૩૨॥

અથ રૂપં પ્રવક્ષ્યામિ ગણેશસ્ય સુખપ્રદમ્ ।
યેન સંશયહીનાસ્તં ભજિષ્યથ નિરન્તરમ્ ॥ ૩૩॥

સમષ્ટિવ્યષ્ટિરૂપાખ્યે કુમ્ભસ્થલે મહાત્મનઃ ।
ત્રયી ત્રિનેત્રરૂપા તુ શુણ્ડા તુરીયવાચકા ॥ ૩૪॥

ધર્માધર્મૌ ગણેશસ્યાધરૌ બિન્દુર્ગલાકૃતિઃ ।
દેહી દન્તઃ સદૈકસ્તુ બોધો જઠરવાચકઃ ॥ ૩૫॥

સાઙ્ખ્યં કર્ણાત્મકં તસ્ય હસ્તાશ્ચ ત્વર્થવાચકાઃ ।
માયામાયિકરૂપૌ વૈ પાદૌ ગણપતેઃ સ્મૃતૌ ॥ ૩૬॥

એષાં સંયોગરૂપાખ્યો દેહસ્તસ્ય સુરર્ષયઃ ।
સ્વસંવેદ્યાત્મકઃ પ્રોક્તો યોગિભિસ્તત્ત્વદર્શિભિઃ ॥ ૩૭॥

અભિમાનેન શૂન્યત્વાદેષામયોગવાચકઃ ।
દેહો દેહધરસ્યાઽપિ ગણેશસ્ય વિચક્ષણાઃ ॥ ૩૮॥

સંયોગાયોગયોર્યોગે દેહધારી ગજાનનઃ ।
બભૂવ યોગદાનાર્થં જગદ્ભ્યો બ્રહ્મભ્યઃ પર ॥ ૩૯॥

વિશ્વં કણ્ઠાદધસ્તસ્ય શિરો બ્રહ્મ ગજાત્મકમ્ ।
તયોર્યોગે ગણેશાનો દેહધારી બભૂવ ચ ॥ ૪૦॥

એવં નાનાર્થભાવેન ધ્યાયન્તે યોગિનોઽમલાઃ ।
દેહં ગણપતેઃ પ્રાજ્ઞા માયામોહવિવર્જિતાઃ ॥ ૪૧॥

શબ્દાર્થસત્તયા યુક્તં વપુસ્તસ્ય વિરાજતિ ।
નાશાનાશાદિભાવૈશ્ચ વર્જિતં તન્મયં તથા ॥ ૪૨॥

એતત્ સર્વં સમાખ્યાતં નામરૂપરહસ્યકમ્ ।
ગણેશસ્ય મહાભાગા યથા મુદ્ગલભાષિતમ્ ॥ ૪૩॥

ગણેશેતિ સકૃજ્જપ્ત્વા બ્રહ્મભૂતો ભવેન્નરઃ ।
દ્વિવારં ચેદ્ગણેશાનઃ તસ્યર્ણી નાઽત્ર સંશયઃ ॥ ૪૪॥

ગણેશેતિ સકૃજ્જપ્ત્વા યસ્તિષ્ઠતિ નરોત્તમઃ ।
જગદ્બ્રહ્મયુતસ્તેન સંસ્મૃતો ગણનાયકઃ ॥ ૪૫॥

અતો ગણેશનામ્નશ્ચ સ્મરણં ન કરોતિ યઃ ।
સ દુરાત્મા પરિત્યાજ્યશ્ચાણ્ડાલાનાં શિરોમણિઃ ॥ ૪૬॥

ગણેશનમનં કૃત્વા નરસ્તિષ્ઠતિ યો ભુવિ ।
તેન નાનાવિધં વિશ્વં બ્રહ્મ સન્નમિતં ભવેત્ ॥ ૪૭॥

ગણેશરૂપં સન્ધ્યાને ધૃતં યેન મહાત્મના ।
જગદ્બ્રહ્મયુતો યોગો ધ્યાતસ્તેન ન સંશયઃ ॥ ૪૮॥

ગણેશમૂર્તિરૂપં તુ દૃષ્ટં યેન સુરર્ષયઃ ।
નાનાબ્રહ્મ તથા વિશ્વં દૃષ્ટં સોઽપિ ગજાનનઃ ॥ ૪૯॥

અનન્તાનિ મહાભાગા વિશ્વાનિ બ્રહ્મકાણિ તુ ।
તેષાં તુ પૂજનં કેન ભવેદાનન્ત્યભાવતઃ ॥ ૫૦॥

તતઃ સુલભભાવાર્થં તેષાં યોગમયઃ પ્રભુઃ ।
નામરૂપધરો ઢુણ્ઢિર્બભૂવ ભક્તિલાલસઃ ॥ ૫૧॥

(Page ખં. ૮ અ. ૪૩ પાન ૧૦૧)
તસ્ય પૂજાદિભાવેન પૂજિતં સર્વમઞ્જસા ।
જગદ્બ્રહ્મ ન સન્દેહો વિવિધં શાન્તિરૂપકમ્ ॥ ૫૨॥

ઇદં સર્વં સમાખ્યાતં રહસ્યં ગણપસ્ય ચ ।
નામરૂપાત્મકં પૂર્ણં સઙ્ક્ષેપેણ સુરર્ષયઃ ॥ ૫૩॥

ભજધ્વં તં વિશેષેણ સર્વસંશયવર્જિતાઃ ।
તેનૈવ કૃતકૃત્યાશ્ચ ભવિષ્યથ સુરર્ષયઃ ॥ ૫૪॥

એવમુક્ત્વા મહાયોગી વિરરામ મહામુને ।
ભૃશુણ્ડી સર્વસારજ્ઞો ગજાનન ઇવાપરઃ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ગણેશનામમાહાત્મ્યકથનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૨

# ૮.૪૩ ચતુર્થીરહસ્યવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવર્ષય ઊચુઃ ।
એતાદૃશં ગણેશસ્ય માહાત્મ્યં મુનિસત્તમ ।
દર્શનસ્મરણાદ્યં તુ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

જના ગણેશ્વરસ્યૈવં દર્શનં નામકીર્તનમ્ ।
સકૃત્ કુર્વન્તિ વિપ્રેશાઽથ વાઽધિકં ન સંશયઃ ॥ ૨॥

તે સર્વે સુખસંયુક્તા ભુક્ત્વા ભોગાન્ મનોગતાન્ ।
બ્રહ્મભૂતા ન જાયન્તે વદ તત્રાપિ કારણમ્ ॥ ૩॥

ભૃશુણ્ડ્યુવાચ ।
અવિશ્વાસેન તેષાં તુ ફલમર્ધં ગતં ભવેત્ ।
અભક્ત્યા પાદસમ્ભૂતં દમ્ભેન ત્રિપદં તથા ॥ ૪॥

અતઃ સમ્પૂર્ણભાવેન ફલહીના જનાઃ કિલ ।
ન પ્રાપ્નુવન્તિ પુણ્યં તે સર્વશાસ્ત્રપ્રકીર્તિતમ્ ॥ ૫॥

અન્યચ્ચ શૃણુત પ્રાજ્ઞાઃ પુણ્યં પાપં સમં મતમ્ ।
બલેન તેજસા ભાવૈઃ શાસ્ત્રેષ્વત્ર ન સંશયઃ ॥ ૬॥

યથા ગણેશનામ્નશ્ચ કીર્તને પુણ્યમુત્તમમ્ ।
તથા નિન્દાદિજં પાપમતુલં જાયતે કિલ ॥ ૭॥

યથા જના ભજન્તે તં બાહ્યભાવપરાયણાઃ ।
તથા તે તસ્ય નિન્દાં વૈ કુર્વતે પશ્યત પ્રિયાઃ ॥ ૮॥

અન્યચ્ચ કથયિષ્યામિ સંશયસ્યાપનુત્તયે ।
ઉલ્લઙ્ઘનાદિજં પાપં માનાચ્છતગુણં ભવેત્ ॥ ૯॥

જ્ઞાત્વા ગણેશ્વરં સર્વે કુર્વન્ત્યુલ્લઙ્ઘનં સદા ।
તેન ભોગવિહીનાસ્તે ગચ્છન્તિ નરકે કિલ ॥ ૧૦॥

નાનાવિઘ્નસમાયુક્તા જન્મજન્મસુ તે જનાઃ ।
ભવન્તિ નાઽત્ર સન્દેહો ગણેશોલ્લઙ્ઘનેન ચ ॥ ૧૧॥

ગણેશમાનજં પુણ્યં સ્વલ્પં કિં સુખદં ભવેત્ ।
ઉલ્લઙ્ઘનબલેનૈવ હતં મન્દમિવ પ્રિયાઃ ॥ ૧૨॥

યથા વિસ્મૃતિભાવેન વિસ્મૃતો ગણનાયકઃ ।
વિઘ્નેર્યજ્ઞે ભવન્ સર્વે જલરૂપાઃ સુરાસ્તથા ॥ ૧૩॥

મહાતપોયુતાભિશ્ચ સ્ત્રીભિર્દેવાઃ પુનઃ કૃતાઃ ।
સ્વલ્પોલ્લઙ્ઘનજં પાપં પશ્યધ્વં તુ સુરર્ષયઃ ॥ ૧૪॥

અતો દુઃખયુતા લોકા ગણેશસ્મરણાદિભિઃ ।
ગચ્છન્તિ નરકે યુક્તાઃ ગણેશોલ્લઙ્ઘનાદિભિઃ ॥ ૧૫॥

અન્યચ્ચ કથયિષ્યામિ કર્મ શાસ્ત્રે પ્રકીર્તિતમ્ ।
પ્રત્યવાયાકુલં સર્વં સર્વત્ર વિવિધં પુરા ॥ ૧૬॥

પ્રત્યવાયમનાદૃત્ય કર્મ કુર્વન્તિ માનવાઃ ।
તે સર્વે સકલં પુણ્યં પ્રાપ્નુવન્તિ ન નિશ્ચિતમ્ ॥ ૧૭॥

ઇત્યાદિ બહવો ભેદાઃ કૃતાઃ વિઘ્નેશ્વરેણ ચ ।
અખણ્ડક્રીડનાર્થં કથયિતું નૈવ શક્યતે ॥ ૧૮॥

અપારમહિમાયુક્તં માહાત્મ્યં ગણપસ્ય ચ ।
તસ્ય ખણ્ડનભાવાર્થં નિન્દાદિકં ચકાર સઃ ॥ ૧૯॥

અતો ગણપતિં દેવા ભજધ્વં યત્નસંયુતાઃ ।
મુનયસ્તેન સમ્પૂર્ણં ગણપં પરમાપ્સ્યથ ॥ ૨૦॥

સુરર્ષય ઊચુઃ ।
ગણેશો યોગરૂપોઽયં કથં પુમ્ભાવમાશ્રિતઃ ।
એકદેશમયં યોગિન્ વદ તસ્ય ચરિત્રકમ્ ॥ ૨૧॥

ભૃશુણ્ડ્યુવાચ ।
યથા બ્રહ્મ મહાભાગા નપુંસકપ્રવાચકમ્ ।
સ્ત્રીપુમ્ભાવવિહીનં તદેકમાર્ગપરં મતમ્ ॥ ૨૨॥

સ્ત્રીપુન્નપુંસકં સર્વં ત્રિવિધં ત્રયવાચકમ્ ।
આત્મા તુરીયસંજ્ઞશ્ચ પુંવાચકસ્ત્રિવર્જિતઃ ॥ ૨૩॥

જનાનાં કથને વેદાસ્તં વદન્તિ ગજાનનમ્ ।
એકમાર્ગાશ્રિતં સર્વં કથને નાભવન્ ક્ષમાઃ ॥ ૨૪॥

અતોઽયં ગણનાથસ્તૈઃ પુમ્ભાવાત્મક ઉચ્યતે ।

યથા યોગાદિકાઃ શબ્દાસ્તથા દેવાદયો મતાઃ ॥ ૨૫॥

વામાઙ્ગં પ્રાકૃતં રૂપં સિદ્ધિસ્તસ્ય મહાત્મનઃ ।
દક્ષિણાઙ્ગં મહાભાગા બુદ્ધિઃ પુરુષવાચિકા ॥ ૨૬॥

તયોર્યોગે ગણેશાનો યોગાકારો ન સંશયઃ ।
પુમ્ભાવાદિયુતોઽયં ન તેભ્યઃ સંવર્જિતો ન ચ ॥ ૨૭॥

દેવર્ષય ઊચુઃ ।
ચતુર્થી ગણનાથસ્ય પ્રિયાઽત્યન્તં તિથિઃ પરા ।
કથં રિક્તા તુ સા પ્રોક્તા વિવાહાદૌ વિવર્જિતા ॥ ૨૮॥

સાક્ષાન્ મઙ્ગલમૂર્તેશ્ચ તિથિર્મઙ્ગલદાયિકા ।
સર્વદા રિક્તભાવેન કથં યુક્તા બભૂવ સા ॥ ૨૯॥

ભૃશુણ્ડ્યુવાચ ।
પક્ષયોરુભયોઃ સંસ્થા ચતુર્થી ગણપપ્રિયા ।
વ્રતાનામાદિભૂતા વૈ ગણેશપ્રાપ્તિકારિકા ॥ ૩૦॥

વ્રતં ચતુઃપ્રદં પૂર્ણં સર્વસિદ્ધિપ્રદાયકમ્ ।
નિત્યવન્ માનવૈઃ સર્વૈઃ કર્તવ્યં ચાદિરૂપકમ્ ॥ ૩૧॥

તદા ચતુઃ પદાર્થાસ્તૈર્લભ્યન્તે નાઽત્ર સંશયઃ ।
નો ચેત્ કર્મ કૃતં સર્વં નિષ્ફલં જાયતે નરૈઃ ॥ ૩૨॥

અતઃ સા સમ્મતા સદ્ભિઃ સર્વકાર્યેષુ દેવપાઃ ।
વ્રતભઙ્ગો ન કર્તવ્યો નાનાકાર્યપરૈરપિ ॥ ૩૩॥

વિવાહાદિષુ કાર્યેષુ ભોજનં ક્રિયતે જનૈઃ ।
નાનાવિષયસઙ્ગશ્ચ વ્રતં તત્ર કુતો ભવેત્ ॥ ૩૪॥

અતઃ સંશયહીનાસ્તાં ભજન્તે વ્રતમાર્ગતઃ ।
મઙ્ગલાયતનાં પૂર્ણાં ચતુર્થી સર્વસિદ્ધિદામ્ ॥ ૩૫॥

જન્મમૃત્યુયુતૈલોકૈઃ પૂરિતં સકલં જગત્ ॥ ૩૬॥

ચતુર્થી વ્રતકર્તારો જન્મમૃત્યુવિવર્જિતાઃ ।
ત્યક્ત્વા કર્મફલં કર્મ ગચ્છન્તિ નિજલોકકમ્ ॥ ૩૭॥

સર્વસઙ્કટહીનાસ્તે ભુક્ત્વા ભોગાન્ મનેપ્સિતાન્ ।
બ્રહ્મભૂતા ભવન્ત્યેવ ચતુર્થીવ્રતકારકાઃ ॥ ૩૮॥

વ્રતમાત્રેણ રિક્તં સ કુરુતે વિશ્વમઞ્જસા ।
તેન રિક્તા સમાખ્યાતા ચતુર્થી નાઽત્ર સંશયઃ ॥ ૩૯॥

વિશ્વં ત્યક્ત્વા ગણેશાનં ગચ્છન્તિ વ્રતકારિણઃ ।
તેન રિક્તં જગત્ સર્વં ભવતે મુનયોઽમરાઃ ॥ ૪૦॥

નાન્યતિથિસમા દેવી મતા રિક્તા ચતુર્થિકા ।
બ્રહ્મભૂયપ્રદાતૃત્વાત્ સર્વેભ્યઃ સુખદાયિકા ॥ ૪૧॥

એતત્ સર્વં સમાખ્યાતં ગણેશસ્ય મહાત્મનઃ ।
રહસ્યં વ્રતમુખ્યસ્ય કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ચતુર્થીરહસ્યવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૩
(Page ખં. ૮ અ. ૪૪ પાન ૧૦૩)

## ૮.૪૪ જરત્કારુમન્ત્રોપદેશવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવર્ષય ઊચુઃ ।
બ્રહ્મ નાનાવિધં પ્રોક્તં ક્રમાર્થં પ્રાપ્તિહેતવે ।
ગણેશસ્ય ન સન્દેહઃ પાત્રભેદપ્રભાવતઃ ॥ ૧॥

અગ્નીન્દ્રકાદયઃ સર્વે બ્રહ્મશબ્દપ્રયાચકાઃ ।
પુરાણેષુ મહાભાગ તેભ્યો બ્રહ્માદયોઽભવન્ ॥ ૨॥

પિતામહઃ સમાખ્યાતો બ્રહ્મા તેભ્યો મુને કથમ્ ।
બભૂવ શમ્ભુમુખ્યાશ્ચાભવન્ વેદ મહામતે ॥ ૩॥

ઇતિ તેષાં વચઃ શ્રુત્વા હર્ષિતો મુનિસત્તમઃ ।
ભૃશુણ્ડી પ્રત્યુવાચેદં વાક્યં સંશયનાશનમ્ ॥ ૪॥

ભૃશુણ્ડ્યુવાચ ।
તત્ત્વરૂપા સમાખ્યાતા બ્રહ્માકારા ન સંશયઃ ।
બ્રહ્માદયઃ સમુત્પન્ના દેવાસ્તેભ્યઃ સુરર્ષયઃ ॥ ૫॥

અશ્વિનૌ નાસિકાયાશ્ચ દેવૌ સર્વત્ર સંસ્થિતૌ ।

બ્રહ્માકારેણ તાભ્યાં તુ પૃથ્વીતત્ત્વં વિનિઃસૃતમ્ ॥ ૬॥

પ્રકૃતિર્ભૂમિરાખ્યાતા ગન્ધઃ પુરુષ ઉચ્યતે ।
તયોર્યોગેઽશ્વિનૌ દેવૌ બ્રહ્માકારૌ મતૌ બુધૈઃ ॥ ૭॥

પૃથ્વીતત્ત્વમયો દેહસ્ત્રિગુણાત્મશરીરિણામ્ ।
બ્રહ્માદીનાં ચ તાભ્યાં સ નિઃસૃતો નાઽત્ર સંશયઃ ॥ ૮॥

વિરાડ્રૂપં પૃથિવ્યાસ્તુ તાભ્યાં જાતં ન સંશયઃ ।
પ્રણવો પૃથિવીદેહસ્તથા જાતઃ સુરર્ષયઃ ॥ ૯॥

અનેન વિધિના બ્રહ્મા કથ્યતે શાસ્ત્રવેદિભિઃ ।
તસ્માદ્વિશ્વં સમુદ્ભૂતં તત્ર ચિત્રં ન વિદ્યતે ॥ ૧૦॥

નરોઽશ્વિનૌ સમારાધ્ય જિત્વા પૃથ્વીભવં ભ્રમમ્ ।
પુનઃ સ જલતત્ત્વાર્થં વરુણં ભજતે પરમ્ ॥ ૧૧॥

તદાઽશ્વિનૌ પ્રનષ્ટૌ ચ દૃષ્ટૌ તેન મહાત્મના ।
મુખ્યં વારુણકં બ્રહ્મ તસ્માજ્જાતમિદં જગત્ ॥ ૧૨॥

એવં પરમ્પરા માર્ગા બ્રહ્મરૂપા મતાઃ પરે ।
ઇન્દ્રાદ્યાસ્તત્ત્વરૂપસ્થાસ્તત્વૈઃ સમ્ભાવયન્તિ તે ॥ ૧૩॥

શિવાદિદેહરૂપેષુ સંસ્થિતાસ્તત્ત્વધારકાઃ ।
દેવા ઇન્દ્રમુખાસ્તેન તદાધારાઃ શિવાદયઃ ॥ ૧૪॥

ગૌણમાર્ગેણ દેવેશાઃ શમ્ભ્વાદયો બભૂવિરે ।
ઇન્દ્રાદિભ્યો ન સન્દેહો ન મુખ્યં તત્પ્રકીર્તિતમ્ ॥ ૧૫॥

મુખ્યભાવેન દેવેન્દ્રા ઇન્દ્રાદયઃ સમુદ્ભવાઃ ।
શિવાદિભ્યશ્ચ સમ્પૂર્ણકલાભિર્નાત્ર સંશયઃ ॥ ૧૬॥

એવમુક્ત્વા મહાયોગી ભૃશુણ્ડી વિરરામ હ ।
દેવર્ષયઃ પ્રણેમુસ્તં જગુર્હર્ષસમન્વિતાઃ ॥ ૧૭॥

દેવર્ષય ઊચુઃ ।
સર્વસંશયહીનાશ્ચ કૃતા વયં મહામુને ।
ત્વયા ન ચિત્રમેવેદં ગણેશાકારરૂપિણા ॥ ૧૮॥

દેવર્ષયસ્તતઃ સ્વસ્વસ્થલં જગ્મુઃ સુહર્ષિતાઃ ।
સંશયેન વિહીનાસ્તેઽભજન્નિત્યં ગણેશ્વરમ્ ॥ ૧૯॥

બ્રહ્મોવાચ ।
એતત્તે કથિતં વત્સ રહસ્યં શાન્તિદાયકમ્ ।
તસ્માત્ત્વં ગણનાથં તં ભજ શાન્તિમવાપ્સ્યસિ ॥ ૨૦॥

એવમુક્ત્વા દદૌ તસ્મૈ બ્રહ્મા મન્ત્રં ષડક્ષરમ્ ।
વિધિયુક્તં ગણેશસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૧॥

કૌણ્ડિણ્ય ઉવાચ ।
તતો બ્રહ્માણમાનમ્યાગમં ચિન્તામણિં મુદા ।
તપોયોગેન વિઘ્નેશં મન્ત્રેણારાધયન્ પરમ્ ॥ ૨૨॥

ગતે વર્ષશતે દેવઃ પ્રસન્નો વરદોઽભવત્ ।
આયયૌ માં વરં દાતું સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૨૩॥

તં દૃષ્ટ્વા સહસોત્થાયાઽઽપૂજ્યાઽઽનમ્ય ગજાનનમ્ ।
સ્તૌમિ હર્ષેણ સંયુક્તઃ કૌથુમેન મહામુને ॥ ૨૪॥

તતો મે વાઞ્છિતં દત્વા યોગં યોગપતિ સ્વયમ્ ।
જગામ સ્વસ્થલં વિપ્રાહં ખિન્ન ઇવ સંસ્થિતઃ ॥ ૨૫॥

(Page ખં. ૮ અ. ૪૪ પાન ૧૦૪)
તદાદિ ગાણપત્યોઽહં જાતઃ સમ્પૂર્ણભાવતઃ ।
અભજં તં વિશેષેણ પત્ન્યા ચિન્તામણિં સદા ॥ ૨૬॥

પ્રિયાં ગણેશસ્યાત્યન્તં દૂર્વાં જ્ઞાત્વા મહામુને ।
દૂર્વાભિરયુતેનાઽપૂજયં તં નિત્યમાદરાત્ ॥ ૨૭॥

મદીયસહગત્વેન કિઞ્ચિચ્છ્રુદ્ધાઽબ્રવીદ્વચઃ ।
આશ્રયા માં કિમર્થં ત્વં તૃણાનુષ્ઠાનતત્પરઃ ॥ ૨૮॥

ભાર્યાયા વચનં શ્રુત્વા સંશયેન સમન્વિતમ્ ।
તસ્યૈ ગણેશ્વરે ભક્તિદાનાર્થં ત્વબ્રવં વચઃ ॥ ૨૯॥

દૂર્વાર્પણેન વિઘ્નેશઃ સન્તુષ્ટો જાયતે પરે ।
ન તથા દ્રવ્યકાદ્યૈશ્ચ વસ્ત્રૈર્નૈવેદ્યમુખ્યકૈઃ ॥ ૩૦॥

વિના દૂર્વાં નિરાહારો તિષ્ઠતિ ગણનાયકઃ ।
નિષ્ફલા જાયતે પૂજા કૃતા નાનાવિધા કિલ ॥ ૩૧॥

એકદૂર્વાઙ્કુરં ભક્ત્યા ફલં કેન ન ગણ્યતે ।
સમર્પયેદ્ગણેશાય તસ્માત્તં દૂર્વયાઽર્ચયેત્ ॥ ૩૨॥

તતસ્તસ્યા હૃદિ સંસ્થઃ સંશયો ન જગામ હ ।
એકદૂર્વાઙ્કુરં ગૃહ્યાઽઽદદાં તસ્યૈ હિતાય ચ ॥ ૩૩॥

અવદં ગચ્છ દેવેશં દેવેન્દ્રં દૂર્વયા સમમ્ ।
સુવર્ણં દેહિ વિઘ્નેશ પૂજાયાં સ્થિતયા પ્રભો ॥ ૩૪॥

પ્રિયેન ન્યૂનમધિકં ત્વયા ગ્રાહ્યં કદાચન ।
તથેતિ નમ્ય માં સા વૈ જગામ દેવનાયકમ્ ॥ ૩૫॥

તેન સમ્પૂજિતા દેવી જગાદ મે વચો હિતમ્ ।
સ ઇન્દ્રો હર્ષસંયુક્તસ્તથા ચકાર વિપ્રપ ॥ ૩૬॥

ત્રૈલોક્યં ઘટમધ્યે સ સમારોપ્ય ક્રમેણ ચ ।
તથાપિ દૂર્વયા તુલ્યં ન બભૂવ મહામુને ॥ ૩૭॥

દૃષ્ટ્વાઽતિખેદસંયુક્તઃ સસ્માર પઞ્ચ દેવપાન્ ।
તેઽપિ સ્વપુરસંયુક્તા જગ્મુઃ કાર્યપ્રસિદ્ધયે ॥ ૩૮॥

સર્વે સગ્રામસસ્ત્રીકાઃ શિવવિષ્ણુમુખાઽમરાઃ ।
ઘટે સ્થિતાસ્તથા તેઽપિ દૂર્વયા નાભવન્ સમાઃ ॥ ૩૯॥

તતસ્તૈર્માયયા સર્વં બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ।
ઘટે ક્ષિપ્તં તથા તન્ન દૂર્વયા ચ સમં કદા ॥ ૪૦॥

દૃષ્ટ્વા તે ભયસંયુક્તા મમ શાપાચ્ચ વિપ્રપ ।
આયયુશ્ચાશ્રયાયુક્તા આશ્રમે મે સુદુઃખિનઃ ॥ ૪૧॥

પ્રણમ્ય માં વિધિસ્તત્ર સર્વૈર્જગાદ શોકતઃ ।
દાસાસ્તે મુનિશાર્દૂલ દૂર્વાપુણ્યેન વૈ કૃતાઃ ॥ ૪૨॥

એકદૂર્વાસમં નૈવ બ્રહ્માણ્ડં ભવતિ પ્રભો ।
ગણેશપૂજને ક્ષિપ્તા ત્વયા કૌણ્ડિણ્યસત્તમ ॥ ૪૩॥

એકદૂર્વાઙ્કુરાજ્જાતં ફલં ચિન્તામણિઃ સ્વયમ્ ।
દાસ્યતિ તે મહાભાગ ન વયં તત્સમા યતઃ ॥ ૪૪॥

આજ્ઞાપય કરિષ્યામો દાસાસ્તે કાર્યમુત્તમમ્ ।
નિત્યં કાર્યકરાન્ સ્વામિન્ પાલયસ્વ સુરેશ્વરાન્ ॥ ૪૫॥

તેષાં વચનમાકર્ણ્ય તાન્ પૂજ્ય પ્રાબ્રવં વચઃ ।
વિધે સર્વૈઃ સમાયુક્તો ગચ્છ ત્વં સ્વપદં પ્રભો ॥ ૪૬॥

નાહં દૂર્વાફલે સક્તો ભાર્યાબોધાર્થમઞ્જસા ।
કૃતં મયા મહાદેવા દાસોઽહં ક્ષમ્યતામિતિ ॥ ૪૭॥

તતસ્તે સર્વદેવેશા યયુઃ સ્વસ્વપદં મુદા ।
ભાર્યા મે શ્રદ્ધયા યુક્તા ગાણપત્યાઽભવત્ સદા ॥ ૪૮॥

સ્ત્રિયા નિત્યં મહાભાગ ભજામિ ગણનાયકમ્ ।
ચિત્તસ્થિરકૃતે ક્ષેત્રે સ્થિતં ચિન્તામણિં મુદા ॥ ૪૯॥

અતસ્ત્વમપિ વિપ્રેશ શાન્તિમિચ્છસિ ચેત્તદા ।
(Page ખં. ૮ અ. ૪૫ પાન ૧૦૫)
ભજ વિઘ્નેશ્વરં તેન યોગિવન્દ્યો ભવિષ્યસિ ॥ ૫૦॥

એવમુક્ત્વા દદૌ મહ્યં મન્ત્રં ગણપતેઃ પરમ્ ।
ષડક્ષરં વિધાનેન પુત્ર સર્વાર્થદાયકમ્ ॥ ૫૧॥

તં પ્રણમ્ય મહાભાગમપૃચ્છં વિનયાન્વિતઃ ।
યોગપ્રાપ્ત્યર્થમત્યન્તં વચનં સંશયાત્મકમ્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે જરત્કારુમન્ત્રોપદેશવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૪

## ૮.૪૫ જરત્કારુયોગપ્રાપ્તિવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

જરત્કારુરુવાચ ।
બ્રહ્મ નાનાવિધં વેદેષુ પ્રોક્તં વેદવાદિભિઃ ।
અન્નપ્રાણાદિભેદૈશ્ચ સંયુક્તં ક્રમસિદ્ધયે ॥ ૧॥

મનોમયં બ્રહ્મ તેષુ મનઃ કોશપ્રકાશકમ્ ।
ન મુખ્યં તન્ મહાભાગ સૂક્ષ્મં સ્વપ્નવિકારજમ્ ॥ ૨॥

મનોબુદ્ધિરહઙ્કારશ્ચિત્તં ચતુર્વિધં પરમ્ ।
અન્તઃકરણમિત્યુક્તં શાસ્ત્રેષુ મુનિસત્તમૈઃ ॥ ૩॥

ચિત્તમત્ર સમાખ્યાતં તત્ર ચિન્તામણિઃ સ્થિતઃ ।
ચિત્તપ્રકાશકત્વાદ્વૈ મનો બ્રહ્મ કલાત્મકઃ ॥ ૪॥

પ્રાણો મનશ્ચ વિજ્ઞાનં ત્રિવિધં સ્વપ્નમુચ્યતે ।
તેષ્વેકદેશતઃ સોઽપિ બ્રહ્માકારો ગજાનનઃ ॥ ૫॥

કથં શાન્તિપ્રદં તત્ત્વં વદસિ બ્રહ્મણસ્પતિમ્ ।
વેદેષુ કથિતં વિપ્ર કથં તન્નૈવ બુધ્યતે ॥ ૬॥

કૌણ્ડિણ્ય ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વિપ્ર સર્વેષાં હિતકારકમ્ ।
કથયામિ મહાપ્રીત્યા પ્રણમ્ય ગણનાયકમ્ ॥ ૭॥

સાઙ્ખ્યયોગાદિભેદસ્થૈર્માર્ગા નાનાવિધાઃ સ્મૃતાઃ ।
પદાર્થશોધનાર્થં તે જ્ઞાતવ્યા વેદવાદતઃ ॥ ૮॥

અન્નપ્રાણાદિકાઃ શબ્દા બ્રહ્મણો વાચકા મતાઃ ।
તત્ર ચિત્તં સમાખ્યાતમન્તઃકરણગં પરમ્ ॥ ૯॥

એકભાગાશ્રિતં ચિત્તં મનો બ્રહ્મણિ સંસ્થિતમ્ ।
પદાર્થશોધનાખ્યે તદ્વિધૌ જાનીહિ માનદ ॥ ૧૦॥

કુત્ર વેદવિવાદેષુ મનસઃ પરમા મતા ।
બુદ્ધિસ્તસ્યાઃ પરં બ્રહ્મ શાન્તિદં સર્વસમ્મતમ્ ॥ ૧૧॥

અન્તઃકરણગા બુદ્ધિરેકદેશપ્રભાવતઃ ।
ન મુખ્યા સા સમાખ્યાતા તદ્વચ્ચિત્તં મતં બુધૈઃ ॥ ૧૨॥

અત્રાન્યં બોધદં માર્ગં વદામિ વેદગં પરમ્ ।
સમાહિતમના વિપ્ર શ◌ૃણુ સંશયનાશનમ્ ॥ ૧૩॥

દેહઃ ક્રિયાત્મકઃ પ્રોક્તો મનો બોધાત્મકં મતમ્ ।
તયોર્યોગે સ્વયં બુદ્ધિર્મોહદા દ્વન્દ્વધારિકા ॥ ૧૪॥

ગણેશોપાસનેનૈવ દ્વન્દ્વદુઃખહરા ભવેત્ ।
બ્રહ્માકારાત્મયોગેન બુદ્ધિર્બુદ્ધિમતાં પરા ॥ ૧૫॥

તતઃ પરં સ્વયં લીના જાયતે ગણપે પરે ।
તદા શાન્તિયુતો જન્તુર્બ્રહ્મભૂતો ભવેત્ સ્વયમ્ ॥ ૧૬॥

અહં ગણેશરૂપશ્ચેત્તદા મે દેહજો ભ્રમઃ ।

કુત્ર મનોમયો મોહો વિવેકદાયકઃ પરઃ ॥ ૧૭॥

તયોર્યોગે યોગમયઃ કુત્ર મે સમ્ભવેદ્ભ્રમઃ ।
દ્વન્દ્વભાવયુતઃ સોઽપિ દ્વન્દ્વસંવર્જિતઃ સ્મૃતઃ ॥ ૧૮॥

(Page ખં. ૮ અ. ૪૫ પાન ૧૦૬)
એવં જ્ઞાત્વા મહાયોગી શાન્તિં સંલભતે પરામ્ ।
ગણેશે ગણનાથોઽયં ભવતે મુનિસત્તમ ॥ ૧૯॥

અનેન વિધિના વિદ્ધિ ચિત્તં બુદ્ધિમયં પરમ્ ।
તત્ર ચિન્તામણિં જ્ઞાત્વા બ્રહ્મભૂતો નરો ભવેત્ ॥ ૨૦॥

અન્યચ્ચ શ‍ૃણુ વિપ્રેશ મનો વિવેકધારકમ્ ।
વિવેકાદભિમાનશ્ચોત્પદ્યતે વિવિધેષુ વૈ ॥ ૨૧॥

અતો બુધૈરહઙ્કારો મનોમય ઉદાહૃતઃ ।
કથિતં વેદવાદેષુ મતા બુદ્ધિર્મનઃ પરા ॥ ૨૨॥

બુદ્ધિર્જ્ઞાનાત્મિકા પ્રોક્તા સૈવ દ્વેધાઽભવન્ મુદા ।
જડા દેહે ક્રિયામૂલા ચૈતન્યદા મનોમયી ॥ ૨૩॥

વૃદ્ધિક્ષયાદિકં જ્ઞાનં સદા દેહે પ્રતિષ્ઠિતમ્ ।
તદેવ બુદ્ધિજં વિદ્ધિ જરત્કારો સુયોગતઃ ॥ ૨૪॥

દેહાત્મનિ વિવેકાખ્યં જ્ઞાનં મનસિ સંસ્થિતમ્ ।
બુદ્ધિજં ક્ષયવૃદ્ધ્યાદિહીનં ચૈતન્યધારકમ્ ॥ ૨૫॥

તયોર્યોગે સ્વયં બુદ્ધિર્જ્ઞાનરૂપા યયોઃ પરા ।
બ્રહ્માહમિતિ શબ્દાખ્યા મનોવાણીવિવર્જિતા ॥ ૨૬॥

બુદ્ધિરૂપં મહચ્ચિત્તં જાનીહિ તત્સ્વરૂપકમ્ ।
કથયામ્યધુના પ્રીત્યા સર્વસંશયનાશનમ્ ॥ ૨૭॥

ચિત્તં પ્રકાશકં પ્રોક્તં પ્રકાશો બુદ્ધિગો મતઃ ।
અતઃ ચિન્તામણિઃ પ્રોક્તો બુદ્ધીશો ગણનાયકઃ ॥ ૨૮॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં ક્ષિપ્તં મૂઢં મહામુને ।
વિક્ષિપ્તં મુનિભિર્મુખ્યૈરેકાગ્રં ચ નિરોધકમ્ ॥ ૨૯॥

દેહદેહિમયં ચિત્તમેકાગ્રં શાસ્ત્રસમ્મતમ્ ।
મનઃ સ્વપ્નમયં બ્રહ્મ દેહરૂપં વિચારય ॥ ૩૦॥

અતો મનોમયં ચિત્તં મા જાનીહિ મહત્પરમ્ ।
પ્રકાશકારકં ચિત્તં સર્વશાસ્ત્રેષુ સમ્મતમ્ ॥ ૩૧॥

સંયોગાઽયોગગં ચિત્તં નિરોધવાચકં મતમ્ ।
નાનાબ્રહ્માણિ ચૈકાગ્રનિરોધમયગાનિ તુ ॥ ૩૨॥

દેહદેહિપ્રકાશત્વાદેકાગ્રં ચિત્તમુચ્યતે ।
સંયોગાયોગકાશત્વાન્નિરોધં ચિત્તમઞ્જસા ॥ ૩૩॥

ઇતિ સર્વં સમાખ્યાતં ભજ ત્વં ગણનાયકમ્ ।
તેન યોગીન્દ્રવન્દ્યો વૈ ભવિષ્યસિ સુશાન્તિગઃ ॥ ૩૪॥

જરત્કારુરુવાચ ।
એવમુક્ત્વા મહાયોગી કૌણ્ડિણ્યો વિરરામ હ ।
જરત્કારુઃ પ્રણમ્યૈવાગમં તં હર્ષસંયુતઃ ॥ ૩૫॥

સાધયિત્વા મહાયોગં ગાણપત્યોઽભવં સુત ।
ગણનાથં ત્વમપિ તં ભજ શાન્ત્યર્થમાદરાત્ ॥ ૩૬॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી જરત્કારુર્મહામુને ।
વિરરામ પુનસ્તં ચાસ્તીક ઊચે વિશેષવિત્ ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે જરત્કારુયોગપ્રાપ્તિવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૫
(Page ખં. ૮ અ. ૪૬ પાન ૧૦૭)

## ૮.૪૬ બ્રાહ્મણસ્પત્યયજ્ઞમાહાત્મ્યવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આસ્તીક ઉવાચ ।
બાલ્યાત્પ્રભૃતિ શૈવોઽહં પિતસ્તં ત્યજ્ય વિઘ્નપમ્ ।
કથં ભજામિ વિપ્રેશ અતઃ શૈવં વદસ્વ મામ્ ॥ ૧॥

જરત્કારુરુવાચ ।
ત્યક્ત્વા ગણેશં શાન્તિસ્થો ન કોઽપિ સુત સમ્ભવેત્ ।

ગણેશાનં શમ્ભુમુખા ધ્યાત્વા શાન્તિયુતા બભુઃ ॥ ૨॥

શિવવિષ્ણ્વાદિ ભાવેષુ બ્રહ્મશબ્દઃ પ્રકીર્તિતઃ ।
એકાંશેન ગણેશસ્ય વેદેષુ વેદવાદિભિઃ ॥ ૩॥

તેષુ યોગં સમારાધ્ય શાન્તિં પ્રાપ્તાઃ સુયોગિનઃ ।
સા શાન્તિઃ સ્વલ્પભાવાખ્યા ન મુખ્યા યોગિનાં મતે ॥ ૪॥

શાન્તિભ્યઃ શાન્તિદઃ પ્રોક્તો ગણેશો બ્રહ્મણસ્પતિઃ ।
તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૫॥

ગણેશો માયયા યુક્તઃ પઞ્ચધા પરિકીર્તિતઃ ।
પઞ્ચભેદવિહીનઃ સ નિર્માયિક ઉદાહૃતઃ ॥ ૬॥

માયાયુક્તવિહીનત્વં ભ્રાન્તિમાત્રં પ્રકીર્તિતમ્ ।
તયોર્યોગે ગણેશાનઃ શાન્તિરૂપો ન સંશયઃ ॥ ૭॥

અતો ગણેશરૂપાદ્વૈ શિવો ભિન્નઃ પ્રકીર્તિતઃ ।
ત્યજાજ્ઞાનભવં દુઃખમભેદં ગણપં ભજ ॥ ૮॥

અત્ર તે કથયિષ્યામિ સંવાદં શઙ્કરસ્ય ચ ।
ઉપમન્યોર્મહાભાગ સર્વશાન્તિપ્રદાયકમ્ ॥ ૯॥

મહાપાશુપતો વિપ્ર ઉપમન્યુર્મહાયશાઃ ।
સહજં શઙ્કરં બ્રહ્મ જ્ઞાત્વા ખેદયુતોઽભવત્ ॥ ૧૦॥

જગામ શઙ્કરં વિપ્રસ્તં પ્રણમ્ય પુપૂજ હ ।
સ્તુત્વા નમ્ય જગાદાથ કૃતાઞ્જલિર્મહામુનિઃ ॥ ૧૧॥

ઉપમન્યુરુવાચ ।
સહજં શાઙ્કરં બ્રહ્મ સ્વાધીનં દોષસંયુતમ્ ।
સ્વાધીનં ચ પરાધીનં નૈવ બ્રહ્મણિ વિદ્યતે ॥ ૧૨॥

બ્રહ્મભૂયકરં યોગં વદ શૈવ સદાશિવ ।
યેનાહં શિવતાં પ્રાપ્ય શાન્તિસ્થસ્તં ભજે સદા ॥ ૧૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા હર્ષયુક્તઃ સદાશિવઃ ।
ઉવાચ તં મહાભાગં યોગં ગાણેશસંજ્ઞકમ્ ॥ ૧૪॥

શિવ ઉવાચ ।
એકદા કાશીસંસ્થં મામુવાચ મુનિસત્તમઃ ।

જૈગીષવ્યો યથા ત્વં વૈ તથા પાશુપતાગ્રણીઃ ॥ ૧૫॥

જૈગીષવ્ય ઉવાચ ।
શિવઃ સહજસંજ્ઞસ્થો બ્રહ્મણિ સહજં કથમ્ ।
અતઃ શૈવં પરં યોગં વદ મે શાન્તિદાયકમ્ ॥ ૧૬॥

વિશ્વનાથ ઉવાચ ।
ગણેશં ભજ ભાવેન તદા શાન્તિમવાપ્સ્યસિ ।
ઢુણ્ઢયિત્વા મયા યોગાત્ હૃતો ઢુણ્ઢિઃ હૃદિ સ્થિતઃ ॥ ૧૭॥

મમ શ્રુત્વા વચો રમ્યં દુઃખિતો મામુવાચ હ ।
જૈગીષવ્યો વચો વિપ્ર તદહં કથયામિ તે ॥ ૧૮॥

જૈગીષવ્ય ઉવાચ ।
ત્યક્ત્વા વિશ્વેશ્વરં દેવં ભજામ્યન્યં ન વિશ્વપ ।
અશાન્તિશાન્તિદો વાઽપિ શિવો મે પરમા ગતિઃ ॥ ૧૯॥

વિશ્વનાથ ઉવાચ ।
અસચ્છક્તિશ્ચ સદ્ભાનુઃ સમો હરિરહં શિવઃ ।
અવ્યક્તશ્ચ ચતુર્ણાં વૈ યોગે સ્વાનન્દ ઉચ્યતે ॥ ૨૦॥

સ એવ ગણનાથોઽયં માયયા પઞ્ચધા બભૌ ।
માયાહીનો હ્યયોગાખ્યઃ પઞ્ચભિર્વર્જિતો મતઃ ॥ ૨૧॥

તયોર્યોગે ગણાધીશઃ શાન્તિદઃ પૂર્ણવાચકઃ ।
અતોઽયં બ્રહ્મણાં નાથો વયં બ્રહ્મપ્રવાચકાઃ ॥ ૨૨॥

ખેલનાદ્ગણનાથોઽયમસ્મદ્રૂપધરોઽભવત્ ।
કલયા તત્ર કિં ભિન્નં મન્યસે મુનિસત્તમ ॥ ૨૩॥

ભેદબુદ્ધિં પરિત્યજ્ય ભજ વિઘ્નેશમાદરાત્ ।
ન ભિન્નઃ શઙ્કરસ્તસ્માત્તદ્રૂપં તં વિભાવય ॥ ૨૪॥

(Page ખં. ૮ અ. ૪૬ પાન ૧૦૮)
એવમુક્ત્વાઽદદાત્તસ્મૈ મન્ત્રમેકાક્ષરં તતઃ ।
સવિધિં ગણનાથસ્ય તતો ધ્યાનપ્રસિદ્ધયે ॥ ૨૫॥

સાધયિત્વા યથાન્યાયં યોગં ગાણેશસંજ્ઞિતમ્ ।
તતો યજ્ઞં સમારેભે બ્રાહ્મણસ્પત્યસંજ્ઞકમ્ ॥ ૨૬॥

કૃત્વા યજ્ઞં મુદાયુક્તો દ્વિજાન્નત્વા વિસૃજ્ય સઃ ।
સંસ્થિતસ્તત્ર વિઘ્નેશઃ પ્રયયૌ વરદાયકઃ ॥ ૨૭॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ પુપૂજ હ ।
પુનઃ પ્રણમ્ય તુષ્ટાવ યજુઃસ્તોત્રેણ વિઘ્નપમ્ ॥ ૨૮॥

યોગશાન્તિં પ્રદત્વાઽસૌ જૈગીષવ્યાય ધીમતે ।
આચાર્યતાં તુ યોગસ્ય સ્વયમન્તર્દધે વિભુઃ ॥ ૨૯॥

તતો ગુરું શિવં સોઽપિ ઢુણ્ઢિરાજં તુ દૈવતમ્ ।
ગાણપત્યસ્વભાવેનાભજત્કાશીસ્થિતો મુનિઃ ॥ ૩૦॥

અતસ્ત્વં ગણનાથં તં ભજ શાન્તિપ્રસિદ્ધયે ।
શાન્તિભ્યઃ શાન્તિદઃ પ્રોક્તઃ સર્વેષાં યોગધારકઃ ॥ ૩૧॥

જરત્કારુરુવાચ ।
એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં પરમ્ ।
વિધિયુક્તં ગણેશસ્ય સ્વશિષ્યાયોપમન્યવે ॥ ૩૨॥

તં પ્રણમ્ય યયૌ સોઽપિ મન્ત્રધ્યાનપરોઽભવત્ ।
ઇષ્ટિં કૃત્વા ગણેશસ્ય શાન્તિરૂપો બભૂવ હ ॥ ૩૩॥

ગણરાજસ્તુતમપિ યયૌ ભક્તં મહામુનિમ્ ।
દત્વા શાન્તિં સ્તુતસ્તેનાંઽતર્દધે બ્રહ્મનાયકઃ ॥ ૩૪॥

અતસ્ત્વં સંશયં ત્યક્ત્વા ભજ વિઘ્નપતિં સુત ।
વ્યભિચારો ન તે ભાવી શાન્તિયુક્તો ભવિષ્યસિ ॥ ૩૫॥

સૂત ઉવાચ ।
એવમુક્ત્વા દદૌ તસ્મૈ સ્વમન્ત્રં તુ ષડક્ષરમ્ ।
વિધિયુક્તં ગણેશસ્યાસ્તીકાય મુનિસત્તમઃ ॥ ૩૬॥

આસ્તીકઃ સાધયામાસ ધ્યાત્વા હૃદિ ગજાનનમ્ ।
ઇષ્ટિં કૃત્વા ગણેશસ્ય શાન્તિયુક્તો બભૂવ હ ॥ ૩૭॥

ગાણપત્યપ્રિયોઽત્યન્તં માતરં સ જગામ હ ।
ઉપદિશ્ય ગણેશાનં શાન્તિયુક્તાં ચકાર તામ્ ॥ ૩૮॥

અતો ગણપતિં નિત્યમભજત્ પ્રીતિસંયુતઃ ।
અન્તે ગાણેશ્વરે ધામ્નિ બ્રહ્મૈવ સ બભૂવ હ ॥ ૩૯॥

એતત્તે કથિતં સર્વં બ્રાહ્મણસ્પત્યયજ્ઞજમ્ ।
માહાત્મ્યં ગાણપત્યાનાં પ્રિયં સઙ્ક્ષેપતો મયા ॥ ૪૦॥

યઃ શૃણોતિ નરો ભક્ત્યા પઠતે તસ્ય સિદ્ધિદમ્ ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪૧॥

બ્રાહ્મણસ્પત્યયજ્ઞસ્થં પુણ્યં સ લભતે પરમ્ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે બ્રાહ્મણસ્પત્યયજ્ઞમાહાત્મ્યવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૬
(Page ખં. ૮ અ. ૪૭ પાન ૧૦૯)

## ૮.૪૭ ત્રિવિધજગદાધારનિરૂપણં નામ સપ્તચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
કથં દશહરા દેવી દશમી ચાશ્વિનેઽભવત્ ।
કથં તત્ર શમીપૂજાં કુર્વન્તિ દેવતાદયઃ ॥ ૧॥

સૂત ઉવાચ ।
શઙ્ખં હત્વા મહાવીરં વિષ્ણુઃ પરપુરઞ્જયઃ ।
દદૌ વેદાન્ વિધાત્રે સ સાઙ્ગોપાઙ્ગસમન્વિતાન્ ॥ ૨॥

તાન્ દૃષ્ટ્વા હર્ષિતો બ્રહ્મા સસ્માર ગણનાયકમ્ ।
તતો ગણેશ્વરં વેદા યયુઃ સૃષ્ટાશ્ચ તેન યે ॥ ૩॥

પુરા કપિલરૂપેણ કર્મસિદ્ધ્યર્થનિર્મિતાઃ ।
હૃતેષુ વેદશાસ્ત્રેષુ શઙ્ખેન પાપરૂપિણા ॥ ૪॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં બ્રહ્મા તુષ્ટાવ વિઘ્નપમ્ ।
પ્રાર્થયામાસ વેદાનાં નિર્વિઘ્નાર્થં મહામુને ॥ ૫॥

તતસ્તં પ્રત્યુવાચૈવાકાશવાણી મહાદ્ભુતા ।
સર્વૈર્વિધે શમીં પૂજ્ય વિઘ્નહીનો ભવિષ્યસિ ॥ ૬॥

યા શમી સ ગણેશાનો ન ભેદસ્તત્ર વર્તતે ।
અદ્યૈવ તાં મહાભાગ પૂજયસ્વ વિધાનતઃ ॥ ૭॥

તતો વેદાન્ સમાસ્પૃશ્ય પ્રશસ્તાન્ કુરુ માનદ ।
એવમુક્ત્વા ખવાણીસ્થો વિરરામ ગજાનનઃ ॥ ૮॥

શ્રુત્વાઽતિહર્ષિતો બ્રહ્મા વેદૈર્દેવૈઃ સહેશ્વરૈઃ ।
મુનિભિસ્તાં પ્રપૂજ્યૈવ વેદાન્ શસ્તાન્ન્ ચકાર હ ॥ ૯॥

યસ્મિન્ કાલે મહાવિપ્ર પૂજિતા વિધિના શમી ।
આશ્વિની દશમી તત્ર સાયાહ્ને સા બભૂવ હ ॥ ૧૦॥

તતો દશહરા જાતા સા શમીસંયુતા તિથિઃ ।
તદર્થં શ઼ૃણુ ભાવેન સર્વકાર્યેષુ સિદ્ધિદામ્ ॥ ૧૧॥

દશ દિક્ષુ સ્થિતાન્યેવ ભૂતાનિ ભયદાનિ ચ ।
કાર્યધ્વંસં પ્રકુર્વન્તિ ક્રૂરાણિ પ્રબલાનિ ચ ॥ ૧૨॥

દશમી હન્તિ સા તાનિ શમી પૂજાબલેન વૈ ।
અતો દશહરા પ્રોક્તા સર્વકાર્યપ્રસિદ્ધયે ॥ ૧૩॥

શમીપૂજાવિધિં કૃત્વા સાયાહ્ને તાનલોકયત્ ।
સાઙ્ગોપાઙ્ગયુતાન્ વેદાંસ્તતઃ સર્વાનુપાદિશત્ ॥ ૧૪॥

નાનાકાર્યપ્રસિદ્ધ્યર્થં દશમ્યાં શમીપૂજનમ્ ।
શુક્લાશ્વિન્યાં ચ સાયાહ્ને કર્તવ્યં સર્વજન્તુભિઃ ॥ ૧૫॥

તેન વિઘ્નવિહીનાસ્તે દશદિક્ષુ ભ્રમન્તિ ચેત્ ।
સર્વસિદ્ધિયુતાઃ સર્વે ભવન્તિ નાત્ર સંશયઃ ॥ ૧૬॥

દશદિક્ષુ સ્થિતાન્ હન્તિ વિઘ્નાન્ દશહરા મતા ।
અદ્ય પ્રભૃતિ દેવેશા મુનયો વાર્ષિકી ભવા ॥ ૧૭॥

પૂજયિષ્યન્તિ દેવેશા શમીં કાર્યપ્રવર્ધિનીમ્ ।
વાર્ષિકં દુઃખમુત્સૃજ્ય સ્થાસ્યન્તિ સુખભોગિનઃ ॥ ૧૮॥

પૂજયિત્વા શમીં વિપ્રા વેદાન્ યે પુસ્તકસ્થિતાન્ ।
પઠિષ્યન્તિ પુરાણાદીંસ્તેષાં જ્ઞાનં ભવિષ્યતિ ॥ ૧૯॥

ન યો દશહરાયાં તુ શમીં પૂજયતે કદા ।
સ નાના વિઘ્નસંયુક્તો નરકેંઽતે પ્રગચ્છતિ ॥ ૨૦॥

એવમુક્ત્વા સ્વયં બ્રહ્મા જગામ વેદસંયુતઃ ।
સ્વલોકં શઙ્કરાદ્યાશ્ચ જગ્મુર્વિપ્રાઃ સુરા મુને ॥ ૨૧॥

તદાદિ ચાશ્વિની શુક્લા દશહરા બભૂવ હ ।
દશમી શમીસંયુક્તા સર્વાર્થે સિદ્ધિદાયિની ॥ ૨૨॥

અતોઽવશ્યં સ્વભાવેન પૂજયન્તિ શમીં નરાઃ ।
દેવા નાગાસ્તથા વેદાન્ પઠન્તે પાઠયન્ત્યપિ ॥ ૨૩॥

ઇદં સર્વં સમાખ્યાતં ચરિતં શમીસમ્ભવમ્ ।
યઃ શ‍ૃણોતિ નરઃ સોઽપિ લભતે પઠતીપ્સિતમ્ ॥ ૨૪॥

શૌનક ઉવાચ ।
કિમાધારમિદં સર્વં વર્તતે સૂત તદ્વદ ।
કર્માધીનં વદન્ત્યેવ કેચિદત્ર મુનીશ્વરાઃ ॥ ૨૫॥

ઈશ્વરાધીનમેતદ્વૈ કેચિચ્ચેદં યદૃચ્છયા ।
ત્રિવિધં તેષુ કિં સત્યં જ્ઞાયતે ન મુનીશ્વરૈઃ ॥ ૨૬॥

સૂત ઉવાચ ।
ત્રિવિધં પ્રવદન્ત્યેવ મુનયો બ્રહ્મવેદિનઃ ।
તત્સર્વં સત્યરૂપં ત્વં જાનીહિ મુનિસત્તમ ॥ ૨૭॥

ગણેશેન કૃતં સર્વં ક્રીડાર્થં સ્વેચ્છયા મુને ।
તત્ર માયા સમાખ્યાતા સિદ્ધિરૈશ્વર્યદાયિની ॥ ૨૮॥

ઐશ્વર્યમોહધરા સા બુદ્ધિર્માયિક ઉચ્યતે ।
માયાભોગાર્થમત્યન્તમતઃ શ્રમયુતોઽભવત્ ॥ ૨૯॥

માયામાયિકયોગાત્ સ ગણેશો બ્રહ્મનાયકઃ ।
ક્રીડતિ સ્વસ્વભાવેનાનન્યભાવપરાયણઃ ॥ ૩૦॥

ન કોઽપિ તત્ર વિઘ્નેશપ્રેરકસ્તત્ર વિદ્યતે ।
અતો યદૃચ્છયા સર્વં વર્તતે યોગિનાં હૃદિ ॥ ૩૧॥

અન્યચ્ચ શ‍ૃણુ વિપ્રેશ માયા નાનાભ્રમાત્મિકા ।
સા જડા સર્વભાવેન કર્તું નૈવ ક્ષમાઽભવત્ ॥ ૩૨॥

તયા સમ્મોહિતોઽત્યન્તં માયિકસ્તાં ચચાલ હ ।
તદા સત્તાયુતા માયા ખેલતે વિવિધે રતા ॥ ૩૩॥

માયિકેન ધૃતા દેવી ચચાલ વિવિધાત્મિકા ।

માયિકેચ્છાવશેનૈવ સંસ્થિતા નાઽત્ર સંશયઃ ॥ ૩૪॥

યદા ત્યક્તા મહામાયા માયિકેન મહામુને ।
તદા શક્તા ન કિઞ્ચિત્ સા કર્તું જડપ્રભાવતઃ ॥ ૩૫॥

ઈશ્વરાધીનભાવેન વર્તતે સર્વમઞ્જસા ।
વદન્તિ મુનયઃ કેચિત્ ધ્યાનમાર્ગપરાયણાઃ ॥ ૩૬॥

અન્યચ્ચ કથયિષ્યામિ માયા કર્મસ્વરૂપિણી ।
નાનાભાવયુતા નિત્યં ખેલતિ ત્રિવિધા પરા ॥ ૩૭॥

કર્માકર્મવિકર્માણ્યચાલયત્ સર્વરૂપિણી ।
સ્વર્ગમુક્તિમહાવીચિદાયિની ત્રિવિધે રતા ॥ ૩૮॥

યાદૃશં કુરુતે કર્મ ફલં ભોક્ષ્યતિ તાદૃશમ્ ।
કર્માધીનમિદં સર્વં વર્તતે ત્રિવિધં કિલ ॥ ૩૯॥

શુભાશુભં કૃતં કર્મ ભોક્તવ્યં નાત્ર સંશયઃ ।
કલ્પકોટિશતૈર્વાઽપિ કૃતં કર્મ ન તં ત્યજેત્ ॥ ૪૦॥

એવં વદન્તિ વિપ્રેશ બ્રાહ્મણા દેહવાદિનઃ ।
ધારણાયાં સ્થિતાસ્તે વૈ સત્યં શાસ્ત્રેષુ નિશ્ચિતમ્ ॥ ૪૧॥

અથૈકભાવનાં વક્ષ્યે ત્રયાણાં શ‍ૃણુ શૌનક ।
ગણેશમાયયા ભ્રાન્તા ન જાનન્તિ કુયોગિનઃ ॥ ૪૨॥

માયામાયિકરૂપેણ સંસ્થિતો ગણનાયકઃ ।
ક્રીડતિ સ્વસ્વભાવેનાનન્યભાવપરાયણઃ ॥ ૪૩॥

તસ્યેચ્છયા મહાવિપ્ર ઈશ્વરશ્ચૈવ તિષ્ઠતિ ।
મોહિતો ગણનાથેન જાનાતિ ન ગજાનનમ્ ॥ ૪૪॥

અહં શ્રેષ્ઠઃ પરં બ્રહ્મ મદાધારમિદં જગત્ ।
મદિચ્છયા પ્રવર્તન્તે જન્તવો નાઽત્ર સંશયઃ ॥ ૪૫॥

યાદૃશી ગણનાથસ્યેચ્છા ભવેત્તાદૃશં સ્વયમ્ ।
કરોતીશ્વર આનન્દાદતો ભેદો ન દૃશ્યતે ॥ ૪૬॥

કર્મરૂપા મહામાયા ગણેશેચ્છાસમન્વિતા ।
ચલતે તં ન જ્ઞાનાતિ મોહિતા ભ્રાન્તિસંયુતા ॥ ૪૭॥

અહં શ્રેષ્ઠા ન સન્દેહો મદાધારમિદં જગત્ ।
સકલં કર્મભાવેન ધારયામિ ચરાચરમ્ ॥ ૪૮॥

યાદૃશી ગણનાથસ્યેચ્છા ભવેત્તાદૃશં સ્વયમ્ ।
કર્મ કુર્વન્તિ વિપ્રેશ ચરાચરાત્મજીવિનઃ ॥ ૪૯॥

અતસ્ત્રિવિધકં વિપ્ર એકલક્ષાશ્રિતં મતમ્ ।
એવં બાધવિહીનં તત્ત્રિધા સંવર્તતે સદા ॥ ૫૦॥

માયાવાદિન એવં તત્ કર્માધીનં વદન્તિ હિ ।
અદ્વૈતવાદિનઃ સર્વે ઈશ્વરાધીનગં તથા ॥ ૫૧॥

યોગિનઃ પ્રવદન્ત્યેતદ્યદૃચ્છાધીનગં જગત્ ।
એવં સત્યં પ્રમાણેન ત્રિવિધં મુનિસત્તમ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ત્રિવિધજગદાધારનિરૂપણં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૭
(Page ખં. ૮ અ. ૪૮ પાન ૧૧૧)

## ૮.૪૮ માસાનાં માહાત્મ્યવર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
પ્રસઙ્ગાચ્છૃણુ માસાનાં ચરિતં ગણપે રતમ્ ।
દ્વાદશાનાં સુસઙ્ક્ષેપાત્ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

શ્રાવણે પઞ્ચકં સેવ્ય ગાણેશં વરુણઃ સ્વયમ્ ।
દિગીશત્વં સમાલેભે જ્ઞાનં ગાણેશસમ્ભવમ્ ॥ ૨॥

સ્વયં ભાદ્રપદે વાયુસ્તથા સેવ્ય મયૂરપમ્ ।
યોગં લેભે દિગીશત્વં ગાણપત્યોઽભવત્ પ્રભુઃ ॥ ૩॥

આશ્વિને દેવગન્ધર્વાઃ સેવ્ય વિઘ્નેશ્વરં પુરા ।
સ્વસ્વૈશ્વર્યસમાયુક્તા બભૂવુસ્તે મહામુને ॥ ૪॥

કાર્તિકે વક્રતુણ્ડં તુ સેવ્ય વિદ્યાધરાસ્તથા ।
સ્વસ્વવ્યાપારસંયુક્તા બભૂવુર્જ્ઞાનધારકાઃ ॥ ૫॥

વિકટં માર્ગશીર્ષે ચાદિત્યાઃ સંસેવ્ય સર્વપાઃ ।

જાતાસ્તેજસ્વિનઃ સર્વે જ્ઞાનયુક્તા મહામુને ॥ ૬॥

પૌષે લમ્બોદરં સેવ્ય વસવઃ સ્વપદાશ્રિતાઃ ।
બભૂવુર્જ્ઞાનસંયુક્તા નાનાભાવપરાયણાઃ ॥ ૭॥

માઘે રુદ્રા ગણેશાનં સેવ્ય સર્વત્રગા બભુઃ ।
ગાણપત્યા મહાભાગાશ્ચરન્તિ હ્યકુતોભયાઃ ॥ ૮॥

ફાલ્ગુને નિરૃતિઃ સેવ્ય ગણેશં દિક્પતેઃ પદમ્ ।
લેભેઽભિચારભાવાખ્યં કર્મભોગં મહામતિઃ ॥ ૯॥

ચૈત્ર અપ્સરસઃ સર્વાઃ સેવ્ય તં ધૂમ્રવર્ણકમ્ ।
નાનાલાવણ્યજં લેભુર્ગાનાદિ ભગમેવ ચ ॥ ૧૦॥

હેરમ્બં સૈવ્ય વૈશાખેઽભવન્ યક્ષજનાસ્તથા ।
સ્વસ્વવ્યાપારકુશલા નાનાભોગપરાયણાઃ ॥ ૧૧॥

જ્યેષ્ઠે વિનાયકં નાગાઃ સેવ્ય સામર્થ્યસંયુતાઃ ।
બભૂવુઃ કાર્યકર્તારો નાનાભોગપરાયણાઃ ॥ ૧૨॥

પક્ષિણઃ પઞ્ચકં નિત્યં સેવ્યાઽઽષાઢે ગજાનનમ્ ।
અભવન્ ભોગસંયુક્તાઃ સ્વકાર્યકુશલાઃ કિલ ॥ ૧૩॥

ઢુણ્ઢિરાજં તથા ઢૌણ્ઢે ધાતુભિઃ સેવ્ય પર્વતાઃ ।
બભૂવૂ રત્નજાતીનાં ધારકા ભોગકારિણઃ ॥ ૧૪॥

વાર્ષિકં સ્વસ્વમાસં તે સમાશ્રિત્ય ગજાનનમ્ ।
અભવન્ સ્નાનકર્તારો ગાણેશે પઞ્ચકે રતાઃ ॥ ૧૫॥

એવં નાનાજનાઃ સિદ્ધિં લેભિરે માસજેન ચ ।
વ્રતેન કતિ તે બ્રૂયાં નાલં વર્ષાયુતૈરપિ ॥ ૧૬॥

ઇદં માસભવં સર્વં માહાત્મ્યં કથિતં મયા ।
પઠનાચ્છ્રવણાત્ સદ્યો ભવતે સર્વસિદ્ધિદમ્ ॥ ૧૭॥

યં યમિચ્છતિ તં તં સ લભતે નાઽત્ર સંશયઃ ।
અન્તે ગાણેશ્વરે ધામ્નિ લીનઃ સઞ્જાયતે મુને ॥ ૧૮॥

ઇદં સર્વં સમાખ્યાતં યદ્યત્ પૃષ્ટં ત્વયા મુને ।
શ્રોતુમિચ્છસિ કિં ભૂયો વદ તત્ કથયામ્યહમ્ ॥ ૧૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે માસાનાં માહાત્મ્યવર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૮.૪૮
(Page ખં. ૮ અ. ૪૯ પાન ૧૧૨)

## ૮.૪૯ ગણેશહૃદયકથનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
પ્રકૃતં વદ સૂત ત્વં સંવાદં શઙ્કરસ્ય ચ ।
સનકાદેર્વિશેષેણ સર્વસિદ્ધિકરં પરમ્ ॥ ૧॥

નાનાવતારસંયુક્તં ધૂમ્રવર્ણચરિત્રકમ્ ।
શ્રુત્વા સનકમુખ્યાસ્તં કિમૂચુર્યોગસિદ્ધયે ॥ ૨॥

સૂત ઉવાચ ।
ધૂમ્રવર્ણાવતારસ્ય શ્રુત્વાઽહં વધસંશ્રિતમ્ ।
ચરિતં હૃષ્ટરોમાણઃ પપ્રચ્છુઃ શઙ્કરં દ્વિજાઃ ॥ ૩॥

સનકાદ્યા ઊચુઃ ।
નાનાવતારસંયુક્તં શ્રુત્વા માહાત્મ્યમુત્તમમ્ ।
ધૂમ્રવર્ણાવતારસ્ય સન્તુષ્ટાઃ સ્મ સદાશિવ ॥ ૪॥

અધુના શાધિ સર્વેશ યોગપ્રાપ્ત્યર્થમુત્તમમ્ ।
વિધિં સુખકરં શીઘ્રં સુગમં યોગિનાયક ॥ ૫॥

શ્રીશિવ ઉવાચ ।
ગણેશહૃદયં વક્ષ્યે સર્વસિદ્ધિપ્રદાયકમ્ ।
સાધકાય મહાભાગાઃ શીઘ્રં વૈ શાન્તિદં પરમ્ ॥ ૬॥

પુરાઽહં ગણનાથસ્ય ધ્યાનયુક્તોઽભવં દ્વિજાઃ ।
તત્ર માં સરિતાં શ્રેષ્ઠા જગાદ વાક્યમુત્તમમ્ ॥ ૭॥

ગઙ્ગોવાચ ।
વદ શઙ્કર કસ્ય ત્વં ધ્યાનં કરોષિ નિત્યદા ।
ઇચ્છામિ તમહં જ્ઞાતું ત્વત્તઃ કિં પરમં મતમ્ ॥ ૮॥

શ્રીશિવ ઉવાચ ।

ગણેશં દેવદેવેશં બ્રહ્મબ્રહ્મેશમાદરાત્ ।
ધ્યાયામિ સર્વભાવજ્ઞે કુલદેવં સનાતનમ્ ॥ ૯॥

તસ્ય યદ્ હૃદયં દેવિ ગુપ્તં સર્વપ્રદાયકમ્ ।
કથયિષ્યામિ સર્વજ્ઞે યેન જ્ઞાસ્યસિ તં વિભુમ્ ॥ ૧૦॥

પુરાઽજ્ઞાનાવૃતોઽહં તુ તપસિ સંસ્થિતોઽભવમ્ ।
તત્ર તપઃ પ્રભાવેણ હૃદ્યપશ્યં ગજાનનમ્ ॥ ૧૧॥

તસ્ય દર્શનમાત્રેણ સ્ફૂર્તિઃ પ્રાપ્તા મયા પ્રિયે ।
તથા ગણેશ્વરં જ્ઞાત્વા યોગિવન્દ્યોઽભવં મુદા ॥ ૧૨॥

તત્તેઽહં શ‍ૃણુ વક્ષ્યામિ ગણેશહૃદયં પરમ્ ।
યેન ગાણેશયોગે ત્વં નિપુણા સમ્ભવિષ્યસિ ॥ ૧૩॥

ૐ અસ્ય ગણેશહૃદયસ્તોત્રમન્ત્રસ્ય। શમ્ભુઋષિઃ ।
નાના છન્દાંસિ। ગણેશો દેવતા ।
ગમિતિ બીજમ્ ।
જ્ઞાનાત્મિકા શક્તિઃ ।
નાદઃ કીલકમ્ ।
શ્રીગણપતિપ્રીત્યર્થમભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ૐ ગમિત્યેકાક્ષરાત્મકબીજૈઃ કરન્યાસાઃ ષડઙ્ગન્યાસાશ્ચ ।
અથ ધ્યાનમ્ ।
સિન્દૂરાભં ત્રિનેત્રં પૃથુતરજઠરં રક્તવસ્ત્રાવૃતં તં
પાશં ચૈવાઙ્કુશં વૈ રદનમભયકં પાણિભિઃ સન્દધાનમ્ ।
સિદ્ધ્યા બુદ્ધ્યા પ્રશ્લિષ્ટં ગજવદનમહં ચિન્તયે હ્યેકદન્તં
નાનાભૂષાભિરામં નિજજનસુખદં નાભિશેષં ગણેશમ્ ॥ ૧૪॥

એવં ધ્યાત્વા માનસોપચારૈઃ પૂજયેત્ ।
કિઞ્ચિન્મૂલમન્ત્રં જપ્ત્વા હૃદયં પઠેત્ ।
ૐ ગણેશમેકદન્તં ચ ચિન્તામણિં વિનાયકમ્ ।
ઢુણ્ઢિરાજં મયૂરેશં લમ્બોદરં ગજાનનમ્ ॥ ૧૫॥

હેરમ્બં વક્રતુણ્ડં ચ જ્યેષ્ઠરાજં નિજસ્થિતમ્ ।
આશાપૂરં તુ વરદં વિકટં ધરણીધરમ્ ॥ ૧૬॥

સિદ્ધિબુદ્ધિપતિં વન્દે બ્રહ્મણસ્પતિસંજ્ઞિતમ્ ।

માઙ્ગલ્યેશં સર્વપૂજ્યં વિઘ્નાનાં નાયકં પરમ્ ॥ ૧૭॥

એકવિંશતિ નામાનિ ગણેશસ્ય મહાત્મનઃ ।
અર્થેન સંયુતાન્યેવ હૃદયં પરિકીર્તિતમ્ ॥ ૧૮॥

ગઙ્ગોવાચ ।
એકવિંશતિનામ્નાં ત્વમર્થં બ્રૂહિ સદાશિવ ।
ગણેશહૃદયં યેન જાનામિ કરુણાનિધે ॥ ૧૯॥

શ્રીશિવ ઉવાચ ।
ગ કારરૂપં વિવિધં ચરાચરં ણ કારગં બ્રહ્મ તથા પરાત્પરમ્ ।
તયોઃ સ્થિતાસ્તસ્ય ગણાઃ પ્રકીર્તિતા ગણેશમેકં પ્રણમામ્યહં પરમ્ ॥ ૨૦॥

(Page ખં. ૮ અ. ૪૯ પાન ૧૧૩)
માયાસ્વરૂપં તુ સદૈકવાચકં દન્તઃ પરો માયિકરૂપધારકઃ ।
યોગે તયોરેકરદં સુમાનિનિ ધીસ્થં નતોઽહં જનભક્તિલાલસમ્ ॥ ૨૧॥

ચિત્તપ્રકાશં વિવિધેષુ સંસ્થં લિપ્તં ન લેપાદિ વિવર્જિતં તમ્ ।
ભોગૈર્વિહીનં ત્વથ ભોગકારં ચિન્તામણિં તં પ્રણમામિ નિત્યમ્ ॥ ૨૨॥

વિનાયકં નાયકવર્જિતં પ્રિયે વિશેષતો નાયકમીશ્વરાત્મનામ્ ।
નિરઙ્કુશં તં પ્રણમામિ સર્વદં સદાત્મકં ભાવયુતેન ચેતસા ॥ ૨૩॥

વેદાઃ પુરાણાનિ મહેશ્વરાદિકાઃ શાસ્ત્રાણિ યોગેશ્વર દેવમાનવાઃ ।
નાગાસુરા બ્રહ્મગણાશ્ચ જન્તવો ઢુણ્ઢન્તિ વન્દે ત્વથ ઢુણ્ઢિરાજકમ્ ॥ ૨૪॥

માયાર્થવાચ્યો હિ મયૂરભાવો નાના ભ્રમાર્થં પ્રકરોતિ તેન ।
તસ્માન્ મયૂરેશમયો વદન્તિ નમામિ માયાપતિમાસમન્તાત્ ॥ ૨૫॥

યસ્યોદરાદ્વિશ્વમિદં પ્રસૂતં બ્રહ્માણિ તદ્વજ્જઠરે સ્થિતાનિ ।
અનન્તરૂપં જઠરં હિ યસ્ય લમ્બોદરં તં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૨૬॥

જગદ્ગલાધો ગણનાયકસ્ય ગજાત્મકં બ્રહ્મશિરઃ પરેશમ્ ।
તયોશ્ચ યોગે પ્રવદન્તિ સર્વે ગજાનનં તં પ્રણમામિ નિત્યમ્ ॥ ૨૭॥

દીનાર્થવાચ્યસ્ત્વથ હેર્જગદ્વો બ્રહ્માર્થવાચ્યો નિગમેષુ રમ્બઃ ।
તત્પાલકત્વાચ્ચ તયોઃ પ્રયોગે હેરમ્બમેકં પ્રણમામિ નિત્યમ્ ॥ ૨૮॥

વિશ્વાત્મકં યસ્ય શરીરમેકં તસ્માચ્ચ વક્રં પરમાત્મરૂપમ્ ।
તુણ્ડં તદેવં હિ તયોઃ પ્રયોગે તં વક્રતુણ્ડં પ્રણમામિ નિત્યમ્ ॥ ૨૯॥

માતા પિતાઽયં જગતાં પરેષાં તસ્યાઽપિ માતા જનકાદિકં ન ।
શ્રેષ્ઠં વદન્તે નિગમાઃ પરેશં તં જ્યેષ્ઠરાજં પ્રણમામિ નિત્યમ્ ॥ ૩૦॥

નાના ચતુઃસ્થં વિવિધાત્મકેન સંયોગરૂપેણ નિજસ્વરૂપમ્ ।
પૂર્યસ્ય સા પૂર્ણસમાધિરૂપા સ્વાનન્દનાથં પ્રણમામિ ચાતઃ ॥ ૩૧॥

મનોરથાન્ પૂરયતીહ ગઙ્ગે ચરાચરાણાં જગતાં પરેષામ્ ।
અતો ગણેશં પ્રવદન્તિ ચાશાપ્રપૂરકં તં પ્રણમામિ નિત્યમ્ ॥ ૩૨॥

વરૈઃ સમાસ્થાપિતમેવ સર્વં વિશ્વં તથા બ્રહ્મવિહારિણા ચ ।
અતઃ પરં વિપ્રમુખા વદન્તિ વરપ્રદં તં વરદં નતોઽસ્મિ ॥ ૩૩॥

માયામયં સર્વમિદં વિભાતિ મિથ્યાસ્વરૂપં ભ્રમદાયકં ચ ।
તસ્માત્ પરં બ્રહ્મ વદન્તિ સત્યમેનં પરેશં વિકટં નમામિ ॥ ૩૪॥

ચિત્તસ્ય પ્રોક્તા મુનિભિઃ પૃથિવ્યો નાનાવિધા યોગિભિરેવ ગઙ્ગે ।
તાસાં સદા ધારક એક એવ વન્દે ચ ધરણીધરમાદિભૂતમ્ ॥ ૩૫॥

વિશ્વાત્મિકા બ્રહ્મમયી હિ બુદ્ધિસ્તસ્યા વિમોહપ્રદિકા ચ સિદ્ધિઃ ।
તાભ્યાં સદા ખેલતિ યોગનાથસ્તં સિદ્ધિબુદ્ધીશમથો નમામિ ॥ ૩૬॥

અસત્યસત્ સામ્યતુરીયનૈજ્યગનિવૃત્તિરૂપાણિ વિરચ્ય ખેલકઃ ।
સદા સ્વયં યોગમયેન ભાતિ તં નમામ્યતોઽહં ત્વથ બ્રહ્મણસ્પતિમ્ ॥ ૩૭॥

અમઙ્ગલં વિશ્વમિદં સહાત્મભિરયોગસંયોગયુતં પ્રણશ્વરમ્ ।
તતઃ પરં મઙ્ગલરૂપધારકં નમામિ માઙ્ગલ્યપતિં સુશાન્તિદમ્ ॥ ૩૮॥

સર્વત્ર માન્યં સકલાવભાસકં સુજ્ઞૈઃ શુભાદાવશુભાદિપૂજિતમ્ ।
પૂજ્યં ન તસ્માન્નિગમાદિસમ્મતં તં સર્વપૂજ્યં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૩૯॥

ભુક્તિં ચ મુક્તિં પ્રદદાતિ તુષ્ટો ભક્તિપ્રિયો યો નિજવિઘ્નહા ચ ।
ભક્ત્યા વિહીનાય દદાતિ વિઘ્નાંસ્તં વિઘ્નરાજં પ્રણમામિ નિત્યમ્ ॥ ૪૦॥

નામાર્થયુક્તં કથિતં પ્રિયે તે વિઘ્નેશ્વરસ્યૈવ પરં રહસ્યમ્ ।
ત્રિઃ સપ્ત નામ્નાં હૃદયં નરો યો જ્ઞાત્વા પરં બ્રહ્મમયો ભવેદિહ ॥ ૪૧॥

ગઙ્ગોવાચ ।
નામ્નાં યત્ હૃદયં પ્રોક્તં ત્વયા બ્રહ્મપ્રદં પરમ્ ।
ન તત્રાનુભવો મે તુ તદર્થં વદ શઙ્કર ॥ ૪૨॥

શઙ્કર ઉવાચ ।

મન્ત્રં ગૃહ્ય ગણેશસ્ય પુરશ્ચરણમાર્ગતઃ ।
ભજ તં તેન તે જ્ઞાનં ભવિષ્યતિ ન સંશયઃ ॥ ૪૩॥

હૃદયં મન્ત્રરાજસ્ય કથયામિ સમાસતઃ ।
મન્ત્ર એવ ગણેશાનો ન ભિન્નસ્તત્ર વર્તતે ॥ ૪૪॥

ગકારો બ્રહ્મદેવશ્ચાઽકારો વિષ્ણુઃ પ્રકીર્તિતઃ ।
બિન્દુઃ શિવસ્તથા ભાનુરનુનાસિકસંજ્ઞિતઃ ॥ ૪૫॥

તેષાં સન્ધિર્મહાશક્તિરેભિર્મન્ત્રઃ સ ઉચ્યતે ।
દેવતા ગણનાથસ્તુ તેષાં સંયોગકારકઃ ॥ ૪૬॥

તેભ્યસ્તારમયં વિશ્વં સમુત્પન્નં પ્રિયે પુરા ।
અતસ્તારયુતો મન્ત્રો ગણેશૈકાક્ષરાકૃતિઃ ॥ ૪૭॥

તારઃ સ ષડ્વિધઃ પ્રોક્તસ્તં નિબોધ સરિદ્વરે ।
અકારોકારકૌ પ્રોક્તૌ મકારો નાદબિન્દુકૌ ॥ ૪૮॥

શૂન્યં વિદ્ધિ મહામાયે તત્ર ભેદં વદામ્યહમ્ ।
શૂન્યં દેહિસ્વરૂપં તુ બિન્દુર્દેહ ઇતિ સ્મૃતઃ ॥ ૪૯॥

તાભ્યાં ચતુર્વિધં વિશ્વં સ્થૂલાદિભેદકારકમ્ ।
એતાદૃશં વિજાનીહિ મન્ત્રરાજં ગજાનનમ્ ॥ ૫૦॥

આગમોક્તવિધાનેન કૃત્વા ન્યાસાદિકં પુરા ।
તતો ગણેશ્વરં પૂજ્ય જપં કુર્યાદ્વિચક્ષણઃ ॥ ૫૧॥

તદ્દશાંશેન હોમં વૈ કુર્યાદાગમમાર્ગતઃ ।
તદ્દશાંશમિતં પ્રોક્તં તર્પણં ગણપસ્ય ચ ॥ ૫૨॥

તદ્દશાંશમિતં દેવિ માર્જનં તદ્દશાંશતઃ ।
વિપ્રાણાં ભોજનં પ્રોક્તમેવં પઞ્ચાઙ્ગમુચ્યતે ॥ ૫૩॥

યથાવિધિ કૃતં ચૈતત્ સદ્યો હિ ફલદં ભવેત્ ।
અતસ્ત્વં મન્ત્રરાજસ્ય પઞ્ચકં તત્ સમાચર ॥ ૫૪॥

એવમુક્ત્વાઽદદાત્તસ્યૈ મન્ત્રં વિધિસમન્વિતમ્ ।
ગણેશસ્ય પ્રણમ્યૈવ માં યયૌ સા તપોર્થતઃ ॥ ૫૫॥

મયૂરેશં સમાસાદ્ય ચકાર તપમુત્તમમ્ ।
ગઙ્ગા તત્રૈવ વિપ્રેશા મન્ત્રધ્યાનપરાયણા ॥ ૫૬॥

પુરશ્ચરણમેકં સા ચકાર સરિતાં વરા ।
તતઃ પ્રસન્નતાં યાતો ગણેશો ભક્તવત્સલઃ ॥ ૫૭॥

તસ્યૈવ કૃપયા તસ્યા હૃદિ ધ્યાનં બભૂવ હ ।
તેનૈકવિંશતિનામ્નામર્થજ્ઞા તત્ક્ષણાદભૂત્ ॥ ૫૮॥

તતો હર્ષયુતા દેવી તત્ર વાસં ચકાર સા ।
નિત્યં ભક્તિસમાયુક્તાઽભજત્તં ગણનાયકમ્ ॥ ૫૯॥

સનકાદ્યા ઊચુઃ ।
બ્રહ્મભૂતા સરિચ્છ્રેષ્ઠા મયૂરેશં કથં પ્રભો ।
અભજત્તસ્ય માર્ગં નો બ્રૂહિ નાથ નમોઽસ્તુ તે ॥ ૬૦॥

શિવ ઉવાચ ।
બ્રહ્મભૂતો નરો યોગી ગણેશમભજત્ સદા ।
નવધા ભક્તિભાવેન તત્પરશ્ચ મહર્ષયઃ ॥ ૬૧॥

પુત્રઃ કલત્રં જનકૌ સુહૃદ્ગણો દ્રવ્યં સખા વૃત્તિજવિદ્યયા યુતમ્ ।
સ્વર્ગસ્તુ મોક્ષો વિવિધં ત્વમેવ મે સ્વામી ગુરુર્વિઘ્નપતિઃ પરાત્પરઃ ॥ ૬૨॥

સાંસર્ગિકં કાયિકવાચિકં પરં કર્માઽચરં માનસજં ત્રિદેહતઃ ।
જ્ઞાનં હૃદિસ્થં ચ મયા પરાત્પરં વિઘ્નેશ્વરાયેતિ સમર્પિતં કિલ ॥ ૬૩॥

(Page ખં. ૮ અ. ૪૯ પાન ૧૧૫)
યોગાકારેણ વિઘ્નેશ એકાનેકાદિસંશ્રિતઃ ।
ભુઙ્ક્તે સ વિવિધાન્ ભોગાન્ શુભાશુભસમાશ્રિતાન્ ॥ ૬૪॥

નાહં નરઃ સ્વયં સાક્ષાત્ ક્રીડતિ ગણનાયકઃ ।
સ્વામિસેવકભાવેન રતો બ્રહ્મણિ શોભતે ॥ ૬૫॥

અનેન વિધિના વિપ્રા ભજન્તે ગણનાયકમ્ ।
યોગિનઃ શુકમુખ્યાશ્ચ મુદ્ગલાદ્યા મહર્ષયઃ ॥ ૬૬॥

એતત્સર્વં સમાખ્યાતં ગુહ્યં ગણપતેર્મયા ।
હૃદયં તેન વિઘ્નેશં તોષયધ્વં મહર્ષયઃ ॥ ૬૭॥

યથા દેહેન્દ્રિયાદ્યેષુ મુખ્યં સ્વહૃદયં સ્મૃતમ્ ।
યત્ર જીવસ્વરૂપેણ તિષ્ઠતિ ગણનાયકઃ ॥ ૬૮॥

તથા ગણપતેરેતત્ હૃદયં પરિકીર્તિતમ્ ।
અત્ર યોગપતિઃ સાક્ષાત્તિષ્ઠતિ બ્રહ્મનાયકઃ ॥ ૬૯॥

અનેન ગણનાથં તુ યસ્તોષ્યતિ નરોત્તમઃ ।
સ ભુક્ત્વા સકલાન્ ભોગાનન્તે યોગમયો ભવેત્ ॥ ૭૦॥

એવં મદીયવાક્યં તે શ્રુત્વા બ્રહ્મસુતાઃ પરમ્ ।
પ્રણમ્ય માં યયુઃ સર્વે સનકાદ્યાસ્તપોવનમ્ ॥ ૭૧॥

એકાક્ષરસ્ય મન્ત્રસ્ય પઞ્ચકં સેવ્ય યોગિનઃ ।
ગણેશહૃદયં જ્ઞાત્વા ગાણપત્યા બભૂવિરે ॥ ૭૨॥

તતો નિત્યં ગણેશસ્ય હૃદયં તે મહર્ષયઃ ।
જપન્તિ ભક્તિસંયુક્તા ભ્રમન્તિ સ્વેચ્છયેરિતાઃ ॥ ૭૩॥

અતસ્ત્વમપિ ભાવેન ગણેશહૃદયં પરમ્ ।
સેવસ્વ ગાણપત્યેષુ તથા મુખ્યો ભવિષ્યસિ ॥ ૭૪॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા મહાનાગં શેષાય પ્રદદૌ શિવઃ ।
મન્ત્રમેકાક્ષરં સાઙ્ગં સ યયૌ તં પ્રણમ્ય ચ ॥ ૭૫॥

સાધયિત્વા યથાન્યાયં હૃદયજ્ઞો બભૂવ હ ।
નિત્યં હૃદયકેનૈવ તુષ્ટાવ દ્વિરદાનનમ્ ॥ ૭૬॥

ગણેશહૃદયં પુણ્યં શ‍ૃણુયાચ્છ્રાવયેન્નરઃ ।
ઈપ્સિતં પ્રાપ્નુયાદન્તે બ્રહ્મભૂતો ભવેદિદમ્ ॥ ૭૭॥

નિત્યં પઠેન્નરશ્ચેદં હૃદયં ગણપસ્ય યઃ ।
સ ગણેશો ન સન્દેહો દર્શનાત્ સિદ્ધિદો ભવેત્ ॥ ૭૮॥

પુત્રપૌત્રકલત્રાદિ લભતે પાઠતો નરઃ ।
ધનં સુવિપુલં ધાન્યમારોગ્યમચલાં શ્રિયમ્ ॥ ૭૯॥

એકવિંશતિવારં યો દિવસાનેકવિંશતિમ્ ।
પઠેદ્ગણપતિં ચિન્ત્યં સ લભેદીપ્સિતં ફલમ્ ॥ ૮૦॥

અસાધ્યં સાધયેન્ મર્ત્યો ગણેશહૃદયેન યત્ ।
રાજબન્ધાત્રિકાલેષુ મોચયેત્ પાઠતો વિધે ॥ ૮૧॥

મારણોચ્ચાટનાદીનિ વશ્યમોહાદિકાનિ તુ ।

અનેન સાધયેન્મર્ત્યઃ પરકૃત્યં પ્રણાશયેત્ ॥ ૮૨॥

સઙ્ગ્રામે જયમાપ્નોતિ વીરશ્રીસંયુતો ભવેત્ ।
અસ્ય પાઠેન ભો દક્ષ ન કિઞ્ચિદ્ દુર્લભં ભવેત્ ॥ ૮૩॥

વિદ્યામાયુર્યશઃ પ્રજ્ઞામઙ્ગહીનોઽઙ્ગમાપ્નુયાત્ ।
યં યં ચિન્તયતે મર્ત્યસ્તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૮૪॥

નાનેન સદૃશં કિઞ્ચિત્ શીઘ્રસિદ્ધિકરં ભવેત્ ।
સાક્ષાદ્ગણપતેઃ પ્રોક્તં હૃદયં તે મયા વિધે ॥ ૮૫॥

ગણેશભક્તિહીનાય દુર્વિનીતાય વિદ્વિષે ।
ન દેયં ગણરાજસ્ય હૃદયં વૈ કદાચન ॥ ૮૬॥

ગણેશભક્તિયુક્તાય સાધવે ચ પ્રયત્નતઃ ।
દાતવ્યં તેન વિઘ્નેશઃ સુપ્રસન્નો ભવિષ્યતિ ॥ ૮૭॥

મહાસિદ્ધિપ્રદં તુભ્યં કથિતં ગણપસ્ય ચ ।
હૃદયં કિં પુનઃ શ્રોતુમિચ્છસિ ત્વં પ્રજાપતે ॥ ૮૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ગણેશહૃદયકથનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૮.૪૯
(Page ખં. ૮ અ. ૫૦ પાન ૧૧૬)

## ૮.૫૦ ફલશ્રુતિવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
યોગિધ્યેયં ગણેશસ્ય રૂપં સર્વત્ર સમ્મતમ્ ।
ધ્યાતું ત્વયોગિભિઃ શક્યં પ્રત્યક્ષં નાઽત્ર સંશયઃ ॥ ૧॥

કથં વેદાદિષુ પ્રોક્તં યોગિધ્યેયમનુત્તમમ્ ।
વદ તત્ કારણં વિપ્ર સંશયસ્યાપનુત્તયે ॥ ૨॥

મુદ્ગલ ઉવાચ ।
અયોગિનો ગણેશાનં પઞ્ચભૂતમયં પ્રભુમ્ ।
જાનન્તિ સર્વતુલ્યં તં દેહધારિણમઞ્જસા ॥ ૩॥

ન તેષાં હૃદયે દક્ષ રૂપં યોગમયં પરમ્ ।

શોભતે ગણરાજસ્ય યોગાકારમપિ સ્ફુટમ્ ॥ ૪॥

યોગિનસ્તં વિશેષેણ જાનન્તિ યોગરૂપિણમ્ ।
તત્ર ભેદં પ્રવક્ષ્યામિ શૃણુષ્વૈકાગ્રમાનસઃ ॥ ૫॥

સમષ્ટિવ્યષ્ટિરૂપાખ્યં બ્રહ્મ વેદે પ્રકીર્તિતમ્ ।
કુમ્ભસ્થલે ગણેશસ્ય પશ્યન્તિ તન્મયે ચ તે ॥ ૬॥

ત્રિવિધં વિવિધં દક્ષ ત્રિનેત્રે સઙ્ગતં મહઃ ।
પશ્યન્તિ યોગિનસ્તસ્ય ગણેશસ્ય મહાત્મનઃ ॥ ૭॥

મહાકારણરૂપા તુ શુણ્ડા તસ્ય પ્રકીર્તિતા ।
બિન્દુઃ કણ્ઠસ્તથા દન્તઃ સોઽહં માત્રાત્મકઃ સ્મૃતઃ ॥ ૮॥

બોધરૂપં ગણેશસ્ય જઠરં સાઙ્ખ્યવાચકૌ ।
કર્ણૌ ચતુર્વિધં બ્રહ્મ ચતુર્ભુજમયં સ્મૃતમ્ ॥ ૯॥

માયામોહયુતં બ્રહ્મ મોહહીનં સુસાક્ષિકમ્ ।
દ્વૌ પાદૌ ગણરાજસ્ય પશ્યન્તિ યોગિનઃ કિલ ॥ ૧૦॥

સંહારાખ્યં ચ યદ્બ્રહ્મ પરશુસ્તસ્ય શોભનઃ ।
નિયન્ત્રાખ્યં તથા દક્ષ અઙ્કુશશ્ચ મહાત્મનઃ ॥ ૧૧॥

કમલં સૃષ્ટિરૂપાખ્યં પાશં મોહમયં પરમ્ ।
બન્ધમોક્ષાત્મકં હન્ત દુષ્ટનાશકરં મુદા ॥ ૧૨॥

અભયં ભક્તજાતિભ્યો રક્ષકં વાઞ્છિતપ્રદમ્ ।
વરં સકામકાનાં તુ કામદં તં વદન્તિ તે ॥ ૧૩॥

ચિન્તામણિં મણિં તત્ર ભુક્તિમુક્તિપ્રદં પરમ્ ।
અક્ષીણતેજસં ચન્દ્રમમૃતં બ્રહ્મ નિશ્ચિતમ્ ॥ ૧૪॥

સ્વાનન્દાખ્યં પરં બ્રહ્મ તદેવ નગરં પ્રભોઃ ।
ઇક્ષુસાગરરૂપં ચ રસાણાં બ્રહ્મ કથ્યતે ॥ ૧૫॥

પઞ્ચચિત્તમયી બુદ્ધિસ્તત્રૈશ્વર્યભ્રમાત્મિકા ।
સિદ્ધિર્માયે વદન્ત્યેવ યોગિનો યોગભાવતઃ ॥ ૧૬॥

મૂષકં વ્યાપકાખ્યં ચ પરં પશ્યન્તિ વાહનમ્ ।
ધર્માધર્મૌ ગણેશસ્યોરઃપૃષ્ઠે પાર્શ્વગે કિલ ॥ ૧૭॥

શુભાશુભેઽથ રોમાણિ ઓષધ્યશ્ચ પ્રકીર્તિતાઃ ।
કલ્પા ઉન્મેષણં તસ્ય નિમેષણં પ્રજાપતે ॥ ૧૮॥

લક્ષલાભૌ સુતૌ તસ્ય સર્વકાર્યપ્રવર્તકૌ ।
યાદૃશં ક્રિયતે લક્ષ્યં તાદૃશં ફલમશ્નુતે ॥ ૧૯॥

ઇત્યાદિ વિવિધં તસ્ય બ્રહ્માકારં ન સંશયઃ ।
સર્વં તેન ગણાધ્યક્ષો બ્રહ્મણસ્પતિરુચ્યતે ॥ ૨૦॥

યોગિનઃ શુકમુખ્યાસ્તં ધ્યાયન્તે દેહધારિણમ્ ।
બ્રહ્મરૂપં સુસાકારં નિરાકારમયં વિભુમ્ ॥ ૨૧॥

સગુણં કણ્ઠપર્યન્તં નિર્ગુણં ગજવાચકમ્ ।
મસ્તકં ચ તયોર્યોગે યોગં જાનન્તિ વિઘ્નપમ્ ॥ ૨૨॥

યોગિધ્યેયમતો વેદાદિષુ સઙ્કથિતં વિધે ।
રૂપં ગણપતેઃ પ્રોક્તં યોગાકારં સ્વભાવતઃ ॥ ૨૩॥

દક્ષ ઉવાચ ।
મૂષકો વાહનં તસ્ય કથં બભૂવ વિપ્રપ ।
તન્મે બ્રૂહિ વિશેષેણ સર્વજ્ઞોઽસિ કૃપાનિધે ॥ ૨૪॥

મુદ્ગલ ઉવાચ ।
માયયા વ્યાપકં બ્રહ્મા મોહ્ય નાનાજનાન્ પરાન્ ।
ભુઙ્ક્તે ભોગાંસ્તત્કૃતાંસ્તચ્છુભાશુભવિવર્જિતમ્ ॥ ૨૫॥

(Page ખં. ૮ અ. ૫૦ પાન ૧૧૭)
મુષસ્તેયે સમાખ્યાતો ધાતુઃ સ એવ મૂષકઃ ।
વ્યાપકશ્ચૌરવત્ સર્વાન્ ભુઙ્ક્તે મોહ્ય હૃદિ સ્થિતઃ ॥ ૨૬॥

તપસાઽઽરાધિતસ્તેન વ્યાપકેન ગજાનનઃ ।
પ્રસન્નો વાહનં ચક્રે તત્પ્રીતિવર્ધનાર્થતઃ ॥ ૨૭॥

એતત્સર્વં સમાખ્યાતં ધૂમ્રવર્ણચરિત્રકમ્ ।
નાનાખ્યાનસમાયુક્તં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૮॥

ય ઇદં શ્રાવયેદ્દક્ષ શૃણુયાદ્વા પઠેન્નરઃ ।
સ સર્વસુખસંયુક્તોઽન્તે બ્રહ્મણિ ગતો ભવેત્ ॥ ૨૯॥

નાનેન સદૃશં કિઞ્ચિત્ સર્વસિદ્ધિકરં પરમ્ ।

યત્ર સાક્ષાદ્ગણેશાનઃ કીર્ત્યતે ધૂમ્રવર્ણકઃ ॥ ૩૦॥

યં યમિચ્છતિ તં તં સ લભેદનેન નિશ્ચિતમ્ ।
શ્રવણેન ન સન્દેહો માનવઃ શુભમશ્નુતે ॥ ૩૧॥

લેખયિત્વા ગૃહે યસ્તુ પૂજયેત્ પુસ્તકં નરઃ ।
ન તત્ર રાક્ષસાદિભ્યો ભયં ભવતિ કર્હિચિત્ ॥ ૩૨॥

ભોગાન્ ભુક્ત્વા સ વિવિધાન્ પુત્રપૌત્રસુહૃદ્ વૃતઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા ગણેશે તન્મયો ભવેત્ ॥ ૩૩॥

ધમાર્થકામમોક્ષાણાં દાયકઃ શ્રવણેન ચ ।
પઠનેન ન સન્દેહઃ ખણ્ડોઽયં ધૂમ્રવર્ણકઃ ॥ ૩૪॥

તીર્થાનિ વિવિધાન્યેવ તપઃ કુર્યાન્નરોત્તમઃ ।
વિવિધં તત્ ફલં સદ્ય અસ્ય શ્રવણતો લભેત્ ॥ ૩૫॥

ઇષ્ટાપૂર્તાદિકં યસ્તુ કુર્યાત્ યાત્રાદિકાર્ચનમ્ ।
વિવિધં સ લભેત્ પુણ્યમસ્ય શ્રવણતો નરઃ ॥ ૩૬॥

બહુનાઽત્ર કિમુક્તેન નાનેન સદૃશં પરમ્ ।
કિઞ્ચિન્નાનાવિધેષ્વેવ સાધનેષુ પ્રજાપતે ॥ ૩૭॥

યત્ર યોગપતિઃ સાક્ષાદ્વર્ણ્યતે ધૂમ્રવર્ણકઃ ।
તેન કિં તુલ્યતાં યાન્તિ વિચારય મહામતે ॥ ૩૮॥

સર્વસિદ્ધિકરં પૂર્ણં કથિતં તે ચરિત્રકમ્ ।
ધૂમ્રવર્ણસ્ય સઙ્ક્ષેપાદ્યથામતિ પ્રમાણતઃ ॥ ૩૯॥

વિસ્તરેણ શિવાદ્યાશ્ચ વેદા યોગિન એવ ચ ।
ન સમર્થા ભવન્તીહ તત્ર કોઽહં પ્રજાપતે ॥ ૪૦॥

અધુના ત્વં ગણેશાનં ભજ યત્નપરાયણઃ ।
અથવા શ્રોતુમિચ્છા તે વદતાં કથયામ્યહમ્ ॥ ૪૧॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી તૂષ્ણીં મુદ્ગલ આદધે ।
દક્ષો હૃષ્ટમનાસ્તં તુ પ્રણનામ કૃતાઞ્જલિઃ ॥ ૪૨॥

ધૂમ્રવર્ણચરિત્રં તુ કથિતં તે મહામુને ।
યથા દક્ષાય તેનૈવ કથિતં તાદૃશં પરમ્ ॥ ૪૩॥

સર્વસિદ્ધિકરં ચિત્રં નાનાખ્યાનસમન્વિતમ્ ।
શ્રુતં ત્વયા મહાભાગ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
અષ્ટમે ખણ્ડે ધૂમ્રવર્ણચરિતે ફલશ્રુતિવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૮.૫૦
॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે અષ્ટમઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 8 Dhumravarnacharitam*
pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*